015,1:g,1
NA.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

015,1:8,1 1818
NA
Bhaomuni
Jyotirvidabharanam.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

015,1:g,1
NA

1818

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri



SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. 1818

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशाय नमः ।

अथ

ज्योतिर्वित्कालिदासकविशक्रविरचितं

ज्योतिर्विदाभरणम् ।

पण्डितश्रीभावमुनिकृतया

सुबोधिकाख्यया टीकया समेतम् ।

श्रीमान् पार्श्वजिनोऽतिशेषकगणं प्राप्तः प्रभुः पूर्णगी-
र्द्राक् क्षिप्रप्रचलत्कुयोगकमवप्रौढिः प्रजानां पुरः ।
सत्कीर्त्यानकनादपूरितजगत्साकल्प इष्टार्थदो
गीर्वाणेश्वरसेवितो विजयते विश्वैकचिन्तामणिः ॥ १ ॥

नत्वा गुरुं गिरमपीभमुखं च खेटान् श्रीकालिदासकविशक्रविनिर्मितस्य ।
ज्योतिर्विदाभरणनामवरागमस्य संतन्यते गुरुकृपं सुखबोधिकेऽयम् ॥ २ ॥

श्रीपत्तने प्रवरपौर्णिमिकाह्वगच्छे दुण्ढेरपाठकशुभाश्रयसंश्रितानाम् ।
श्रीयुक्तपूज्यमहिमाप्रभसूरिराज्ञां शिष्येण भावमुनिना मयका यथा चित् ॥ ३ ॥

युग्मम् ।

अथ ग्रन्थारम्भे ग्रन्थकृच्छ्रीकालिदासकविशक्रो वसन्ततिलकावृत्तेन समुचितेष्ट-देवतानमस्काररूपमङ्गलमाचरन्ननुबन्धचतुष्टयमाह ।

रैभ्यात्रिहारितवशिष्ठपराशराद्यै-
र्नत्वोदितं जनघनव्यवहारसिद्ध्यै ।
ग्रथनाम्यहं ननु तदेव गिरं यदार्क्यं
ज्योतिर्विदाभरणनाम्नि महश्च शैवम् ॥ १ ॥

रैभ्या-इति । ननु इति ग्रन्थप्रारम्भे निश्चितं वा ।

यदुक्तम् ।

"ननु निश्चये विरोधे च क्षमायां माक्षिकाक्षिपे ।
पक्षान्तरे च स्वीकारे प्रारम्भे प्रश्नतर्कयोः"-इति 'विश्वप्रकाशबृहट्टीप्पणके' ।

अहं 'कालिदास'-नामा कविर्गिरं नत्वा प्रणम्य जनघनव्यवहारसिद्ध्यै जनानां विप्रा-ङ्गं घनो गात्रं तस्य व्यवहारो गर्भाधानसंस्कारादारभ्यान्त्यसमयं यावदनेन व्यव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हारेण व्यवह्रियत इति तदेप्सतं स्यादिति कथनात् तस्य सिद्ध्यै सम्यक्फललाभाय। अथ वा जनानां घनः समुदायस्तस्य व्यवहारः। अथ वा जनानां घनो दृढोऽवश्यंकर्त्तव्य एव इति। स चासौ व्यवहारश्च। अथ वा घनो बहुश्चासौ व्यवहारश्च घनव्यवहारः। जनानां घनव्यवहारो जनघनव्यवहारस्तस्य सिद्धिस्तस्यै।

"घनः सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरम्बुदे।
संघे मुस्ते घनं मध्यं नृत्यवाद्यप्रकारयोः"-इति 'हैमोऽनेकार्थः'।
"घनो बन्धः पुरं पिण्डो वपुः"-इति 'अभिधानचिन्तामणिः'॥

रैभ्यादिभिरिति नामभिर्ऋषीश्वरैरुदितं वचनगोचरीकृतं वचनगोचरतया प्रकटीकृतं वा। एतद्विशेषणेन स्वाभिमानापनयनाय 'वज्रोत्कीर्णमणौ सूत्रगतिवत्' अत्र मम मतिप्रवेश इति सूचितम्। एवंविधं तदेव इति कर्मभूतम्। अत्रैव-कारेण स्वमतिसंकल्पजन्यमपास्तम्। 'ज्योतिर्विदाभरण'-नाम्नि ग्रन्थे ग्रन्थामि गुम्फयामि इत्यन्वयः। ज्योतिर्ज्यौतिषं विदुरिति ज्योतिर्विदो दैवज्ञास्तेषामाभरणं भूषणमिव भूषणं तन्नाम यस्यासौ तस्मिन्। अथ वा ज्योतिषः शास्त्रस्य या विद्विद्या ज्ञानम्। तस्या आभरणम्। अत्र निमित्तार्थे सप्तमी। एतादृशग्रन्थप्रयोजनायेत्यर्थः। ग्रन्थामीति समीपभविष्यति वर्त्तमानवदिति। तत् किम् यत्तदोर्नित्यसम्बन्धः। यदार्क्यमर्कसम्बन्धि तेजः। यच्च पुनः शैवं शिवसम्बन्धि तेजो भुवने विजयते। अत्र 'गिरं नत्वा'-इति वाचिको नमस्कारः। तदार्क्यं शैवं च तेज इति विषयः सूचितः। व्यवहारसिद्ध्यै इति प्रयोजनं सूचितम्। ज्योतिर्विद इत्यधिकारिणः सूचिताः। ज्योतिर्विदन्तीति ज्योतिर्विदस्तेषामाभरणमित्यादिपदस्थानया व्युत्पत्त्या प्रतिपाद्यप्रतिपादकभावः सम्बन्धः सूचितः। प्रतिपाद्याः पदार्थाः प्रतिपादको ग्रन्थ इति दिक्। ननु ग्रन्थादौ रैभ्येति रेफग्रहणं विघ्नहेतुर्हानिकारो हकारः स्यादित्यादिवर्णपङ्क्तौ छन्दश्शास्त्रेण रोगोत्पत्तिकृद्रेफस्योक्तत्वात्। मैवम्। ऋषिवाचिनामत्वाद्द्रव्यवाचित्वाच्च निर्विघ्नतैव हेतुरिति। अत्र 'सुखबोधिका'-यां यत्र सन्धिविधानं न दृश्यते तत्सुबोधहेतुर्न सन्धिः। "विरामे सन्धिर्न स्यात्"-इति हैमसूत्रेण सिद्धिश्च। अत्र ग्रन्थे श्री-'कालिदास'-कविना 'वराहमिहिरा'दिप्रोक्तमार्गानुगामिनाऽपि वराहमिहिरादिदैवज्ञमदगदौषधप्राया बहुशाब्दिकमतमिश्रिता विषमसन्धयो विषमान्वयदुर्घटशब्दा गुम्फिताः। परं चास्य ग्रन्थस्य वृत्त्याद्युपजीवनं दृष्टम्। तथाऽपि श्रीमतां सर्वस्वसमयपरसमयविदां श्री'महिमाप्रभु'-सूरीश्वरगुरूप्रसादावलम्बनान्ममैष उपक्रमः। अत्र हि मया 'अभिधानचिन्तामणिः'-'हैमोऽनेकार्थ' 'हैमशेषकोशः'-'महीपकोशः'-'अनेकार्थध्वनिमञ्जरी'-'नानाविधैकाक्षरकोशः'-'शब्दकरनामशब्दप्रभेदः'-'हैमलिङ्गानुशासनः'-'हैमबृहद्वृत्तिः'-'धातुरत्नाकरवृत्तिः'।-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिग्रन्था यथामति स्मृताः । अतो ह्यव्यक्तमतिना विभ्रमो न कार्यः । सुधिया तु खलतां विहाय शोध्यः । तत्र तावच्छब्दशुद्धिस्मृतये किञ्चिच्छब्दविवेको लिख्यते । 'आश्लेषा हस्ता श्रवणा तिथिस्तारा स्वातिरेते शब्दाः पुंस्त्रीलिङ्गाः । तारकं त्रिलिङ्गम् । उडुः स्त्रीक्लीवलिङ्गः । अश्वयुक् स्त्रीलिङ्गः । मृगशिरः पुंक्लीवलिङ्गः । शतभिषग्-जान्तः स्त्रीलिङ्गः । पौष्णज्योतिषी क्लीवे रूढे । भासः लग्नं धिष्ण्यम्—एते पुंक्लीवलिङ्गाः । पुनर्वसू द्विवचनान्तः पुंलिङ्गः । मघा बहुलाः कृत्तिका एते नित्यं बहुवचनान्ताः स्त्रीलिङ्गाः । अब्दं हायनं वर्षं मुहूर्त्तं दिनं दिवसं वासरं कुतपमहोरात्रं मूलम्-एते शब्दा पुंक्लीवलिङ्गाः । भगणं क्लीवलिङ्गः । ज्ञातिः पुलिङ्गः । समाः स्त्रीलिङ्गो विकल्पेन बहुवचनान्तः । शरत् स्त्रीलिङ्गः । ज्येष्ठा धनिष्ठा श्रविष्ठा एते तृतीयवर्गद्वितीयान्ताः । ज्यौतिषशास्त्रेऽन्यथाऽपि दृश्यते । तदाह पुनर्वसुः । एकवचनान्तः । मघाकृत्तिका चैकवचनान्ता इति । शुक्रो भृगुः भृगुजः कविः कविजः काव्यः-इत्यादिशब्दपर्यायाः । मिथुनराशौ जितुमः । 'जिन्म' इति शब्दप्रभेदः । बुधः-विदू ज्ञः-बोधनश्चेति शब्दपर्यायाः ।

अथ द्वादशराशीनां विशेषसंज्ञामाह वराहमिहिरः ।

"क्रियतावुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः ।
तौक्षिक आकोकेरो हृद्रोगं चान्त्यभं चेत्थम्" इति ।

अथैषां मध्ये संज्ञान्तरमाह । मिथुनसिंहकन्यातुलवृश्चिककुम्भानां शीर्षोदयसंज्ञा इति ।

अथ भावकुण्डलीगतसंज्ञामाह । कोणं नवमं पञ्चमम्-इति । केन्द्रं कण्टकं चतुष्टयम् १।४।७।१० इति । अथ पणफरसंज्ञामाह २।५।८।११ । अथापोक्लिमसंज्ञामाह ३।६।९।१२ ।

अथ द्वादशभावसंज्ञामाह ।

"कं१ दृक् २।१२ श्रोत्र-३।११ नसा-४।१० कपोल५।९हनवो६।८ वक्त्रम्"७ इति ।

उपचयसंज्ञा३।६।१०।११ इति । विशेषतो बृहज्जातकतः संज्ञा ज्ञेयेति दिक् ॥१॥

अथ विशेषतोऽभिधेयशुद्धतयाऽसम्मतं परिहरन् ग्रन्थनामोत्कीर्त्तनमाह ।

अन्यासदुक्तिविहितोद्गमपक्षराशीन्
व्यर्थानहं विरचयामि वरोक्तियुक्तैः ।
मत्वा वराहमिहिरादिमतैरनेकै-
र्ज्योतिर्विदाभरणमप्यनसन्मतार्हम् ॥ २ ॥

अन्यासद्-इति । अपीति "युक्तप्रश्नयुक्तपदार्थेषु" इति 'हैमोऽनेकार्थः' । 'अहं ज्योतिर्विदाभरणं विरचयामि' इत्यन्वयः । किं कृत्वा । अनेकैर्वरोक्तियुक्तैः सत्यवचनाश्रि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तैर्वराहमिहिरादिमतैरन्यासदुक्तिविहितोद्गमपक्षराशीन्असत्योऽलीकाश्च ता उक्तयश्चासदुक्तयः । अन्येषामसदुक्तयोऽन्यासदुक्तयस्ताभिर्विहितो निर्मायितोऽत एव उद्गमः प्रादुर्भूत एवंविधो यः पक्षः कुहे-(यार्थः)वाकः? । तस्य राशयो गणास्तान् । व्यर्थान् सत्यज्ञानरहितान् मत्वाज्ञात्वा । कथम्भूतं ज्योतिर्विदाभरणम् । अनसन्मतार्हम् । न असन्मतमनसन्मतं शुद्धमतं तस्मै अर्हं योग्यम् । अथ वा असन्तो दुर्जनाः । न असन्तोऽनसन्तः सज्जनास्तेषां मतं सन्मतं तेन योग्यमिति ॥ २ ॥

अथ प्रथमं नवधा मानमाह ।

सौरं च सावनकमैन्दवमार्क्षमानं
पैत्रं गुरोरथ मनोर्मरुतामनेन ।
मानं विधेरिति नवाखिलकर्मसिद्धे-
र्मानानि माननवकेन सुनिश्चयः स्यात् ॥ ३ ॥

सौरम्-इति । सौरं सूर्यसम्बन्धि मानम् । चकारः समुच्चयार्थः । सावनकं तदेव सूर्यसम्बन्धि अयनांशसहितं मानम् । ऐन्दवं चन्द्रसम्बन्धि मानम् । आर्क्षं भसम्बन्धि मानम् । पैत्रं पूर्वज्ञसम्बन्धि मानम् । गुरोर्गिराम्पतेर्मानम् । मनोर्मानम् । मरुतां देवानां मानम् । विधेर्ब्रह्मणो मानम् । इति नव मानानि सन्ति । अनेन माननवकेन अखिलकर्मसिद्धेः सुनिश्चयः स्यात् । अत्र सम्बन्धे षष्ठी ।

"मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतौ ग्रहे"-इति-'अनेकार्थः' ।
"मानशब्दो महाकारे विषभेदे क्रियामितौ ।
आढके कालभेदे च प्रतिष्ठायां जगुर्बुधाः"-इति 'महीपः' ॥ ३ ॥

अथौपजातिच्छन्दसैतेषु लघुमानत्वात् प्रथमं भमानमाह ।

गुर्वक्षराणामुदितं च षष्ट्या
पलं पलानां घटिका किलैका ।
षष्ट्या घटीनां भदिनं तथाऽऽर्यै-
स्तिथ्यैकया चन्द्रमसो दिनं स्यात् ॥ ४ ॥

गुर्व-इति । आर्यैः पण्डितैः । "आर्यो ज्ञे बुधपूज्ययोः"-इति 'महीपः' । गुर्वक्षराणां दीर्घवर्णानां षष्ट्या कृत्वा पलमुदितं कथितम् । पलानां षष्ट्या कृत्वैका घटिका कथिता । तथा घटीनां षष्ट्या भदिनं नक्षत्रदिनं कथितम् । च पुनरेकया तिथ्या चन्द्रमसो विधोर्दिनं स्यात् ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ द्रुतलविम्बितेन पूर्वार्धेन सावनमुत्तरार्धेन सौरमानमाह ।

खरमरीच्युदयद्वयजान्तरं
यदिह सावनसंज्ञदिनं स्फुटम् ।
प्रतिदिने स्फुटभुक्तिमितिः सदा
खरगभस्तिदिनं विबुधैः स्मृतम् ॥ ५ ॥

खर-इति । इह मानाधिकारे खरमरीचेः सूर्यस्योदयद्वयं तस्माज्जायते इति जातमेवंविधमन्तरं विचालयत् स्यात् । विबुधैः स्फुटं प्रकटं तत् सावनसंज्ञं दिनं स्मृतम् । सदा सर्वस्मिन् काले प्रतिदिनं दिने दिने स्फुटभुक्तिमितिर्या भवति । कोऽर्थः । सूर्यः प्रतिदिनं स्पष्टां यावतीं गतीं गच्छेदित्यर्थः । सैव खरगभस्तिदिनं सूर्यदिनं स्मृतम् । खरास्तीक्ष्णा गभस्तयः किरणा यस्य स तस्य दिनमिति ॥ ५ ॥

अथ पूर्वार्धेन स्वस्वमासवर्षमानमाह ।

स्वमितिमाः स्वखवह्निमितैर्दिनै-
र्भवति माभिरिनैः स्वसमास्तथा ।
द्युनिशमैन्दवमासमिदं सदा
पितृषु चासितपक्षदलादितः ॥ ६ ॥

स्वमिति-इति । स्वखवह्निमितैर्निजशून्यराम-३०प्रमितैर्दिनैः कृत्वा स्वमितिमाः स्वकीयमासो भवति । मासशब्दोऽकारान्तो हलन्तश्च । "मास्तु मासे निशाकरे" इति 'हैमः' । तथा इनैर्मार्त्तण्डैर्द्वादशभिर्माभिः स्वकीयमासैः स्वसमाः स्वकीयवर्षं भवति । मासशब्दोऽत्र बहुवचनान्तः । अत्र सर्वत्र स्वशब्दग्रहणाद्यथा त्रिंशद्दिनैः सूर्यस्य मासः स्यात् तथा तेन षण्मासेन देवानां दिनं तैस्त्रिंशन्मितैर्दिनैर्मास इत्यादि । एवं सर्वेषामपि स्वकीयमानेन ज्ञेयम् । अथोत्तरार्धेन पैत्रदिनमाह । च पुनः पितृषु पूर्वजेषु असितपक्षदलादितः कृष्णपक्षदलप्रतिपत्तः सदा ऐन्दवमासमितं चान्द्रमासप्रमितं द्युनिशमहोरात्रं भवति । पितॄणां कृष्णपक्षो दिनं शुक्लपक्षो रात्रिरित्यर्थः ।

यतः—

"उदेति सूर्यः खलु कृष्णखण्डे दिनोदयः स्यात् पितृणां दिनार्धम् ।
दर्शेऽस्तमेत्यर्क इतीह शौक्ले दले च सन्ध्या पितृणां निशैवम्" ॥

अन्यत् 'सिद्धान्तशिरोमणौ'—

"विधूर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे दर्शे यतः स्याद्द्युदलं तदैषाम् ॥
भार्धान्तरत्वान्न विधोरधःस्थं तस्मान्निशीथः खलु पौर्णमास्याम् ।
कृष्णे रविः पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम्"-इति ॥

कृष्णपक्षाष्टमीतो दिनं शुक्लपक्षाष्टमीतो रात्रिरिति सिद्धान्तः । तथा च प्रतिपत्त इति व्याख्यानं चिन्त्यमिति ॥ ६ ॥

अथ वसन्ततिलकया गुरुमानमाह ।

माने गुरोरगभिदः परिवत्सराणां
षष्टिः स्मृता मुनिवरैः प्रभवादिकानाम् ।
स्यादेकवत्सरमितिर्गुरुमध्यमैक-
राशेस्तु भोगमितिरेव सदा तथा हि ॥ ७ ॥

माने-इति । अगान् पर्वतान् भिनत्ति छिनत्ति इत्यगभित् तस्यागभिदो वज्रिणो गुरोर्बृहस्पतेर्माने मुनिवरैः प्रभवादिकानां परिवत्सराणां षष्टिः स्मृता । 'संपर्येतद्भ्योऽग्रे वत्सर'-इति 'अभिधानचिन्तामणिः' । तु पुनर्गुरुमध्यमैकराशेर्भोगप्रमाणमेकवत्समेकवर्षप्रमाणं सदैव स्यात् तथा हि ॥ ७ ॥

अथानुष्टुभामष्टकेन षष्टिसंवत्सराणां नामान्याह ।

प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखो भावो युवा धात्रीश्वराभिधौ ॥ ८ ॥
बहुधान्यः प्रमाथी च विक्रमो वृषसंज्ञकः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवोऽव्ययः ॥ ९ ॥
सर्वजित् सर्वधारी च विरोधी विकृतस्ततः ।
खरनन्दनसंज्ञौ तु विजयो जयमन्मथौ ॥ १० ॥
दुर्मुखस्तदनु प्रोक्तो हेमलम्बकसंज्ञकः ।
विलम्बाख्यो विकारी स्याच्छर्वरीप्लवसंज्ञकौ ॥ ११ ॥
उक्तः शुभकृतस्तस्मादब्दः शोभनकृत् स्मृतः ।
क्रोधी विश्वावसुर्ज्ञेयो वत्सरो हि पराभवः ॥ १२ ॥
प्लवङ्गः कीलकाख्योऽथ सौम्यः साधारणाह्वयः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततो विरोधकृन्नामा परिधाविप्रमाथिनौ ॥ १३ ॥
आनन्दो राक्षसः प्रोक्तः नलः पिङ्गलसंज्ञकः ।
कालमुक्ताख्यसिद्धार्थौ रौद्रो दुर्मतिदुन्दुभी ॥ १४ ॥
रुधिरोद्गारिरक्ताक्षौ क्रोधनः क्षयकृत् स्मृतः ।
वत्सराणां गुरोर्मानेऽयं षष्टिरुदाहृता ॥ १५ ॥

प्रभव-इत्याद्यारभ्याष्ट श्लोकाः सुगमाः ॥ १५ ॥

अथ वंशस्थेन गतवत्सरानाह ।

नगैर्नखैः संनिहतो द्विधैकः
सखत्रिशक्रोऽक्षयमाङ्गभाजितः ।
गताः सतल्लब्धशकोऽभ्रषड्हृतो-
ऽवशेषके स्युः प्रभवादिवत्सराः ॥ १६ ॥

नगै-इति । शको द्विधा स्थाप्यते । तयोर्मध्ये य उपरिस्थशको यः स नगैः सप्तभिर्गुण्यतेऽधस्तनवर्त्ती यः शकः स नखैर्विंशत्या संनिहतो गुणितः । ततो विंशतिगुणितशकं षष्ट्या विभजेदुपरि सप्तघ्नशके संयोजयेत् । इति श्लोकेऽस्पष्टमपि ज्ञेयम् । अन्यथा ग्रन्थविरोधो भवेत् । पश्चात् स सखत्रिशक्रः सह खत्रिशक्रेण वर्त्तते यः स त्रिंशदधिकचतुर्दशशतसहितः क्रियते पुनः पश्चात् सोऽक्षयमाङ्गभाजितः पञ्चविंशत्यधिकषट्शतेन हृतः । पुनः पश्चात् सतल्लब्धशकस्तस्माल्लब्धं तल्लब्धं तल्लब्धेन सह वर्त्तते यः स सतल्लब्धः स तल्लब्धश्चासौ शकश्च सतल्लब्धशकः । कोऽर्थः । सप्तघ्नशकाद्धरभक्ताद्यल्लब्धं तत्केवलशके योज्यते इत्यर्थः । पश्चात् सतल्लब्धशकोऽभ्रषड्हृतः षष्ट्या ह्रियतेऽवशेषके प्रभवादिवत्सरा गताः स्युरित्यर्थः ।

अत्रोदाहरणम् ।

यथा शको१६३३द्विस्थाने स्थाप्यः । उपरि सप्तभिर्गुणिते जातः११४३१ । पश्चादधःस्थापितशको विंशत्या गुणितस्तदा एवं जातः३२६६० । एनं षष्ट्या विभज्य लब्धं५४४।२० सप्तघ्नशके संयोज्य जातम्११९७५।२० । पश्चात् त्रिंशदधिकचतुर्दशशतेन युक्तः क्रियते तदा एवं जातम्१३४१५।२० । पश्चात् पञ्चविंशत्यधिकषट्शतेन भाजितस्ततो लब्धं फलम्२१ । शेषम्२८०।२० । लब्धं फलम्२१ । केवलशकमध्ये१६३३योज्यते तदैवं जातोऽयं१६५४ षष्ट्या हृतः शेषम्३४ । तत्प्रमाणाश्चतुस्त्रिंशत्प्रमिता वत्सरा गतास्ततः प्लवनाम संवत्सरः पञ्चत्रिंशत्तमो वर्त्तमानो भवतीति 'रत्नमाला'ऽऽद्यानीतसम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एव। शेषतोऽपि 'रत्नमाला'ऽऽद्युक्त्या वर्त्तमानवत्सरस्य भुक्तमासादिकं च भवेदिति स्पष्टं विदाम् ॥ १६ ॥

अथोपजात्याऽयनाभ्यां दिवौकसां रात्रिदिनमाह ।

अथायने कीटमृगादिषट्के क्रमेण ते दक्षिणसौम्यसंज्ञे ।
तमीदिने सायनभागभास्वदुत्थे स्फुटे नाकसदामुभे स्तः ॥१७॥

अथ-इति । क्रमेण दक्षिणसौम्यसंज्ञे कीटमृगादिषट्के अयने । कोऽर्थः । द्वन्द्वे प्रत्येकसंयोजनात् कीटादिषट्कं कर्कादिषट्कं दक्षिणायनं मृगादिषट्कं मकरादिषट्कमुत्तरायणम् । ते उभे कर्त्तृपदे । नाकसदां दिवौकसां तमीदिने रात्रिदिवसे स्फुटे प्रकटे स्तो भवतः । किंलक्षणे ते । दक्षिसायनभागभास्वदुत्थे । अयनांशसहितो यो भास्वान् रविस्तस्मादुत्थे प्रादुर्भूते कर्कादिदक्षिणायनं देवानां रात्रिः । मकराद्युत्तरायणं दिनमिति सोमः स्वाम्यस्या इति सौम्या उत्तरा । तस्यां जातं सौम्यमयनमिति ॥१७॥

अथोपजात्याऽयनांशकमाह ।

शाकः शराम्भोधियुगोनितो हृतो
मानं खतर्कैरयनांशकाः स्मृताः ।
नोक्तं मया वा व्यवहारिकत्वतो
मनोर्जगत्कर्त्तुरथेहमत्कृतौ ॥ १८ ॥

शाकः-इति । शराः पञ्च । अम्भोधयश्चत्वारः । युगाश्चत्वारः । तैरूनित ऊनीकृतो यः शाकः पुनः खतर्कैः षष्ट्या हृतो यल्लब्धं तेऽयनांशकाः । शेषं तत्कलाश्च स्मृताः । अथानन्तरे मया इह मत्कृतौ ग्रन्थे मनोर्मानं च पुनर्जगत्कर्त्तुर्ब्रह्मणोमानं नोक्तम् । अव्यवाहारादिकत्वतस्तस्य व्यवहारो हि लोके नास्ति ॥ १८ ॥

अथ वसन्ततिलकेनायनफलमाह ।

चौलोपयाममखमेखलबन्धकूप-
भूपाभिषेकगृहसंवसथादिकानाम् ।
आरम्भ उष्णमरि*चावयने हि सौम्ये
स्यादन्यथा कविगुरूदयगे न शस्तः ॥ १९ ॥

चौलोपयाम-इति । हीति निश्चितम् । सौम्येऽयने उत्तरायणे । उष्णमरिचौ रवौ सति चौलादिकानामारम्भ उपक्रमः स्यादित्यर्थः । चौलं मुण्डनकर्म । उपयामो विवाहः ।

* मरीचावित्यत्र मरिचावित्यनुसन्धेयः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मखो यज्ञः । मेखलबन्धो मौञ्जीबन्धः । कूपाभिषेकः कूपप्रतिष्ठा । भूपाभिषेकः । द्वन्द्वे प्रत्येकसंयोजनत्वात् । गृहं गेहम् । संवसथो ग्राम इत्यादयः । एवमेतेषां द्वन्द्व इति ।

"ग्रामस्तु वसथः सन्निप्रतिपर्युपतः परः"-इति 'अभिधानचिन्तामणिः' ।

अन्यथेति पूर्वोक्तव्यतिरेककोऽर्थः । दक्षिणायनेऽर्के सति चौलोपयामादिकानामारम्भो न शस्तो न प्रशस्तः । किम्भूते कविगुरूदयगे शुक्रबृहस्पत्युद्गमं प्राप्ते सत्यपि । उष्णमरिचावित्यत्र रकारमध्ये ह्रस्व इकारोऽत्र शब्दभेदाद्दृश्यते ॥ १९ ॥

अथोपजात्या षड्ऋतूनाह ।

सौम्यायनात् स्याच्छिशिरो मधुस्ततो
निदाघकोऽपागयनाननात् क्रमात् ।
वर्षाः शरत् स्युर्हिमसङ्ग्वानिति
द्युरात्रके षड् ऋतवो दिवौकसाम् ॥ २० ॥

सौम्येति । सौम्यायनादुत्तरायणाच्छिशिरस्ततो मधुर्वसन्तस्ततो निदाघो ग्रीष्मः । क्रमेण ऋतुः स्यात् । अपागयनाननाद्दक्षिणायनमुखात् क्रमेण वर्षास्ततः शरत् ततो हिमसङ्ग्वान् हेमन्त ऋतुः स्यात् । इत्येते पूर्वोक्ताः षड्ऋतवो दिवौकसां देवानां द्युरात्रकेऽहोरात्रके काले स्युः ॥ २० ॥

अथोपजात्याऽसन्मतमपाकरोति ।

मानेन कश्चिद्धिमरोचिषो मधो-
र्मध्वाननानेवमृतूनभाषत ।
मासैस्तु सार्धैं रदनैर्यदाऽधिको
मितैस्तदेतत् किमतो भवेदसत् ॥ २१ ॥

मानेनेति । कश्चित् तज्ज्ञो हिमरोचिषश्चन्द्रस्य मानेन मधोश्चैत्रान्मध्वाननात् मधुर्वसन्त आननं मुखमेषां ते तानृतूनेवमभाषताकथयत् । तुरित्यवधारणे । यदा रदनैर्मितैर्द्वात्रिंशत्प्रमितैर्मासैः सार्धैः पक्षसहितैः पञ्चषष्टिप्रमितपक्षैरधिको मासो भवेत् । तत् किं क्रियते । अत एतन्मतमसत् ॥ २१ ॥

अथ वसन्ततिलकया केषु केषु कर्मसु किं किं मानं ग्राह्यं तदाह ।

तिथ्यर्धमुण्डनकरग्रहपितृ*कर्म-
यात्राव्रतोपवसनाद्यखिलक्रियासु ।

---

* अत्र 'पैत्रकर्म' इति छन्दोऽनुरोधः पाठः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्राह्यं बुधैरनिशमैन्दवमानमेव
नाड्यादिकं भवति चाखिलमार्क्षमानात् ॥ २२ ॥

तिथ्यर्धेति । बुधैरनिशं निरन्तरं तिथ्यर्धाद्यखिलक्रियास्वैन्दवमानं चान्द्रमानमेव ग्राह्यम् । तिथ्यर्धं करणम् । मुण्डनं चौलादि । करग्रहो विवाहः । पितृकर्म पूर्वजकर्म । यात्रा प्रयाणम् । व्रतमुपनयनम् । उपवसनमुपवासः । इत्यादि येषां तानि तेषां द्वन्द्वे । एषामखिलक्रियासु च पुनर्नाड्यादिकं घट्यादिकमानमार्क्षमानान्नाक्षत्रमानाद्भवति । पूर्वोक्ततिथ्यर्धादिक्रियासु ॥ २२ ॥

अथ सौरसावनविवेकमाह ।

वर्षायनर्त्तुयुगपूर्वकमेव देव-
मानादिमानमखिलं किल सौरमानात् ।
स्यात् कृच्छ्रसूतकचिकित्सितवासराद्यं
भुक्त्यादिकं दिविषदां खलु सावनाच्च ॥ २३ ॥

वर्षायनर्त्तुयुगपूर्वकमिति । किलेति संभावनायाम् । वर्षादिपूर्वकं देवमानादिमानमखिलं सकलं सौरमानादेव स्यात् । वर्षं संवत्सरः । अयनं प्रतीतम् । ऋतुः शिशिरादिः । युगं सत्ययुगादिकम् । एतानि पूर्वं यस्मिँस्तत् । खलु निश्चितम् । कृच्छ्रादिकं दिविषदां ग्रहाणां भुक्त्यादिकं च मानं सकलं सावनादेव भवेत् । भुक्तिः स्पष्टगतिः । कृच्छ्रं चान्द्रायणादि । यतः

"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात् कृच्छ्रं सान्तपनं स्मृतम्" ॥

कृच्छ्रं सान्तपनादिकमित्यभिधा । सूतकं जन्ममरणगतम् । चिकित्सितं वैद्यकर्म । वासरं दिनम् । इत्याद्यं यस्मिँस्तत् दिविषदामित्यलुक् समासः ॥ २३ ॥

अथोपजातिकयैकवर्षमध्ये चन्द्रदिनसंख्यामाह ।

वर्षैकमध्ये शशिनो दिनानि
हिमांशुसप्ताग्निमितानि तज्ज्ञाः ।
सार्धद्विबाणाम्बुपलैर्युतेन
घटीत्रयेणैव युतान्यथाहुः ॥ २४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वर्षैकेति । तज्ज्ञा दैवज्ञा वर्षैकमध्ये शशिनश्चन्द्रस्य सार्धद्विबाणाम्बुपलैस्त्रिंश-दक्षरान्वितद्विपञ्चाशत्पलै-५२।३० र्युतेनैवंविधेन घटीत्रयेण युतानि युक्तानि हिमांशु-सप्ताग्निमितानि एकसप्तत्यधिकशतत्रयप्रमितान्येवं विधानि ३७१ दिनान्याहुः कथ-यन्ति ॥ २४ ॥

अथोपजात्या भदिनसावनदिनसंख्यामाह ।

भवासरास्तत्र रसाङ्गरामाः
सार्धद्विदस्रान्वितखाग्नितुल्यैः ।
पलैर्युताभिस्तिथिनाडिकाभि-
र्युक्ता विधूना रविसावनाः स्युः ॥ २५ ॥

भवेति । तत्र वर्षैकमध्ये सार्धद्विदस्रान्वितखाग्नितुल्यैः पलैस्त्रिंशद्व्यक्षरान्वित-द्वात्रिंशदक्षराधिकत्रिंशत्पलैर्युताभिर्युक्ताभिरेवंविधाभिस्तिथिनाडिकाभिः पञ्चदशप्रमि-तघटिकाभि-१५।३०।२२।३० र्युक्ता रसाङ्गरामसंख्याः षट्षष्ट्यधिकशतत्रयप्रमिता३६६ भवासरा नक्षत्रदिनाः स्युः । तेन नक्षत्रवासरा विधूनाः । विधुश्चन्द्रः । तेन ऊना हीना एकेन न्यूनीकृता रविसावनवासराः स्युः ॥ २५ ॥

अथोपजात्या सौरदिनसंख्यामाह ।

सौराः नभोगाग्निमिता हि वासराः
स्मृता बुधैः सर्वसु कर्मसु ध्रुवम् ।
यत् सौरचान्द्रान्तरमेकहायने-
ऽधिकं तदेवाव्यवहारिकं भवेत् ॥ २६ ॥

इति कविकालिदासोदिते ज्योतिर्विदाभरणे कालमानाध्यायः प्रथमः।

सौरा-इति । ध्रुवं निश्चितम् । सर्वेषु कर्मसु समस्तशुभकार्येषु बुधैर्नभोगाग्निमिताः षष्ट्यधिकशतत्रयप्रमिताः३६९ सौरा वासराः सौरदिनाः स्मृताः । एकहायने एकवर्षे सौरचान्द्रान्तरं यदधिकं स्यात् तदधिकमेवाव्यवहारिकं भवेत् । क्षयाधिककाले शुभ-कार्यं न स्यादित्यर्थः ॥ २६ ॥

इति श्रीपौर्णमीयगच्छाधिराजभट्टारकपुरन्दरश्रीमहिमाप्रभुसूरीश्वरचरणसरोरुह-चञ्चरीकायमाणभावरत्नविरचितायां कालिदासकृतज्योतिर्विदाभरणस्य सुबोधिकायां मानाध्यायः प्रथमः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नव्यः श्रीश्रितमहिमाप्रभाख्यसूरेः सर्वत्रास्खलनतया प्रबोधपूषा ।
पुष्णात्युग्रतरतमःकुले कुवादियूकानां तदपि न चित्रमत्र लोके ॥ १ ॥

अथ द्वितीयाध्यायं प्रथमं शालिनीवृत्ताष्टकेनाह ।

तावत् सर्वेषामसौम्याखलानां
पञ्चाङ्गेभ्योऽनेककृत्याङ्गकालम् ।
वक्ष्येऽथाहं चोपपत्तिं प्रवक्तुं
लोकानामग्रे युजामेव संज्ञाम् ॥ १ ॥

तावदिति । अथान्तरं तावदादौ अहं पञ्चाङ्गेभ्यस्तिथिवारादिभ्यः सकाशात् युजां योगानां कर्कियमघण्टादीनां संज्ञामाह । च पुनरुपपत्तिमुद्भवं सम्यग्ज्ञानं वा वक्ष्ये कथयिष्यामि । किं कर्तुम् । लोकानामग्रेऽनेककृत्याङ्गकालं बहुविधविवाहादिकार्याणामङ्गानि तदवयवभूतानि तेषां कालं समयं प्रवक्तुं कथनार्थम् । किम्भूतानां युजाम् । सर्वेषां समग्राणाम् । पुनः कथम्भूतानाम् । असौम्येति । असौम्याः पापाश्च तेऽखलाः सौम्याश्च ते तेषाम् ।

".....अङ्गमन्तिकगात्रयोः ।
"उपसर्जनभूते स्यादभ्युपायप्रतीकयोः"-इति 'हैमः'" ॥ १ ॥

अथ प्रथमं तिथिसंज्ञामाह ।

नन्दा भद्राख्या जया चेति रिक्ता
पूर्णा सर्वाः पक्षतेः स्युः क्रमेण ।
शुक्लेऽथान्या नेष्टमध्योत्तमास्तु
व्यस्ताः कृष्णेऽपास्य रिक्तां हि सौम्याः ॥ २ ॥

नन्देति । पक्षतेः प्रतिपत्तः सकाशात् सर्वास्तिथयो नन्दादिपञ्चसंज्ञाः स्युः । च कारः समुच्चयार्थः । कोऽर्थः । प्रतिपत्षष्ठ्यैकादश्यो नन्दा । द्वितीयासप्तमीद्वादश्यो भद्राख्या । तृतीयाष्टमीत्रयोदश्यो जया । चतुर्थीनवमीचतुर्दश्यो रिक्ता । पञ्चमीदशमीपञ्चदश्यः पूर्णा इति नामसदृक्फलाः । अथ शुक्लपक्षे ता नन्दादितिथयो नेष्टमध्योत्तमाः स्युः । कृष्णपक्षे व्यस्ता विपरीताः स्युः । अयं भावार्थः । शुक्लपक्षे नन्दादिपञ्चसु आद्या प्रतिपद्द्वितीयातृतीयाचतुर्थीपञ्चमीरूपा प्रपञ्चतयी नेष्टा । एवं द्वितीया पञ्चतयी मध्या । तृतीया पञ्चतयी उत्तमा । कृष्णपक्षे आद्या पञ्चतयी उत्तमा । द्वितीया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पञ्चतयी मध्या । तृतीया पञ्चतयी नेष्टा इति । हि इति युक्तार्थे । रिक्तामपास्य हित्वाऽन्याः सर्वास्तिथयः सौम्याः शुभाः स्युः । यतः सामान्येन रिक्तादिनवर्जं प्राय आशु शुभकृत्यं कुर्यादित्यर्थः ॥ २ ॥

अथैता एव वारसिद्धा आह ।

वारे नन्दा पूर्वदेवार्चिताङ्घ्रे-
भद्रा विद्यारे जया सैनिरिक्ता ।
पूर्णा गीर्वाणेशवन्द्येऽखिलेषु
कर्मस्वेवं दोषवत्यस्ति सिद्धा ॥ ३ ॥

वार इति । पूर्वदेवा दैत्याः । "पूर्वदेवाः शुक्रशिष्याः" इत्यभिधानम् । तैरर्चितौ वन्द्यौ अङ्घ्रे पादौ यस्य स शुक्रस्तस्य वारे नन्दा दोषवती दोषयुक्ताऽपि सिद्धा सिद्धिकृदस्ति । केषु । अखिलेषु समस्तेषु कर्मसु कार्येषु । एवममुना प्रकारेण विदि बुधवारे भद्रा । आरे भौमे जया । इनस्य सूर्यस्यापत्यमैनिः शनिः । सह ऐनिना वर्त्तते या सा सैनिः सैनिश्चासौ रिक्ता च सैनिरिक्ता । गीर्वाणां देवानामीश इन्द्रस्तस्य वन्द्यो गुरुस्तस्य वारे पूर्णा "इनः स्वामिसूर्ययोः"-इति 'कोषः' ॥ ३ ॥

अथैता एव भौमादिवारे नष्टा आह ।

सर्वारम्भेषूर्विदायादभान्वो-
र्नन्दा गुर्विन्द्वोश्च भद्रा*जया ज्ञे ।
रिक्ता धिष्ण्ये हेलिसूनौ हि पूर्णा
ज्ञेया याम्यागारदा कालविद्भिः ॥ ४ ॥

सवति । कालविद्भिर्दैवज्ञैः सर्वारम्भेषु सर्वकार्यप्रारम्भेषु उर्विदायादभान्वोः । उर्व्या भूमेर्दायादः पुत्रो भौमः स च भानुश्च तयोर्मङ्गले रवौ च नन्दा तिथिर्याम्यागारदा । यमस्येदं याम्यं तच्चागारं गृहं तद्ददातीति मृत्युदा ज्ञेया । च समुच्चयार्थः । एवं सर्वत्रापि योज्यम् । गुर्विन्द्वोः । गुरौ चन्द्रे च भद्रा । ज्ञे बुधे जया । धिष्ण्ये शुक्रे रिक्ता । हेलिसूनौ सूर्यसुते पूर्णा इति । "दायादौ सुतसपिण्डौ"-इति 'हैमोऽनेकार्थः' । "धिष्ण्योऽग्नौ शुक्रे च"-इति तत्रैव ॥ ४ ॥

---

* अन्यत्र सर्वत्र "गुरौ रिक्ता भृगौ भद्रा मृत्युदा"-इति निपुणैर्विभाव्यम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ पक्षरन्ध्रतिथीराह ।

द्व्याशातुल्ये पक्षरन्ध्रं तिथिः स्या-
द्युग्माऽपास्यामातिथिश्चाप्ययुग्मा ।
तासां सौम्या गोमितं प्रोह्य सर्वाः
शस्ताः सर्वासु क्रियास्वेव घस्रम् ॥ ५ ॥

द्व्याशेति । युग्मा समसंख्या तिथिः पक्षरन्ध्रमिति नाम स्यात् । किं कृत्वा । तासां समतिथीनां मध्ये द्व्याशातुल्ये । द्वौ । आशा दिक् । ताभ्यां तुल्ये द्वितीयादशम्यौ तिथी अपास्य त्यक्त्वा । च पुनरेवमयुग्माऽपि विषमसंख्याऽपि अमाऽमावास्या पक्षरन्ध्रं स्यात् । अत्र पक्षरन्ध्रं गोमितं घस्रं नवमीं च प्रोह्य विहाय सर्वाः सौम्यास्तिथयः सर्वासु क्रियास्वेव सर्वकार्येषु शस्ताः शुभाः स्युः । अत्र यद्यपि पक्षरन्ध्रमध्ये नवमी नोक्ता कार्ये निषिद्धा तथाऽपि ग्रन्थान्तरे प्रोक्ता । पक्षच्छिद्राणि यदाहुः ।

"षष्ठ्यष्टमी चतुर्थी चतुर्दशी द्वादशी कुहू नवमी ।
पक्षच्छिद्राण्याहुर्लभते नैतेषु संसिद्धिम्" ॥ ५ ॥

अथ कर्कियोगमाह ।

योगः कर्कीसंज्ञकोऽथो तिथेस्तद्व-
वारस्येत मानयोगेऽनिशं स्यात् ।
विश्वाभिन्ने सूरिभि र्गर्हितोऽयं
यानोद्वाहाद्येषु कार्येषु नूनम् ॥ ६ ॥

योग इति । अथोऽनन्तरमनिशं सदा कर्कीसंज्ञको योगः स्यात् । कस्मिन् सति विश्वाभिन्ने त्रयोदशसंख्यावच्छिन्ने । तिथेस्तद्वारस्य । तस्यास्तिथ्या वारस्तद्वारस्तस्य च मानयोगे इते प्राप्ते सति । अयमभिप्रायः । यावत्संख्या तिथिर्यावत्संख्याको वारस्तयोः संख्यामेलने त्रयोदश स्यात् तदाऽयम् । यथा च द्वादश्यां रविस्तदा कर्की स्यात् । एवमेकादश्यां चन्द्रः । दशम्यां मङ्गलः । नवम्यां बुधः । अष्टम्यां गुरुः । सप्तम्यां शुक्रः । षष्ठ्यां शनिरिति । अयं योगो नूनं सूरिभिः प्राज्ञैर्यानोद्वाहाद्येषु प्रयाणविवाहादिषु कार्येषु गर्हितस्तिरस्कृतः ॥ ६ ॥

अथ संवर्त्ताख्ययोगमाह ।

संवर्त्तः स्यादत्रिदृग्जातसूनोः
स्तिथ्यां चारं पक्षमूलाश्रितायाम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सप्तम्यामेशुर्यदायं क्रियासु
प्राज्ञैर्योगो वर्जनीयोऽखिलासु ॥ ७ ॥

संवर्त्त इति । यदा पक्षमूलाश्रितायाम् । पक्षमूलं पक्षतिः । तामाश्रितायां तिथ्यां प्रतिपत्तिथौ । अत्रिदृग्जातसूनुः । अत्रेर्दृग्भ्यां जातो विधुस्तस्य सूनुर्बुधः स्यात् । च पुनर्यदाऽंशुः सूर्यः सप्तम्यां स्यात् तदा संवर्त्ताख्ययोगः स्यात् । प्राज्ञैरयं शीघ्रमखिलासु क्रियास्वयं योगो वर्जनीयो हेयः ॥ ७ ॥

अथ क्रूराक्रान्ततिथीराह ।

देयान्मेषात् पक्षतेः राशिचक्रे
पूर्णां मुक्त्वा चाखिला या क्रमेण ।
स्यात् सा तद्वत् पूर्णतिथ्यङ्घ्रयोऽत्र
क्रूराक्रान्ता सर्वकर्मस्वनिष्टा ॥ ८ ॥

देया इति । अत्र राशिचक्रे सुधीर्मेषाच्च पुनः पक्षतेः प्रतिपत्तः सकाशात् क्रमेणाखिलास्तिथीर्देयात् स्थापयेत् । किं कृत्वा पूर्णां मुक्त्वा । या तिथिः क्रूराक्रान्ता क्रूरग्रहैराक्रमिता स्यात् । सा सर्वकर्मस्वनिष्टदा दोषदा स्यात् । च पुनस्तद्वत् तिथिवत् पूर्णतिथ्यङ्घ्रयः पञ्चमीदशमीपौर्णमासीनां चरणाः स्थाप्याः क्रूरग्रहैर्योऽङ्घ्रिराक्रमितः सोऽप्यनिष्टः स्यादित्यर्थः ॥ ८ ॥

अथ शार्दूलविक्रीडितेन दग्धतिथीराह ।

ध्वान्तध्वंसविधिर्बलाहकरसागारालयं चेति वा
कोदण्डं हरमौलिसंस्थितकला दग्धा द्वितीया तदा ।
ज्ञेयैकान्तरराशिगेऽम्बरमणावेकान्तरैवं तिथि-
र्दग्धाऽतो भवति क्रमेण सकलारम्भेषु नेष्टप्रदा ॥ ९ ॥

ध्वान्तेति । ध्वान्तध्वंसविधिः । ध्वान्तध्वंसमन्धकारविनाशं विदधाति सृजति इति विधिः । विध-विधाने धातो रूपम् । अथ वाऽन्धकारविनाशो विधीयतेऽनेनेति विधिरन्धकारभ्रंशविधानो रविः । बलाहेति । बलाहको मेघस्तस्य रसेषु जलेषु आगारं गेहं यस्य स मीनस्तस्य आलयो राशिस्तम् । बलाहकरसागारर्क्षकमित्यपि पाठः । बलाहकरसेषु आगारं यस्य स मीनश्चासावृक्षको राशिश्चेत्यर्थः । तमेति प्राप्नोति । "घनरसो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यादोनिवासोऽमृतम्"-इति 'हैमः'। च पुनः वाऽथ वा रविः कोदण्डं धनूराशिमेति तदा हरमौलिसंस्थितकला द्वितीया तिथिर्दग्धा स्यात्। हरमौलौ स्थिता कला इव कला यस्याः सा द्वितीयातिथिर्दग्धेति। अनेन विशेषेणेन शम्भुमूर्धस्थितकलाप्रमितचन्द्रेणोपलक्षितेति। विशिष्टवाचकानां पदानां पृथग् विशेषेणसमवधाने विशेष्यमात्रपरता द्वितीयेति। "स कीचकैर्मारुतपूर्णरन्ध्रैः"-इत्यादिवत्। मीनार्के धनुरर्के च द्वितीया दग्धेति स्पष्टार्थः। एवमनुना प्रकारेण मीनराशितो धनूराशित एकान्तरराशिगेऽम्बरमणौ सूर्ये सति द्वितीयात एकान्तरा तिथिर्दग्धा ज्ञेया। स्पष्टमाह। वृषकुम्भे चतुर्थी। मेषकर्के षष्ठी। मिथुनकन्येऽष्टमी। सिंहवृश्चिके दशमी। तुलामकरे द्वादशीति। यदुक्तम् 'आरम्भसिद्धौ'।

"दग्धाऽर्केण धनुर्मीने वृषकुम्भेऽजकर्किणि।
द्वन्द्वकन्ये मृगेन्द्रालौ तुलैणे द्व्यादियुक्तिथिः"-इति॥

अतः कारणाद्दग्धा तिथिः सकलारम्भेषु नेष्टप्रदा वाञ्छितदायिनी न भवति॥९॥

अथ शार्दूलविक्रीडितेन प्रतिपदादितिथीनां संज्ञामाह।

वृद्धिर्मङ्गलदा बला त्वथ खला लक्ष्मीवती स्याद्यशा-
मित्राख्या निजनामप्रख्यफलदा तद्वद्बलोग्राह्वया।
सौम्याऽऽनन्दप्रदा यशोगुणवती तस्माज्जयोग्राह्वया
सौम्याख्या तिथितस्त्विमा निगदिताः संज्ञा बुधैः पक्षतेः॥१०॥

वृद्धिरिति। बुधैः पक्षतेः प्रतिपत्तस्तिथितो निजनामप्रख्यफलदा नामतुल्यफलदा इमाः संज्ञा निगदिताः कथिताः। प्रतिपदः वृद्धिरिति संज्ञा। क्रमादेवं द्वितीयादितिथीनां मङ्गलदादिसंज्ञा ज्ञेया इति स्पष्टम्।

"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः"-इति 'हैमः'।

अत्र प्रख्य प्रसङ्गिवर्णत्वेऽपि प्रान् पूर्वो मकारो न दीर्घो लघुप्रयत्नत्वात् इति छन्दःशास्त्रोक्तं तेन छन्दोभङ्गो नेति॥१०॥

अथो वसन्ततिलकेन्द्रवज्राभ्यामष्टाविंशतिनक्षत्राणामीशानाह।

अथोच्यते दस्रभतो भनायको
दस्रौ यमो वह्निकसोमशम्भवः।
मयाऽदितीज्योरगपूर्वजा भगो-
र्यमोष्णकृत्त्वष्टृसमीरणाह्वयाः॥११॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वृत्रासुरप्राणहर*कृपीटजौ
मित्रो मरुत्वानथ यातु पुष्करम् ।
विश्वे विधिर्विष्णुवसुप्रचेतस-
श्चाजाङ्घ्रिहिर्बुध्न्यविदन्तखेचराः ॥ १२ ॥

अथोच्यत इति । अथान्तरम् । मया दस्रभतोऽश्विनीनक्षत्रतो भनायका नक्षत्रस्वामिन एते उच्यन्ते । अ, दस्रौ अश्विनौ देववैद्यौ । द्विवचनान्तोऽयं शब्दः । भ, यमः । कृ, वह्निः । रो, को ब्रह्मा । मृ, सोमः । आ, शम्भू रुद्रः । पु, अदितिर्देवमाता । पु, ईज्यो गुरुः ।

"ईज्यः स्यात् सङ्गमे दाने योगेऽर्चायां गुरौ पुमान्"-इति कोषः ।
श्ले, उरगः । म, पूर्वजाः पितरः । पू.फा, भगो योनिः । उ.फा, अर्यमा सूर्यभेदः । ह, उष्णकृत् सूर्यः । चि, त्वष्टा विश्वकर्मा । स्वा, समीरणाह्वयो वायुनामा । वि, वृत्रासुरप्राणहरो वृत्रदैत्यारिरिन्द्रः । कृपीटजोऽग्निः । कृपीटं जलं तस्माद्योनिरुत्पत्तिर्यस्य स इति विग्रहः । "कृपीटयोनिर्दमुना"-इत्यभिधानम् । कृपीटं जलं "हेमशेषकोषे" । इमौ द्वावीशौ शक्राग्नी इत्यर्थः । विशाखाया आद्ये इन्द्रोऽपरेऽग्निर्देवता अत एवास्या द्विदैवतसंज्ञा मिश्रसंज्ञा च । अत एवोक्तं 'दैवज्ञवल्लभे'—

"पूर्वार्धे मृदुकर्म चास्य सफलं तीक्ष्णं द्वितीये दले"-इति ।

अ, मित्रः सूर्यभेदः । ज्ये, मरुत्वानिन्द्रः । मू, यातु राक्षसः । यातुशब्दः पुंनपुंशकः । पू.षा, पुष्करं जलम् ।

"पुष्करं द्वीपतीर्थाहिखगरागौषधान्तरे ।
तूर्यास्यसफले काण्डे शुण्डाग्रे खे जलेऽम्बुदे"-इति 'हैमः' ॥

उ.षा, विश्वे इति । विश्वाख्यास्त्रयोदशदेवताः । सर्वादित्वाज्जस इः । नन्वत्र संज्ञावाचिनो विश्वशब्दस्य कथं सर्वादित्वम् । 'असंज्ञायां सर्वादिः'-इति वचनात् । उच्यते । छान्दसोऽयं प्रयोगस्तेन संज्ञायामपि सर्वादित्वम् । अभि, विधिर्ब्रह्मा । श्र, विष्णुः केशवः । ध, वसवोऽष्टौ ।

यदुक्तम् ।

"धरो ध्रुवश्च सोमश्च आपश्चैवानलोऽनिलः ।
प्रत्यूषश्च प्रदोषश्च वसवोऽष्टौ प्रकीर्त्तिताः" ॥

---

* अत्र छन्दोभङ्गः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श, प्रचेता वरुणः । पू. भा, अजाङ्घ्रिर्वास्तुशास्त्रप्रसिद्धो हृदयकोष्ठस्थो देवः रुद्राणामन्यतमोऽजपादः । उ. भा, अहिर्बुध्न्यो रुद्रभेदः ।

यदाहुः ।

"अजपादोऽप्यहिर्बुध्न्यः पिनाकिहररैवताः ।
शम्भुः स्थाणुर्मृगव्याधः कपाली त्र्यम्बको भवः" ॥

इत्येकादशरुद्रनामानि । रे, विदन्तखेचरा इति । विगता नष्टा दन्ता रदा यस्य स चासौ खेचरश्च पूषेत्यर्थः । अयं च यज्ञे नष्टदन्तोऽभवदिति श्रुतिः । यतो दक्षाध्वरध्वंसने हि पूष्णो दन्ता महेश्वरेण पातिताः ।

यद्-'वामनपुराणे'—

"ततः क्रोधाभिभूतेन पूष्णो वेगेन शम्भुना ।
मुष्टिनाऽऽहत्य दशनाः पतिता धरणीतले"-इति ॥

पूषा रविभेदः । यदाहुः धातृ-अर्यमत्-मित्र-वरुण-अंशु-भग-इन्द्र-विवस्वन्-पूषन्-पर्जन्य-त्वष्टृ-विष्णु-संज्ञा द्वादश सूर्या इति । प्रयोजनं चैषां तद्देवतानाम्ना नक्षत्रव्यवहार इति । अत्र वह्निश्च कश्च सोमश्च शम्भुश्चैषां द्वन्द्व एते । अदितिश्च ईज्यश्च उरगश्च पूर्वजाश्चैषां द्वन्द्व एते । उष्णकृच्च त्वष्टा च समीरणाह्वयश्चैषां द्वन्द्व एते । विष्णुश्च वसवश्च प्रचेताश्चैषां द्वन्द्व एते । अजाङ्घ्रिश्च अहिर्बुध्न्यश्च विदन्तखेचरश्चैषां द्वन्द्व एते । चकारः समुच्चयार्थ इति समासादिकं स्वयमप्यूह्यम् ॥ ११-१२ ॥

अथोपजात्या स्थिरचरसंज्ञभान्याह ।

सनिर्जरज्येष्ठभमुत्तरात्रिकं
स्थिरं जगुश्चानिशमाद्यसूरयः ।
समारुतं सादितिभं गदाग्रज-
ज्योतिःश्रविष्ठाम्बुपभान्वितं चरम् ॥ १३ ॥

सनिर्जरेति । अनिशं निरन्तरम् । आद्यसूरयः पूर्वाचार्याः । सनिर्जरज्येष्ठभम् । निर्जरज्येष्ठो ब्रह्मा । "सुरज्येष्ठो विरिञ्चनः"-इति 'हैमः' । तस्य भं रोहिणी तेन सह वर्त्तमानमुत्तरात्रिकं स्थिरं स्थिरसंज्ञं जगुरूचुः । रोहिणी उत्तरफाल्गुनी उत्तराषाढा उत्तरभाद्रपदा इति भचतुष्कं स्थिरम् । च-पुनराद्यसूरयः समारुतं स्वातिसहितं सादितभं पुनर्वसुसहितम् । श्रविष्ठा धनिष्ठा । अम्बुपो वरुणस्तस्य भं शतभिषक् । आभ्यां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्वितं सहितम्। गदाग्रजो विष्णुस्तस्य ज्योतिर्भं श्रवणम्। विशेष्यकर्मपदं चरं चर-संज्ञं जगुरिति भपञ्चकं चरम्।

"ज्योतिर्दिनाधिपे वह्नौ नक्षत्रेऽक्षिप्रकाशयोः"-इति 'महीपः' ॥ १३ ॥

अथोपजात्या मृदुलघुनक्षत्राण्याह।

मनीषिणो निर्जरवर्द्धकीन्दुभे
समित्रपौष्णे मृदुसंज्ञके विदुः।
दास्राभिजिद्धंससुरेज्यदैवता-
न्यथो लघुनीह पुराणविग्रहाः ॥ १४ ॥

मनीषिण इति। मनीषिणः पण्डिताः। समित्रपौष्णे अनुराधारेवतीयुक्ते निर्जरवर्द्धकीन्दुभे निर्जराणां देवानां वर्धकी सूत्रधारो विश्वकर्मा तस्य भं चित्रा। इन्दुर्भं मृगशिरः। द्वन्द्वे कृते ते भे कर्मपदे मृदुसंज्ञके विदुरवधारयन्ति। इति भचतुष्कं मृदुसंज्ञम्। अथोऽनन्तरम्। पुराणविग्रहाः पुरातनशरीरा वृद्धा इहाधिकारे। दस्रौ अश्विनी। अभिजित्। हंसो रविस्तस्य भं हस्तः। सुरेज्यो गुरुर्दैवतं यस्य तद्भं पुष्यः। एषां द्वन्द्वे। एतानि लघूनि विदुर्जानन्ति। इदं भचतुष्कं लघु। "पुराणं प्रत्नशास्त्रयोः"-इति 'हैमः'। "ब्रध्नो हंस"-इति हैमः ॥ १४ ॥

अथोपजात्या तीक्ष्णोग्रभान्याह।

सरिद्वाराकार्द्रकपर्दभोगिनो-
र्भाभ्यां युते गोपतिनैकषेयभे।
तीक्ष्णाह्वयेऽथान्तकपित्र्यभान्वितं
पूर्वात्रयं चोग्रमुशन्ति कृष्टयः ॥ १५ ॥

सरिद्वरेति। कृष्टयः पण्डिताः। सरितां नदीनां मध्ये वरा गङ्गा तस्याः कानि जलानि तैरार्द्रः क्लिन्नः कपर्दो जटाजूटो यस्य स रुद्रश्च भोगी सर्पश्च तयोर्भाभ्यामार्द्राश्लेषाभ्यां युते युक्ते एवंविधे। गोः स्वर्गस्य पतिरिन्द्रः। निकषाया अपत्यं नैकषेयो राक्षसस्तयोर्भे ज्येष्ठामूले इति कर्मपदम्। तीक्ष्णाह्वये उशन्ति इच्छन्ति। इदं भचतुष्कं तीक्ष्णम्। अथ च-पुनः कृष्टयः। अन्तको यमः पितरः पूर्वजा एतयोर्भान्वितं भरणीमघायुक्तं पूर्वात्रयं पूर्वफाल्गुनी पूर्वाषाढा पूर्वभाद्रपदेति त्रिकमुग्रसंज्ञमुशन्ति। इदं भपञ्चकमुग्रम्। "कृतिकृष्ट्यभिरूपधीराः"-इति 'हैमः' ॥ १५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वंशस्थेन मिश्रभं तेषां फलं चाह ।

शुशुक्षणीन्द्वङ्गनया युतं बुधै-
र्द्विदैवतं मिश्रमथ प्रकीर्त्तितम् ।
निजाभिधानप्रतिमोक्तकर्मणां
स्मृतानि सर्वाण्यपि साधने सदा ॥ १६ ॥

शुशुक्षणीति । बुधैः शुशुक्षणिरग्निस्तस्येन्द्वङ्गना चन्द्रस्त्री नक्षत्रं कृत्तिका अष्टाविंशतिरश्विन्यादयः सर्वाः । "शशिप्रिया"-इति 'हेम'-वचनात् । एवं च यत्र चन्द्रवाचकशब्दादग्रेऽङ्गनाशब्दपर्यायो दृश्यते तत्र नक्षत्रमिति ज्ञातव्यं वक्ष्यमाणाधिकारे सर्वत्र । तया युतं द्विदैवतं विशाखामिश्रं मिश्रसंज्ञं प्रकीर्त्तितम् । इदं भयुग्मं मिश्रम् ।

अथैषां फलमाह । सदा एतानि सर्वाणि स्थिरादीनि निजाभिधानप्रतिमोक्तकर्मणां स्वकीयनामतुल्योक्तकार्याणां साधने स्मृतानीति ॥ १६ ॥

अथोपजात्या स्थिरादीनां संज्ञान्तरमाह ।

ध्रुवं स्थिरं धीरभमुक्तमेवं
चरं चलं लोलमधीरसंज्ञम् ।
मैत्रं बुधैर्यन्मृदु हारि सौम्यं
भीष्मं स्मृतं क्रूरतरं तथोग्रम् ॥ १७ ॥

ध्रुवमिति । बुधैः स्थिरं ध्रुवं धीरं चोक्तम् । एवं चरं चलं लोलमधीरसंज्ञं चोक्तम् । मृदु मैत्रं हारि सौम्यं चोक्तम् । तथा यत् उग्रं तत् भीष्मं क्रूरतरं च स्मृतम् ।

तीक्ष्णं खरं दारुणभं भवेल्लघु
क्षिप्रं च साधारणमेव मिश्रम् ।
भपञ्चकं वारुणपाशगं सदा-
ऽनिष्टं श्रविष्ठोत्तरखण्डपूर्वकम् ॥ १८ ॥

तीक्ष्णेति । तीक्ष्णं खरं दारुणं च भवेत् । लघु क्षिप्रं च भवेत् । साधारणमेव मिश्रभं भवेत् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ धनिष्ठादिपञ्चकमाह ।

श्रविष्ठोत्तरखण्डपूर्वकं धनिष्ठोत्तरखण्डादारभ्यारेवत्यन्तं भपञ्चकं पञ्चकयोग इति सदाऽनिष्टं भवति । किंलक्षणं भपञ्चकं वारुणपाशगं वरुणसम्बन्धिपाशप्राप्तम् ॥१८॥

अथ पञ्चके हेयमाह ।

प्रेतं नयेत् पि*तृवनं न चौकसो
न गोपनं दारुतृणौघसंग्रहम् ।
यानं यमाशं ग्रथनं न रज्जुभि-
र्भपञ्चकेऽस्मिन् विदधीत शायनम् ॥ १९ ॥

प्रेतमिति । जन इति शेषः । अस्मिन् भपञ्चके प्रेतं शवं पितृवनं श्मशानं न नयेन्न प्रापयेत् । श्मशानमित्याधारे गौणकर्म । अस्य धातोर्द्विकर्मकत्वात् । च-पुनरस्मिन्नोकसो गृहस्य गोपनमाच्छादनं न स्यात् । एवं दारुतृणौघसंग्रहो न स्यात् । एवं यममश्नुते प्राप्नोतीति यमाशं दक्षिणदिग्गतं यानं प्रयाणं न स्यात् । पुनरत्र जनो रज्जुभिः कृत्वा शयनस्य मञ्चकस्येदं शायनं ग्रथनं न विदधीत न कुर्वीत । अत्र दैवान्मृतस्याग्निसंस्कारविधानं स्मृत्यन्तरादवसेयम् । "प्रेतो मृते भूतविशेषे च"-इति 'हैमः' ॥ १९ ॥

अथाधोमुखसंज्ञनक्षत्रमाह ।

द्विपालकव्यालधनञ्जयोग्रभ-
क्रव्यादभानां नवकं जगुर्बुधाः ।
कासारकूपाननकर्मसाधने
हितं तथाऽधोमुखमुद्धृतौ क्षितेः ॥ २० ॥

द्विपेति । बुधा द्विपालकं द्विस्वामिकं विशाखा । व्यालस्य सर्पस्य भं श्लेषा । धनञ्जयोऽग्निस्तस्य भं कृत्तिका । उग्रभानि पूर्वात्रयमघाभरण्यः । क्रव्यादो राक्षसस्तस्य भं मूलम् । एषां द्वन्द्वे । एषां भानां नवकमधोमुखसंज्ञं कासारादिकर्मसाधने हितं हितकारि जगुरूचुः । कासारस्तडागः कूपश्चाननं मुखं येषां कर्मणां तेषां साधने विधाने । अत्राननशब्दस्यादिशब्दार्थत्वात् वापीभूमिगृहादीनां ग्रहणम् । तथा क्षितेः पृथिव्या उद्धृतौ खनने हितमिति ।

---

* अत्र छन्दोभङ्गः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"व्यालो दुष्टगजे सर्पे शवे श्वापदसिंहयोः"-इति ।

"धनञ्जयो नागभेदे ककुब्भेदे च मारुते ।
पार्थेऽग्नौ"-इति च 'हैमः' ॥ २० ॥

अथ तिर्यङ्मुखभान्याह ।

सकाश्यपीन्द्रामरवैद्यमारुत-
ब्रध्नेन्दुदाराणि विदुर्मृदून्यपि ।
तिर्यङ्मुखान्येषु तरीक्रियामनो-
ऽक्षवीभगोश्वाननकर्म कोविदाः ॥ २१ ॥

सकाश्येति । कोविदा बुधाः । सकाश्यपी काश्यपस्य स्त्री काश्यपी अधिकारादत्रादितिः । इन्द्रोऽमरवैद्यो मारुतो ब्रध्नो रविः एषां द्वन्द्वे । एषामिन्दुदारा नक्षत्राणि पुनर्वसुज्येष्ठाश्विनीस्वातीहस्ताभिधानि तैः सह विद्यन्ते इति सकाश्यप्यादीन्दुदाराणि मृदूनि । चित्रामृगरेवत्यनुराधाभानि तिर्यङ्मुखसंज्ञानि विदुर्जानन्ति । अपिरिति युक्तार्थे । च-पुनर्बुधा एषु नवसु तरीक्रियां नौकृत्यम् । अनोऽक्षादिकर्म च विदुः । अनः शकटः । अक्षः पाशकः । विः शुकशारिकादिपक्षी । इभो हस्ती । गौः प्रतीतः । अश्वः आननं मुखं येषां ते । तेषां कर्म कार्यमिति । "पाशकः पाशकोऽक्षश्च देवनः"इति 'हैमः'। काश्यपस्य कलत्राणि त्रयोदश—

यदुक्तं 'भूगोले' । दितिः १ । अदितिः २ । कद्रूः ३ । सेनब्राह्मणी ४ । भानुयोगेश्वरी ५ । विनता ६ । सविका ७ । सुप्रभा ८ । खड्गनेत्रा ९ । मिथुनादेवी १० । कालिञ्जरी ११ । कनकरेखा १२ । कनकप्रभा १३-इति ॥ २१ ॥

अथ वंशस्थेनोर्ध्वमुखनक्षत्राण्याह ।

रमाधवोमाधवजीवधीरभ-
प्राचेतसैणाङ्कवशाः सवासवाः ।
उदानना वारणधामचामर-
ध्वजातपत्राधृतये हिताः स्मृताः ॥ २२ ॥

रमेति । सद्भिः सवासवाधनिष्ठया युताः । रमाधवो विष्णुः श्रवणः । उमाधवः शम्भुरार्द्रा । जीवो गुरुः पुष्यः । धीरभानि रोहिण्युत्तरात्रयम् । प्रचेता वरुणस्तस्यैणा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ङ्कवशा चन्द्रस्त्री शतभिषक्। आसां द्वन्द्वे। एतास्तारा उदानना ऊर्ध्वमुखसंज्ञाः स्मृताः प्रोक्ताः। किम्भूता एता हिता हितकारिण्यः। कस्यै। वारणधाम हस्तिधाम 'अंबाडो' इति भाषा। चामरं ध्वजा पताका आतपत्रं छत्रमेषां द्वन्द्वे। एषामाधृतये धारणाय। हितादियोगे चतुर्थी। क्व चित् प्रचेतसेणाङ्क इति पाठोऽपपाठः। प्रचेतःशब्दो हसान्तत्वाद्विसर्गलोप एव इति नवकमूर्ध्वमुखसंज्ञम्॥ २२॥

अथोपेन्द्रवज्रया बृहद्भान्याह।

द्विदैवतादित्यभसंयुतानि
ध्रुवाणि भान्यत्र जगुर्बृहन्ति।
जघन्यसंज्ञान्यहिशान्तकेन्द्र-
प्रभञ्जनाम्भःपतिभानि चार्याः॥ २३॥

द्विदैवेति। आर्याः। द्विदैवतं विशाखा। आदित्यभं पुनर्वसु। "प्रथामको आदित्यौ च" इति 'हैमः'। आभ्यां संयुतानि ध्रुवाणि भानि रोहिण्युत्तरात्रयभानि बृहन्ति बृहत्संज्ञानि जगुः। च-पुनरार्याः। अहिराश्लेषा। शो रुद्र।आर्द्रा। अन्तको भरणी। इन्द्रो ज्येष्ठा। प्रभञ्जनो वायुः स्वातिः। अम्भःपतिर्वरुणस्तद्भं शतभिषक् एतानि भानि पञ्च जघन्यसंज्ञानि जगुः। "वः प्रागुक्तोऽथ शः शम्भुः शा गौरी कमलालया"-इत्येकाक्षरकोषे॥ २३॥

अथोपजात्या समानभान्याह।

शेषाणि भान्यक्षधारामितानि-
समानसंज्ञानि वदन्ति सन्तः।
लघुध्रुवाधोक्षजभानि शश्वत्
सौम्याह्वयान्यन्त्यभसंयुतानि॥ २४॥

शेषाणीति। सन्तः। शेषाण्यक्षधरामितानि पञ्चदशप्रमितानि भानि समानसंज्ञानि वदन्ति। अश्विनी कृत्तिका मृगशिरः पुष्यः पूर्वात्रयं मघा हस्तश्चित्रा अनुराधा मूलं श्रवणं धनिष्ठा रेवती इति पञ्चदश। पुनः शश्वन्निरन्तरं सन्तः। अन्त्यभसंयुतानि रेवत्या युक्तानि लघूनि अश्विन्यभिजिद्धस्तपुष्यभानि ध्रुवाणि रोहिण्युत्तरात्रयभानि। अधोक्षजो विष्णुस्तद्भं श्रवणमेषां द्वन्द्वे। एतानि भानि सौम्यानि वदन्ति॥२४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथोपजात्या कुलोदयभान्याह ।

मिश्रौषधीशाग्रजविश्वकर्मणा-
मुडून्युशन्तीज्यवसूत्तराश्विनाम् ।
भाभ्यां युतानां भगरक्षसोस्तथा
कुलोदयाख्यानि विचक्षणेश्वराः ॥ २५ ॥

मिश्राविति । विचक्षणेश्वराः पण्डितवराः । मिश्रे कृत्तिकाविशाखे । ओषधीशश्चन्द्रो मृगशिरः । अग्रजाः पूर्वजा मघा । विश्वकर्मा चित्रा । एषां द्वन्द्वे । एषामुडूनि भानि किम्भूतानां मिश्रादीनां भगरक्षसोर्योनिराक्षसयोर्भाभ्यां पूर्वफाल्गुनीमूलाभ्यां युतानाम् । तथा ईज्यः पुष्यः । वसवो धनिष्ठा । उत्तरात्रयम् । अश्विनौ अश्विनी एषां द्वन्द्वे । एषामुडूनि कुलोदयाख्यानि उशन्ति वाञ्छन्ति । इति त्रयोदश कुलोदयाख्यानि ॥ २५ ॥

अथोपजात्योपकुलकुलाकुलभान्याह ।

ककान्तकादित्यकसूरपूषा-
माहुर्बुधाश्चोपकुलानि भानि ।
भवाविपद्व्यालवनेशमित्रज्योतींषि
सेन्द्राणि कुलाकुलानि ॥ २६ ॥

ककेति । बुधाः । ककादीनां भानि उपकुलसंज्ञानि आहुः कथयन्ति । को ब्रह्मा रोहिणी । को वायुः स्वातिः । अन्तको भरणी । आदित्यौ पुनर्वसु । कं जलं पूर्वाषाढा । सूरः सूर्यो हस्तः । पूषा रेवती एषां द्वन्द्वे । एषां च-पुनर्वुधाः सेन्द्राणि ज्येष्ठासहितानि । भवो रुद्र आर्द्रा । अविविदिति छेदस्तथा च "अकारो वासुदेवः स्यात्"-इति तद्दैवतं श्रवणम् । विपदजपादः पूर्वभाद्रपदा । व्यालः श्लेषा । वनेशो जलपतिर्वरुणः शतभिषक् मित्रोऽनुराधः एषां द्वन्द्वे । एषां ज्योतींषि भानि कुलाकुलानि तन्नामानि आहुः ।

"को ब्रह्मण्यात्मनि रवौ मयूरेऽग्नौ यमेऽनिले । कं शीर्षेऽप्सु सुखे"-इति कोषः ।

अथान्धकादिभान्याह ।

निरम्बकं भं विकनीनिकं भवे-
दपाङ्गपोडं च कलाम्बकं ततः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुष्यादिहेयान्ननु नष्टवस्तुनः
सुलोचने नाप्तिमिति क्रमेण तु ॥ २७ ॥

निरम्बेति । पुष्याच्चतुष्कं चतुष्कं प्रतिभं क्रमेण निरम्बकं निर्गते अम्बके यस्मात् तद्भं गताक्षं भवेत् । ततो विकनीनिकं विगता कनीनिका तारा यस्मात् तद्भं काणाख्यं भवेत् । ततोऽपाङ्गपीडमपाङ्गे नेत्रप्रान्ते पीडा यस्य तद्भं चिपिटाख्यं भवेत् । ततः कलाम्बकं कले मनोज्ञे अम्बके नेत्रे यस्य तद्भं दिव्यनेत्रं भवेत् । च-समुच्चयार्थः । तुरिति विशेषार्थे । ननु वितर्के । क्रमेण इमानि । इह सुलोचने दिव्यनेत्रे नक्षत्रे नष्टवस्तुनो गतवस्तुन आप्तिं लाभमिति न ईयान्न लभेत । इतीति किम् । इतिशब्दोऽत्र विवक्षायां तदयमर्थः । गताक्षे भे नष्टवस्तुनः प्राप्तिः स्यात् । विकनीनिके यत्नतः प्राप्तिः । चिपिटभे प्राप्तेर्वार्त्ता दिव्यनेत्रे प्राप्तिर्नेति । "इति स्वरूपे सान्निध्ये विवक्षानियमे मतः"-इति 'हैमोऽनेकार्थः' ॥ २७ ॥

अथ योग्यतामाह ।

सदा विदुः क्रूरभदारुणानि
क्रूरेषु पातङ्गिदिनं तथाऽऽर्याः ।
शुभेषु कार्येष्वपराणि पुष्यं
गुरोरहश्चाखिलकर्मराशौ ॥ २८ ॥

सदेति । आर्याः सदाऽनिशं क्रूरेषु कार्येषु क्रूरभरदारुणानि उग्रतीक्ष्णसंज्ञभानि तथा पातङ्गिदिनं पतङ्गस्य सूर्यस्यापत्यं पातङ्गिः शनिस्तद्दिनं विदुर्लक्षयन्ति । च-पुनरार्या अपराणि उक्तव्यतिरिक्तानि भानि शुभेषु कार्येषु विदुः । च-पुनरखिलकर्मराशौ समस्तकार्यसमूहे पुष्यं गुरोरहो गुरुदिनं विदुः ॥ २८ ॥

अथ पुष्यमहत्त्वं वर्णयति ।

पुष्यस्तनोत्यङ्गभृतामनेकै-
रप्याचितो दूषणसन्निपातैः ।
न्यस्तेज्यमारम्भसुकृत्यजाता-
नर्थानुदन्वानिव रत्नधामा ॥ २९ ॥

पुष्य इति । रत्नं प्रधानं धाम तेजो यस्य सोऽथ वा रत्नवत् सुरमणिवद्धाम प्रभावो यस्य सोऽथ वा रत्नानां श्रेष्ठवस्तूनां धाम जन्म यस्मात् स रत्नधामा पुष्योऽङ्गभृतां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देहिनामर्थान् पदार्थान् तनोति विस्तारयति । किंलक्षणः पुष्योऽनेकैर्दूषणसन्निपातैः षसमुदायैराचितोव्याप्तः । किंविधानर्थात् न्यस्तेति । न्यस्तः समारोपित ईज्यमे पु आरम्भ उद्यमो येषां तानि एवंविधानि सुकृत्यानि सुकर्माणि तेभ्यो जातास्तान् । क उदन्वान् समुद्र इव सोऽप्येवंविध इति । समुद्रपक्षे रत्नानां धाम स्थानं यस्मिन् । इत्यर्थान्तरन्यासोऽप्यत्र । यथा पुष्यः कलिः प्राणिनामर्थाँस्तनोति । किंभूतानर्थ न्यस्तेति पूर्ववत् । किंभूतः पुष्यः कलिरनेकदूषणयुक्तोऽपीति । इत्यादि सर्वं स्पष्ट स्वभावात् कलिरनर्थं करोति सोऽपि पुष्यनक्षत्रयोगोऽपि शुभं करोति तर्हि कृतादिषु किं वक्तव्यमिति पुष्यनक्षत्रस्यातिशयोक्त्यलङ्कारः । "पुष्यवत् कलौ भे" इति 'हैमे ऽनेकार्थ': ।

"धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः"-इति तत्रैव ॥ २९ ॥

प्रभूतदोषोदितमप्यभद्रं निहन्त्यरं पुष्यकृतेषु तिष्यः ।
कृतेन्द्रवन्द्योडुकरग्रहाणामत्राङ्गिनां कर्मसु सोऽनिशं स्यात् ॥३०॥

प्रभूतेति । तिष्यः पुष्यः पुष्यकृतेषु पुष्यनक्षत्रे कृतानि कार्याणि तेषु प्रभूतदोषो दितमपि भूरिदूषणोत्पन्नमप्यभद्रममङ्गलमरं शीघ्रं हन्ति नाशयति । पुनः स पुष्य कृत इन्द्रवन्द्यो गुरुस्तस्योडुनि पुष्ये करग्रहो विवाहो यैस्तेषामङ्गिनां देहिनां कर्म कार्येष्वनिशं निरन्तरमत्रे भक्षणाय अर्थसामर्थ्यान्नाशाय स्यात् । अतृशब्द ऋकारा न्तोऽत्ति इति तृचि अत्ता तस्मै अत्रे कर्तृवत् ॥ ३० ॥

अथानुष्टुभा त्रिपुष्करयोगमाह ।

यदा चेत् सासितौ स्यातां भद्रायामारमन्त्रिणौ ।
सायुग्मचरणर्क्षायां भवेद्योगस्त्रिपुष्करः ॥ ३१ ॥

यदेति । यदा चेद्यदि । सहायुग्मचरणर्क्षैर्वर्त्तते या सा तस्यां विषमाङ्घ्रिभयुक्ता भद्रायां २।७।१२ तिथ्यां सासितौ शनिसहितावामारमन्त्रिणौ भौमजीवौ स्यातां तत्र त्रिपुष्कराख्ययोगो भवेत् । "छायासुतोऽसितः सौरिः"-इति 'हैमः' ॥ ३१ ॥

अथास्यैव फलमाह ।

अर्थजीवधनादीनां लाभे नष्टे हृतेऽत्यये ।
त्रिनिघ्नफलदो योगो वृद्धावुक्तोऽङ्गिनामयम् ॥ ३२ ॥

अर्थेति । मुनिभिरयं त्रिपुष्करयोगो वृद्धौ विषयेऽङ्गिनां त्रिनिघ्नफलदः शुभाशुभत्रिगुण फलदायक उक्तः । कस्मिन् सति । अर्थो द्रव्यं जीवधनादिकं गोमहिष्यादिकम् । यतः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"अकूप्यं रूप्यहेमाख्यं कूप्यमन्यधनं भवेत् ।
गोमहिष्यादिकं सर्वं बुधैर्जीवधनं स्मृतम्"-इति ॥

एषां लाभे नष्टे पलायिते चौरादिना हृतेऽत्यये नाशं प्राप्ते सति ॥ ३२ ॥

अथानुष्टुप्चतुष्केणाष्टाविंशतिमानन्दादियोगानाह ।

आनन्दो यमदण्डाख्यो धूम्रभृच्च प्रजापतिः ।
सौम्यो ध्वाङ्क्षाह्वयस्तस्माद्ध्वजः श्रीवत्ससंज्ञकः ॥ ३३ ॥
कुलिशो मुद्गरच्छत्रे मित्रं मानससंज्ञकः ।
सरोजं लुम्बकोत्पातौ कालकाणाख्यसिद्धयः ॥ ३४ ॥
शुभाख्यामृतनामानौ क्रमेण मुशलाह्वयः ।
गदमातङ्गरक्षांसि चरानरप्रवर्द्धकाः ॥ ३५ ॥
अष्टाविंशत्यभिन्नाः स्युरमी योगाः प्रकीर्त्तिताः ।
स्वनामप्रख्यफलदाः प्राप्तवारर्क्षसम्भवाः ॥ ३६ ॥

आनन्देत्यादि कुलकं सुगमम् । प्राप्तेति । आश्रितवारनक्षत्रेभ्यो जाता इति ॥ ३३-३६ ॥

अथ भुजङ्गप्रयातेन एषामुपपत्तिमाह ।

रवावादिभादिन्दुभादोषधीशे-
ऽहिभादसृजीनर्क्षतो वै बुधे च ।
गुरौ मित्रतो वैश्वदेवाच्च काव्ये-
ऽसिते शंवरेशोडुतोऽमी क्रमात् स्युः ॥ ३७ ॥

रवाविति । सुधीः आदिभादश्विनीतो वर्त्तमानभपर्यन्तं गणयेत् । यावत्संख्याकं वर्त्तमानभं तावत् संख्याक आनन्दादियोगो भवेत् । एवमोषधीशे चन्द्रे इन्दुभान्मृगशीर्षात् । असृजि मङ्गलेऽहिभादाश्लेषात् । बुधे इनर्क्षतो हस्तात् । गुरौ मैत्रतोऽनुराधातः । काव्ये शुक्रे विश्वदेवात् उत्तराषाढातः । असिते शनौ । शंवरं जलं तस्येशो वरुणस्तस्योडुतः शतभिषक्तः । वै निश्चितं क्रमेणेत्येवमेते स्युः । च समुच्चयार्थः । "असृग् वक्रे मृगे रक्ते" इति 'व्याडिः' । "अर्णस्यम्बुवाः शंवरम्"-इति 'हैमः' । अहिभादसृजीत्यत्र छन्दोभङ्गो दृश्यते ततः पुस्तकान्तरं विलोकनीयमिति ॥ ३७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथामृतसिद्धियोगमाह ।

हरावब्ज ईज्ये निजर्क्षं निजर्क्षं
निजर्क्षं क्रमाद्दास्रमारे ज्ञमैत्रम् ।
भवेदन्त्यधिष्ण्यं च धिष्ण्ये कधिष्ण्यं
शनौ चेत् तदैवं सुधासंज्ञयोगः ॥ ३८ ॥

हरेति । हरौ सूर्यवारे निजर्क्षं स्वकीयभं हस्तः । अब्जे चन्द्रे निजर्क्षं मृगशिरः ईज्ये गुरौ निजर्क्षं पुष्यः । आरे भौमे दास्रमश्विनी । ज्ञे बुधे मैत्रमनुराधा । धिष्ण्ये शुक्रेऽन्तधिष्ण्यं रेवती । शनौ को ब्रह्म तद्धिष्ण्यं रोहिणी । क्रमाच्चेद्यदा एवं भवेत् तदा सुधासंज्ञयोगोऽमृतसिद्धियोगो भवेत् । च-कारः समुच्चयार्थः ॥ ३८ ॥

अथोत्पातादियोगचतुष्कमाह ।

द्विदैवादिभानां चतुष्केषु योगाः
क्रमात् सप्तसूष्णांशुपूर्वग्रहाणाम् ।
सदोत्पातकालाख्यकाणाख्यसौम्या
दिनेषु स्वनामप्रकाशेष्टदाः स्युः ॥ ३९ ॥

द्विदैवेति । उष्णांशुपूर्वग्रहाणां सूर्यादिसप्तग्रहाणां सप्तसु दिनेषु द्विदैवादिभात् विशाखादिनक्षत्राणां चतुष्केषु सदा क्रमेण उत्पात-१ काल-२ काण-३ सौम्याख्याः योगा निजनामतुल्यफलदाः स्युः । कोऽर्थः । रविदिने विशाखा तदा उत्पात योगः अनुराधा तदा कालः । ज्येष्ठा तदा काणः । मूलं तदा सौम्यम् । एवं नक्षत्रचतुष्कं एको वारश्चत्वारो योगाः । चन्द्रादिषु पूर्वाषाढादिष्वप्यूह्याः ॥ ३९ ॥

अथाष्टसंख्यापर्यन्तं वैतालीयवृत्तं तत्र तावद्यमघण्टयोगमाह ।

पितृभं खरगौ द्विदैवतं हिमरश्मावस्रजोशतारकम् ।
विदि मूलमजाग्रजार्चिते हुतभुग्ज्योतिरजोडु भार्गवे ॥ ४० ॥
भवतीनभमंशुजे तदा यमघण्टाभिधयोग ईरितः ।
जनियानशयम्बुजग्रहेष्वमरस्थापनकेऽत्ययाय च ॥ ४१ ॥

पितृभमिति । भवतीति युग्मम् । यदा खरगौ सूर्ये पितृभं मघा । हिमरश्मौ चन्द्रे द्विदैवतं विशाखा । अस्रजि भौमे ईशतारकमार्द्रा । विदि बुधे मूलम् । अजो विष्णु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तदग्रजो मघवान् तेनार्चितो गुरुस्तस्मिन् दिने हुतभुग् वह्निस्तस्य ज्योतिः कृत्तिका । भार्गवे शुक्रेऽजो ब्रह्मा तदुडु रोहिणी । अंशुजे शनौ इनभं हस्तो भवति तदा बुधैर्यमघण्टाभिधयोम ईरितः । कस्मै जनिर्जन्म । यानं प्रयाणम् । शयः पाणिः स एवाम्बुजं तद्ग्रहः पाणिग्रहणम् । एषां द्वन्द्वे एषु । च-पुनरमरस्थापनके देवप्रतिष्ठायामत्ययाय नाशाय ।

"अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे"-इति 'हैमः' ॥ ४०-४१ ॥

अथाडलयोगमाह ।

सपतङ्गभतोऽचलैर्मिते नवभिर्भे च नृपालकैर्भवेत् ।
मनुभिः कुयमैरिभाश्विभिस्त्रियमैर्दस्रमिते सदाऽऽडलः ॥ ४२ ॥

सपतङ्गभत इति । सह पतङ्गेन सूर्येण वर्त्तते तत्सपतङ्गभं तस्माद्रविनक्षत्रादचलैः सप्तभिर्मिते भे । नृपालकै राजभिः षोडशभिश्च । मनुभिश्च । कुयमैरेकविंशत्या । इभाश्विरष्टविंशत्या तथा त्रियमैस्त्रयोविंशतिभिश्च दस्रमिते द्वाभ्यां च मिते भे सदा आडलो योगो भवतीति ॥ ४२ ॥

अस्यैव फलमाह ।

बलकर्षुककोपलक्रिया विबुधैराडलके च गर्हिता ।
भवतीह न दोषभाक् क्रिया शयजम्बालजसंग्रहादिका ॥ ४३ ॥

बलेति । विबुधैः पण्डितैः । बलं सैन्यं कर्षुको हली कं जलमुपलक्षणत्वात् कासारकूपारामादिः । उपलः पाषाणः । एषां द्वन्द्वे प्रत्येकं संयोजनात् । एषां क्रिया समरहलप्रवाहबन्धनविधिदुर्गप्रमुखा गर्हिता तिरस्कृता । च-पुनरिह योगे । शयेति । जम्बालात् पङ्काज्जायते तज्जम्बालजं कमलं शयः पाणिरेव जम्बालजं करकमलमित्यर्थस्तस्य संग्रह उद्वाहः स आदिर्यस्यां सा शयजम्बालजसंग्रहादिका क्रिया दोषभाग् न भवति । "जम्बाले च कलौ पङ्के"-इति 'हैमः' ॥ ४३ ॥

अथ विडलमाह ।

विडलोऽशुमदंशुसंकुलादुडुतो भौघनगाप्तशेषकम् ।
त्रिमितं यदि षण्मितं भवेद्विधुवज्ज्योतिषि चेष्टनुत् तदा ॥ ४४ ॥

विडल इति । यदि चेदंशुमतो रवेरंशुभिः किरणैः संकुलं लुप्तं तस्मादुडुतः सूर्यनक्षत्रात् विधुर्विद्यतेऽस्मिन् इति विधुवत् तच्च तज्ज्योतिश्च तस्मिन् वर्त्तमाने चन्द्रनक्षत्रे । आधारे सप्तमी । भानामोघो भौघस्तस्य नगाप्तशेषकं सप्तभाजितशेषकं नक्षत्रं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिमितं वाऽथ षण्मितं भवेत् तदा विडलो भवेत् । किंविशिष्टो विडल इष्टनुत् इष्ट
प्सितं नुदति विनाशयति इति इष्टनुत ॥ ४४ ॥

अथ विद्युद्भूकम्पनादियोगानाह ।

तिमिरारिकरावृतर्क्षतोऽक्षमिते विद्युदगैः कुकम्पनम् ।
भवतोभमिते च शूलकोऽशनिरेव प्रतिमेऽम्बरेन्दुभिः१० ॥४५

अनु केतुरहीन्दुभिः समे
तिथिभिर्दण्डक उल्मुकं च भे ।
खचरेन्दुभिरब्धिलोचनैः
परिवेषः कुलिशोऽनिलाम्बकैः २५ ॥ ४६ ॥

तिमिरेति । तिमिरारे रवेः करैरावृतर्क्षतः सूर्यकिरणलुप्तनक्षत्राद्धे वर्त्तमानचन्द्र
नक्षत्रेऽक्षमिते पञ्चप्रमिते सति विद्युन्नाम योगो भवेत् । एवमगैः सप्तभिर्मिते कुकाण
भूकम्पनयोगो भवेत् । इभमितेऽष्टमिते शूलकः । अम्बरेन्दुभिर्दशभिः प्रमिते समरे
ऽशनिर्योग एव स्यात् ॥ ४५ ॥

अनु पश्चात् अहीन्दुभिरष्टादशभिः समे केतुः । तिथिभिः पञ्चदशभिः सं
दण्डकः । खचरेन्दुभिरेकोनविंशत्या समे उल्मुकम् । अब्धिलोचनैश्चतुर्विंशत्या सं
परिवेषः । अनिलाम्बकैः पञ्चविंशत्या समे कुलिशो भवति । इति सर्वत्र योज्यं च पु
रर्थः । युग्मम् ॥ ४६ ॥

द्वियमैरुडुभिर्मिते भतो-
ऽर्कयुताद्घातनपातकौ लभेत ।
न तदैषु फलं सुकर्मणा-
मलमारम्भविधानतो जनः ॥ ४७ ॥

द्वियमैरिति । अर्कयुताद्भतो रविनक्षत्रात् द्वियमैर्द्वाविंशत्योडुभिः । सप्तविंशत्यो
डुभिश्च क्रमेण घातनपातकौ योगौ स्याताम् । सदा जन एषु योगेषु सुकर्मणां शुभका
र्याणामारम्भविधानतो विहितोद्यमादलं निश्चयेन फलं न लभेत न प्राप्नुयात् ॥ ४७ ॥

अथ चण्डायुधपातमाह ।

चण्डांशूनविभोडुतोऽहिभमघाचित्रानुराधाश्रवः-
पौष्णोऽश्वश्विभतः क्रमाद्गणनयेलादेवतेशान्वितै

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्याद्यावत्यगराजजारमणदोश्चण्डायुधस्येति भे
पातोऽनारतमेव कर्म रुचिरं नास्मिन् विधेयं बुधैः ॥४८॥

चण्डांशूनेति। चण्डांशुना सूर्येण ऊना हीना विभा कान्तिर्यस्य तत् तच्चोडु च तस्मात् सूर्यनक्षत्रात् अहिमादिसप्तसु अश्विभतोऽश्विनीतः क्रमेण गणनया कृत्वा। इलेति। इलादेवता भूदेवो विप्रस्तस्येशश्चन्द्रस्तनान्विते युक्ते यावति भेऽत्राधारे सप्तमी। अगेति। अगानां महीन्द्राणां राजा हिमाचलस्तज्जा गौरी तद्रमण ईश्वरस्तस्य दोर्भुजस्तस्य चण्डायुधमस्त्रं तस्य पातो हरायुधपातः स्यादित्यन्वयः। स्पष्टार्थस्त्वयम्। सर्पभात् सर्वभानि स्थाप्यन्ते। अधःपङ्क्तिषु यद्वर्त्तमानचन्द्रनक्षत्रमुपरिकृतचिह्नन-क्षत्रेण विद्धं तदा तस्मिन् भे हरायुधपातः स्यादित्यर्थः। बुधैरस्मिन्नक्षत्रेऽनारतं सदैव रुचिरं शुभं कर्म न विधेयं न कार्यमित्यर्थः ॥ ४८ ॥

अथ शार्दूलविक्रीडितेन कालचक्रभ्रममाह।

हेलीन्द्वोरचरे युतावथ विभावर्यार्यधाराभुवो-
रुग्रे भेऽब्जविदोश्च मिश्रभ इह क्षिप्रे मृगाङ्केज्ययोः।
मैत्रे धिष्ण्यतमीशयोर्निशिथिनीशैन्योर्विधौ दारुणे
लोले मङ्गलभङ्गवान् निखिलभे स्यात् कालचक्रभ्रमः ॥

हेलीन्द्वोरिति। अथेह लोके हेलीन्द्वोः सूर्यचन्द्रयोरचरे भेऽस्थिरनक्षत्रे युतौ मिश्रीभावे सति मङ्गलभङ्गवान् विवाहादिककार्यविनाशकृत् कालचक्रभ्रमः स्यात्। एवं विभावर्या रात्रेरार्यः स्वामी चन्द्रो धाराभूर्मङ्गलस्तयोरुग्रे भे युतौ। पुनरब्जविदो-श्चन्द्रबुधयोर्मिश्रभे युतौ। पुनर्मृगाङ्केज्ययोश्चन्द्रगुर्वोः क्षिप्रभे युतौ। पुनर्धिष्ण्यतमी-शयोः शुक्रचन्द्रयोर्मैत्रे भे युतौ। पुनर्निशिथिनीशश्चन्द्र ऐनिः शनिस्तयोर्दारुणे भे युतौ। पुनर्निखिला भा कान्तिर्यस्मिन्। एवंविधे विधौ पूर्णेन्दौ लोलेभे सति एष स्यात्।

"अब्जो धन्वन्तरौ चन्द्रे शङ्खपद्मस्वरयोः"-इति। "आर्यः स्वामिवैश्ययोः"-इति च 'हैमः'। निशीथिनी इत्यत्र शकारमध्ये दीर्घ ईकारोऽस्ति। अत्र तु ह्रस्व इकारः शब्दप्रभेदो दृश्यते ॥ ४९ ॥

अथ वैतालीयेन केषु केष्वेते विलोकनीयास्तदाह।

तिथिवारभवा भवारजाः किल योगाश्च शुभाशुभाह्वयाः।
विषयेष्वखिलक्रियाविधावखिलेष्वत्र विलोकनोचिताः ॥ ५० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिथिवारेति । तिथिवारेभ्यो भवा जाताः । भवारेभ्यो नक्षत्रवारेभ्यो जायमा तज्जाः । शुभाशुभाह्वयाः सौम्यक्रूरनामयोगाः । अखिलेषु विषयेषु देशेषु । अत्राखिल क्रियाविधौ समस्तकार्यविधाने विलोकनोचिता एता दर्शनाय योग्याः स्युः । "विषयं यस्य योऽज्ञातस्तत्र गोचरदेशयोः"-इति 'हैमः' ॥ ५० ॥

अथ स्वागतावृत्तेनाह ।

हेल्यधिष्ठितभभेशभजाः स्युर्हूणहोरखशवङ्गकिणेषु ।
येऽखिलेषु च हिताय कुयोगास्तेऽहिताय विषयेष्वखिलेषु ॥ ५१ ॥

हेल्येति । हेल्यधिष्ठितभं सूर्याश्रितनक्षत्रं च भेशभं भानां नक्षत्राणामीशश्चन्द्र स्तद्भं चन्द्रनक्षत्रं च ताभ्यां जायन्ते ये ते कुयोगाः । अखिलेषु हूणादिषु देशेषु हिताय शुभाय स्युः । च पुनस्ते कुयोगा अपरेषु विषयेषु देशेषु अहितायाशुभाय स्युः ॥५१॥

अथार्यागद्येन विष्कुम्भादिसप्तविंशतियोगानाह ।

विष्कुम्भप्रीत्यायुष्मन्तः सौभाग्यशोभनातिगण्डश्च ।
सुकर्मा धृतिशूलाह्वयगण्डा वृद्ध्यभिधोऽमी योगाः क्रमशः ॥५२॥
ध्रुवाख्यव्याघातौ हर्षणवज्रसिद्धयो व्यतीपातः ।
वरीयानथ परिघशिवौ सिद्धिसाध्यशुभाह्वयशुक्लाख्याः ॥ ५३ ॥
ब्रह्मैन्द्रोऽन्त्यो वैधृतिर्योगाः स्युरित्यसौम्यसौम्या हि ।
स्वसंज्ञासंनिभफलमश्रान्तं कर्मसु तन्वन्त्येव ॥ ५४ ॥

विष्कुम्भेत्यादित्रिभिर्विशेषं सुगमम् । अश्रान्तमनिरन्तरम् । असौम्यसौम्या क्रूरशुभा अमी योगाः कर्मसु कार्येषु । स्वेति । निजनामसदृशफलं तन्वन्ति विस्तारयन्ति ॥ ५२-५४ ॥

अथैतेषामशुभानाह ।

शश्वदमीषामेतेऽशुभफलभाजो भवन्ति वै योगाः ।
विश्वाङ्कभतिथ्यङ्गैकोनविंशतिदशधरात्यष्टिमिताः ॥ ५५ ॥

शश्वेति । शश्वन्निरन्तरममीषां सप्तविंशतेर्योगानां मध्ये एते अमी प्रत्यक्षा योगाः । विश्वा विश्वे त्रयोदश । अङ्का नव । भानि सप्तविंशतिः । तिथयः पञ्चदश । अङ्गानि षट् । एकोनविंशतिः । दश । धरा एकः । अत्यष्टिः सप्तदश । एषां द्वन्द्वे । एभिर्मिता व्याघातशूलवैधृतिवज्रपरिघगण्डविष्कुम्भव्यतिपाताः ॥ ५५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वैधृतिव्यतिपातावखिलौ स्यातामनिष्टदौ योगौ।
एतद्विहितवृषो नेह परलोकेऽखिलभोगभाग्भवति ॥ ५६ ॥

वैधृतेति। अखिलौ समस्तौ वैधृतव्यतिपातौ योगौ अनिष्टदौ दोषकरौ स्याताम्। इहास्मिन् संसारे एतयोर्वैधृतव्यतिपातयोर्विहितः कृतो वृषो धर्मो येन स पुमान् परलोके स्वर्गलोकेऽखिलभोगभाक् समस्तभोगफलयुक्तो भवति। व्यतिपातो व्यतीपात इति शब्दप्रभेदो घञि परे प्रादेरुपसर्गस्य वा दीर्घत्वात्। वैधृतो वैधृति-शब्दप्रभेदोपलक्षणत्वात्। "धर्मः पुण्यं वृषः"-इति 'हैमः' ॥ ५६ ॥

परिघाद्यर्धमनिष्टमनिष्टनाड्यः कुलिशस्याद्ययुतेः।
शुभकर्मस्वाद्याः स्युस्तिस्रोऽतिगण्डे षडेव गण्डे च ॥ ५७ ॥

परिघेति। परिघस्यार्धं दलमनिष्टं स्यात्। कुलिशस्य वज्रस्य किंभूतस्य आद्ययुतेरादिना विष्कुम्भेण युतिः संयोगो यस्य स तस्य विष्कुम्भस्य आद्यास्तिस्रो नाड्यो घटिका नेष्टाः। च-पुनरतिगण्डे षट्। गण्डे षडेव नेष्टाः स्युः। केषु शुभकर्मसु ॥ ५७ ॥

व्याघाते न वरा नव पञ्चाद्याः शूले स्तो द्वौ।
अंशे निन्द्यौ च मुहूर्त्तावैन्द्रे ध्रुवयोगे च ते शेषे ॥ ५८ ॥

व्याघातेति। एवं व्याघाते नव घटिका वराः श्रेष्ठा न। शूले पञ्च। आद्या इति सर्वत्र योज्यम्। अथैन्द्रे ध्रुवयोगे च अंशे त्रिभागे इने गते सति द्वौ मुहूर्त्तौ निन्द्यौ स्तः भवतः ॥ ५८ ॥

अथोपजातिभ्यां विष्कुम्भादिदुर्योगेष्वेकार्गलचक्रस्योपपत्तिमाह।

मितं सदा मानदलेन कर्ष-
मसौम्ययोगस्य सरूपकस्य।
योगो यदि स्याद्विषमस्तदैव-
मथान्यथा पिण्डयुतस्य भं तत् ॥ ५९ ॥

मितमिति। असौम्ययोगस्य विष्कुम्भव्याघातव्यतीपातशूलपरिघगण्डातिगण्डवज्रवैधृत्याख्यस्य सरूपकस्यैकेन सहितस्य अस्य मानदलेन प्रमाणस्यार्धेन मितं प्रमितं यद् भं नक्षत्रं तद्भं कर्षं कस्य मस्तकस्य ऋक्षं नक्षत्रं स्यात्। यदि चेद्विषमो योगः स्यात् तदा एवं स्यात्। अथान्यथा पूर्वोक्तविषमाभावे सति तदा पिण्डयुतस्याष्टाविंशतिनक्षत्रयुक्तस्य समकुयोगस्य प्रमाणार्धेन मितं यद्भं तद् मस्तकनक्षत्रं स्यादित्यन्वयः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेखाभिरेवोर्ध्वगतैकरेखा-
खार्जूरकं विश्वमिताभिरस्मिन् ।
विद्धा सती मौलिभतस्तदङ्घ्रौ
भपेटकं स्याद्वलये विदध्यात् ॥ ६० ॥

रेखेति । विश्वमिताभिस्त्रयोदशमिताभी रेखाभिर्विद्धा सती । एवंविधा ऊर्ध्वगता एकरेखा इत्येवं स्वरूपकं खार्जूरकं चक्रं स्यात् । सुधीरस्मिन् वलये मौलिभतो मस्तकनक्षत्रात् । तदङ्घ्रौ चक्रचरणे भपेटकं नक्षत्रमालां विदध्यात् स्थापयेत् ॥ ६० ॥

अथेन्द्रवज्रयाऽस्य नामान्याह ।

तत्रैकरेखाश्रितयोरिनेन्द्वो-
रेकार्गलाख्योऽम्बकदीप्तिपातः ।
कार्त्तान्तिकैरेव पुराणगात्रै-
रुक्तो मिथो दीप्तकृशानुकीलः ॥ ६१ ॥

तत्रैकेति । एव निश्चयेन । पुराणगात्रैर्वृद्धैः । कार्त्तान्तिकैर्दैवज्ञैः "दैवज्ञगणकादेशिज्ञानिकार्त्तान्तिकोऽपि" इति 'हैमः' । तत्र चक्रे एकरेखास्थितयोरेकरेखायां गतयोरिनेन्द्वोः सूर्यचन्द्रयोरम्बकदीप्तिपातो नेत्रतेजःपात एकार्गलाख्य उक्तः । कीदृश एकार्गलः । मिथः परस्परं दीप्तकृशानोः स्फुरदग्नेः कीला इव कीला ज्वाला यस्मिन् सः । "हेतिः कीला शिखा ज्वाला"-इति 'हैमः' ॥ ६१ ॥

अथोपजात्याऽस्यैव दुष्टपुरुषस्वरूपतां ब्रूते ।

यदैकरेखास्थितपुष्पवन्तयो-
र्दृगंशुसम्पातभवोऽतिभीष्मभाः ।
काले पतन्त्यर्णवतीधरातलं
नरः सदा मङ्गलभङ्गहेतवः ॥ ६२ ॥

यदैकेति । कदा काले एकरेखास्थितपुष्पवन्तयोरेकरेखाधिष्ठितरविचन्द्रयोर्दृगंशुसम्पातस्तेजःसम्पातस्तस्माद्भवन्तीति तद्भवो जाता अतिभीष्मभा अतिक्रूरकान्तयः सदा निरन्तरमङ्गलभङ्गस्य पाणिग्रहनाशस्य हेतवः कारणभूता एवंविधा नरा नरस्वरूपाः । अर्णवती वरा भूमिस्तस्यास्तलं पतन्ति गच्छन्ति । "सागरादग्नेः स्युर्वमिमेखलाम्बरा"-इति 'हैमः' ॥ ६२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथास्यैव दुष्टतां दर्शयन्नाह।

सत्या पुरा दोर्ग्रहमङ्गलं शो
बभूव तन्मङ्गलमाचचार।
कपालिनो मङ्गलमप्यहो द्राक्
चैकार्गलोत्पन्नकपालदोषात्॥ ६३॥

सत्येति। यः प्रागुक्तः शः शम्भुः "शा गौरी कमलालया" इति 'सौभरि'-वचनात्। शः शम्भुः पुरा पूर्वं सत्या पार्वत्या दोर्ग्रहमङ्गलं पाणिग्रहणमङ्गलमाचचार चकार च इत्यवधारणे। अहो इत्याश्चर्यम्। तन्मङ्गलं पार्वत्याः पाणिग्रहणमङ्गलं कर्त्तृपदम्। द्राक् शीघ्रं कपालिनोऽपि मङ्गलं बभूव। कस्मात् एकार्गलेषूत्पन्ना ये नरस्तेषां पातदोषात्। अत्र शब्दच्छलेन कपालमस्त्यस्येति कपालिनो भिक्षोरपि कुयोगान्मङ्गलं तर्ह्यन्यस्य श्रीमतः कथा न। अत्र कुयोगान्मङ्गलमिति विरोधालङ्कारः। परिहारस्तु-कपालिन ईश्वरस्य भिक्षोश्च मङ्गलमेव। एतयोर्नेश्वरवस्त्वभावात् न तु श्रीमत्पुरुषस्येति। अथ वा तन्मङ्गलमपि कपालिनो मङ्गलमिति सम्बन्धे षष्ठी। बभूव सतीमङ्गलमपि भिक्षाटनं चकारेत्यर्थः। यतो भिक्षूणां मङ्गलं भिक्षेति। "सती शिवा महादेवी"-इति 'हैमः'। "च-समाहारादिपदपूर्त्यवधृते"-इति 'हैमः'॥ ६३॥

अथ चण्डायुधमाह।

ऐशं पतद्धर्षणशूलसाध्य-
गण्डव्यतीपातकवैधृतीनाम्।
यद्वाऽवसाने स्थितमृक्षमृक्षे
चण्डायुधं तत्र हि कालभं स्यात्॥ ६४॥

ऐशमिति। पततां गच्छतां हर्षणादियोगानां यदवसानेऽन्ते स्थितमृक्षं नक्षत्रं तत्र तस्मिन् नक्षत्रे हि-निश्चयेन ऐशमीशस्येदं चण्डायुधं स्यात्। कीदृशं चण्डायुधं काला भा कान्तिर्यस्य तत्कालभम्॥ ६४॥

अत्रैतयोर्हेयस्थानमाह।

मरुस्थलीकच्छकलिङ्गबङ्ग-
देशान्नगेलां च शिवास्त्रपातः।
एकार्गलो दुष्यति नापरेषु
देशेष्विमौ तावहितौ भवेताम्॥ ६५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मरु-इति। शिवास्त्रपातश्चण्डायुधपात एकार्गलश्च मरुस्थल्यादीन् नगेलां पर्वतभूमीं च दुष्यति। अपरेषु देशेषु इमौ तौ चण्डायुधैकार्गलावहितावशुभकरौ न भवेतामित्यर्थः ॥ ६५ ॥

निहन्ति काश्मीरवरेन्द्रयोरसौ
समागधाख्यद्रविडारिमाणयोः।
एकार्गलोऽन्येषु न मङ्गलव्रजा-
न्नित्याहतुर्गालवदेवलावपि ॥ ६६ ॥

इति ज्योतिर्विदाभरणे योगोत्पत्त्यध्यायो द्वितीयः।

निहन्तीति। इति गालवदेवलावपि ऋषी आहतुः कथयतः। इति किम्। असावेकार्गलः काश्मीरवरेन्द्रयोः काश्मीरवरेन्द्रदेशयोर्मागधद्रविडारिमाणादिसहितयोर्मङ्गलव्रजान् निहन्ति विनाशयति। अन्येषु देशेषु नेति ॥ ६६ ॥

इति श्रीज्योतिर्विदाभरणस्य टीकायां सुखबोधिकाख्यायां
द्वितीयोऽध्यायः समाप्तः।

सदा श्रीमहिम्नां प्रभूणां सुनाम्नां शुभज्ञानरत्नाकरः सूरिराज्ञाम्।
महीमण्डले स्याच्छ्रयै कस्य नूनं श्रितस्यास्तमौख्योष्णसन्तापराशेः ॥

अथ तृतीयाध्याये प्रथममार्यया सप्तकरणान्याह।

ववाह्वयबालवकौलवतैतिलगरवणिजविष्ट्यः सप्तः।
जगदुरथेति चराणि तिथिखण्डात्मकानि करणानि ॥ १ ॥

ववेति। अथान्तरम्। ववाख्येति एषां द्वन्द्वे इति। सप्त चराणि चलस्वरूपाणि तिथिखण्डात्मकानि तिथ्यर्धस्वरूपाणि जगदुः कथयामासुः ॥ १ ॥

अथ स्थिरकरणचतुष्कमाह।

अचराण्युत्तरशकलाद्यामासन्नं चतुर्दशी तस्याः।
शकुनिचतुष्पदनागकिंस्तुघ्नानि भवन्ति करणानि ॥ २ ॥

अचरेति। अमाया आसन्नं समीपममासन्नम्। उत्तरखण्डे आद्यममासन्नं यस्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सा चतुर्दशी एतेन कृष्णपक्ष उत्तरखण्डश्च सूचितः । तस्याश्चतुर्दश्याः सकाशात् अचराणि शकुन्यादीनि करणानि भवन्ति ॥ २ ॥

अथानुष्टुभा करणानयनमाह ।

सितादेः करणं व्येको यातितिथ्यर्धसंचयः ।
सप्तभक्तोऽवशेषेण मितं स्याद्ववतो गतम् ॥ ३ ॥

सितेति । सितादेः सितपक्षप्रतिपत्तः । यातेति । गतकरणसंचयः । इति कोऽर्थः । द्विगुणीकृतायास्तिथेः यः संचयः स गतकरणसंचयः । किंविशिष्टः संचयः । व्येक एकेन रहितः । पुनः किंविशिष्टः । सप्तभाजितः सप्तभिर्हृतो यच्छेषं तेन मितं प्रमितं करणं ववतो गतं स्यादित्यर्थः ॥ ३ ॥

अथोपजात्यैषां फलमाह ।

चराणि विष्टिं करणान्यृते च सा
भवन्ति सौम्याखिलकर्मसिद्धये ।
तथैव धीराणि च पित्र्यकर्मणे
विष्टिर्विघातादिविधौ वरा भवेत् ॥ ४ ॥

चराणीति । विष्टिमृते विना चराणि करणानि । सौम्येति । शुभसमस्तकार्यसिद्धये भवन्ति । तथैव च पुनर्धीराणि स्थिराणि शकुन्यादीनि करणानि पैत्र्यकर्मणे पूर्वजसम्बन्धिकृत्याय भवन्ति । पुनः सा विष्टिर्विघातादिविधौ वरा भवेत् ॥ ४ ॥

अथ सा का विष्टिस्तदुत्पत्तिमाह ।

भद्रा पुरा संयुग ईशविग्रहाद्बभूव वामीवदनाऽमरासुरे ।
लाङ्गूलिनी सप्तशया त्रिपद्वती वराटकादृग् घनघोषनिस्वना ॥५॥

भद्रेति । पुरा पूर्वममरासुरे नाम्नि संयुगे संग्रामे भद्रा ईशविग्रहाच्छम्भुशरीराद्बभूव संजाता । किंलक्षणा वामीवदना वामी रासभी तद्वद्वदनं मुखं यस्याः सा । यतः "वामी शृगाल्यां करभीरासभीवडवासु च"-इति 'हैमः' । पुनः किम् । लाङ्गूलिनी पुच्छयुक्ता । पुनः किम् । सप्त शयाः करा यस्याः सा सप्तशया । "पञ्चशाखः शयः समः"-इति 'हैमः' । त्रयः पादाश्चरणा विद्यन्तेऽस्यामिति त्रिपद्वती । वराटके कपर्दिके इव दृशौ यस्याः सा वराटकादृक् । पुनः घनो निविडः कुत्सितो घोषः घोषकः कुत्सितकांस्यं तद्वत् स्वनः शब्दो यस्याः सा । "घनः कांस्ये विद्युत्पिङ्गो"-इति 'हैमः' । कुत्सितार्थे कप्रत्ययः ॥ ५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जाले प्रविष्टा कुणपांशुकाम्बरा
मुर*द्विषामग्रजकानने तदा ।
परेतगा धूमनिभा बलोद्धता
वात्येव साऽभूदतिदीर्घविग्रहा ॥ ६ ॥

जालेति । तदा सा भद्रा वात्या इव वातानां समूहो वात्या तद्वदतिदीर्घविग्रहा ऽत्यायतशरीराऽभूत् । किंभूता । अमरद्विषां दैत्यानां जाले समूहे प्रविष्टा । पुनः किंभूता । कुणपांशुकानि शववस्त्राण्येवाम्बराणि यस्याः सा कुणपांशुकाम्बरा । "अङ्गं कुणपांशवः"-इति 'हैमः' । अथ वा कुणपांशुका शववस्त्रा । अम्बरे गगनेऽमरान् द्विषन्तीति तेषामम्बरामरेत्यत्र योज्यम् । पुनः किंभूता । अग्रजाः पितरस्तेषां काननं श्मशानं तस्मिन् परेतेन गच्छतीति परेतगा शववाहना । पुनर्धूमनिभा धूमसदृशी पुनर्बलोद्धता शौर्योत्कटा । "श्मशानं करवीरं स्यात् पितृप्रेताद्गृहं वनम्"-इति 'हैमः' "प्रेतः परेतश्च मृते भूतविशेषे"इति ॥ ६ ॥

तस्यास्तदा चानशिरेऽमरारयः
कलिन्दजासोदरधामपद्धतिम् ।
अवाप सा कर्णपदं कपर्दिनो
वह्न्यायुधाऽऽनन्दवतो मरुद्रया ॥ ७ ॥

तस्येति । तदाऽमरारयो दैत्यास्तस्या विष्टेः सकाशात् कलिन्दजासोदरधामपद्धतिमानशिरे जग्मुः । कलिन्दजा यमुना तस्याः सोदरः सूर्यस्तद्दशानां धाम्नां गृहाणां पद्धतिः पङ्क्तिस्ताम् । "पद्धतिः पथि पङ्क्तौ च"-इति 'हैमः' । अथ सा भद्रा कपर्दिन ईशस्य कर्णपदमवाप प्राप । किंभूतस्य कपर्दिनः । आनन्दवतः परमसुखयुक्तस्य किंलक्षणा । सा वह्न्यायुधा अग्निशस्त्रा । पुनः किंभूता सा । मरुतां वायूनां रयो वेगस्तद्वेगो यस्याः सा मरुद्रया ॥ ७ ॥

अथास्यां सुकृत्यनिषेधमाह ।

विधेयमेवाग्निशिखाग्रतालुका
फलं न सा शेतवराऽतिमङ्गलम् ।

* 'मर'-इति वा. पा. ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नरैरतः स्वात्महितोपलब्धिभि-
स्तदाश्रितं स्वाश्रितकर्मसिद्धिजम् ॥ ८ ॥

विधेयेति ।। शात् ईशात् इतः प्राप्तो वरो यया सा शेतवरा विष्टिः । फलमत्ति भक्षयति । किंभूता सा अग्निशिखाग्रतालुका । अग्नेर्वह्नेः शिखा ज्वाला तस्या अग्रं तद्वत्तालुकं यस्याः सा । किंभूतं फलं स्वाश्रितेति । स्वया विष्ट्याऽऽश्रितं विहितं कर्म तस्य सिद्धिस्तस्यां जातं भद्रायां कृतकार्यनिष्पत्तिजातम् । अतो हेतोर्नरैस्तदाश्रितं विष्टिवेलाप्राप्तं मङ्गलमुद्वाहादिकं न विधेयं न कर्त्तव्यम् । किंभूतैर्नरैः स्वात्मेति । स्वात्मने जीवाय हिता हितकारिणी उपलब्धिर्बुद्धिः प्राप्तिर्ज्ञानं वा येषां ते तैरिति । "उपलब्धिर्भवेज्ज्ञाने तथा प्राप्तिमनीषयोः"-इति 'महीपः' ॥ ८ ॥

अथ विष्टिभोग्यकालमाह ।

पक्षे वलक्षे शभवैवमुत्तरे
तिथेर्मिता या निगमैर्भवैर्दले ।
स्यात् पञ्चदश्या विषभृन्मितातिथे-
र्धरोनितायाः शितिभे च साधके ॥ ९ ॥

पक्षे इति । वलक्षे शुक्लपक्षे निगमैर्वेदैश्चतुर्भिश्च पुनर्भवै रुद्रैरेकादशभिर्मिता या नाड्यस्तिथेश्चतुर्थ्या एकादश्या उत्तरे दले शात् शिवाद्भवतीति शभवा भद्रा स्यात् । च-पुनरेव चतुर्दश्याः पूर्णिमायाः । च-पुनर्विषभृता सर्पेण मिता चासौ आसमस्ता तिथिश्च विषभृन्मितातिथिस्तस्या अष्टम्याः आद्यके प्रथमे दले शभवा स्यात् । च-पुनः शितिः कृष्णा भा कान्तिर्यस्मिन् स तस्मिन् शितिभे कृष्णपक्षे धरोनिताया एकेन रहितायाः पूर्वोक्तचतुर्थ्यादितिथेस्तृतीयाया दशम्या उत्तरे दले । पुनश्चतुर्दश्याः सप्तम्याः प्रथमे दले सा भद्रा स्यादित्यर्थः ॥ ९ ॥

नेष्टाः सदाऽशेषविनाडिका वरं
चैके बुधाः पुच्छघटीत्रयं जगुः ।
तस्या वरामह्नपरार्धगा तिथे-
र्यां तामसन्तो निशि चादिगा परे ॥ १० ॥

नेष्टेति । सदा बुधाः क्रियाविधौ तस्या भद्राया अशेषाः समस्ता घटीरिष्टाः श्रेष्ठा न जगुर्नोचुः । बुधा अस्याः पुच्छं घटीत्रयं वरं जगुः । अथ केषां चिन्मतमाह ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपरेऽसन्तोऽमेधसो या भद्रा तिथेरपरार्धगा उत्तरदलस्थिताऽस्ति तामहि दिने श्रेष्ठां जगुः। पुनर्या भद्रा तिथेरादिगा पूर्वदलस्थिताऽस्ति तां निशि रात्रौ वरां जगुः।

अथास्याः पुच्छविवेकतामाह।

भैः पञ्चभिर्दस्रकुभिर्नखैः स्या-
दस्या घटीभ्यः क्रमतो मिताभ्यः।
घटीत्रयं लूनलतापरं च
सितेऽसिते चोत्क्रमतोऽपि भैभ्याः॥ ११॥

भैरिति। सिते शुक्लपक्षे चतुर्थ्यां भैः सप्तविंशत्या मिताभ्यो घटीभ्यः सकाशादस्या भैभ्या विष्टेरपरं घटीत्रयं लूनलता स्यात्। क्रमत एवमष्टम्यां पञ्चभिर्मिताभ्यो घटीभ्य एकादश्यां दस्रकुभिर्द्वादशभिर्मिताभ्यः। पूर्णिमायां नखैर्विंशत्या मिताभ्यः। च-पुनरसिते कृष्णपक्षे उत्क्रमतो वैपरीत्यचलनेनापि तृतीयायां विंशत्या मिताभ्यः। सप्तम्यां द्वादशाभिर्मिताभ्यः। दशम्यां पञ्चभिर्मिताभ्यः। चतुर्दश्यां सप्तविंशत्या मिताभ्यो घटीभ्योऽपरं घटीत्रयं लूनलता स्यात्। भीमात् ईशात् भवा भैभी। "भीमभर्गौ"-इति 'हैमः'। लूनलताशब्दोऽस्मिन् ग्रन्थे बहुस्थाने पुच्छवाचको दृश्यते। महाकविप्रोक्तत्वात् प्रमाणम्॥ ११॥

अथास्या देहविभागमाह।

निजः षडंशो लपनं गलः स्यात्
त्रिंशल्लवस्त्र्यंश उरोऽङ्गभागः।
नाभिः कटिर्मार्गणभागकोऽस्याः
शेषं च लाङ्गूललतेशजायाः॥ १२॥

निजेति। अस्या ईशाज्जायते इति ईशजा तस्या भद्राया निजः स्वीयः शरीरापेक्षया षडंशः षष्ठो भागः पञ्चघट्यो लपनं वदनं स्यात्। एवं त्रिंशल्लवस्त्रिंशत्तमो भागः एका घटी गलः कण्ठः। त्र्यंशस्तृतीयो भागो दश घट्य उरो हृदयम्। अङ्गभागः षष्ठो भागः पञ्च घट्यो नाभिः। मार्गणभागकः पञ्चमो भागः षड्घट्यः कटिः। शेषं त्रिभिर्घट्यो लाङ्गूललता पुच्छलतेति॥ १२॥

अथ न्यूनाधिकभद्रायां भागविवेकतामाह।

मयोदितो वर्ष्मविभाग एव
त्रिंशद्घटीप्रस्थमितौ हि सत्याम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शयोऽपरैर्युक्तियुतो न सद्भि-
र्मान्यो निरुक्तोऽयमतः सदाऽस्यः ॥ १३ ॥

मयेति । हीति युक्तार्थे । त्रिंशद्घटीतुल्यमितौ भद्रायां सत्यां सदा मयाऽस्या भद्राया एव वर्ष्मविभागः शरीरविभाग उदितः कथितः । अतः करणादपरैरनसद्भिर्विबुधैरस्याः सोऽयं विभागो मान्यो ग्राह्यः । सः कः । यो युक्तियुतो निरुक्तः कथितः । कोऽर्थः । यदा भद्रा नूनाधिका स्यात् तदा भागोऽपि तत्सदृशो भवेत् ॥ १३ ॥

अथ भद्राङ्गविभागफलमाह ।

विलीयतेऽर्थो लपने लयो गले
तस्मादुरस्यर्थनिमीलनं कलिः ।
नाभौ धियोऽरं विलयः कटिस्थले
लूने च विष्टेर्विजयोऽनिशं भवेत् ॥ १४ ॥

विलीति । अनिशं निरन्तरम् । विष्टेर्लपने मुखेऽर्थः कार्यं विलीयते विनाशमुपैति । तस्मात् तदनन्तरं गले कण्ठे लयो मृत्युर्भवेत् । उरसि हृदि अर्थस्य पदार्थस्य निमीलनं हानिर्भवेत् । नाभौ कलिः क्लेशः । अरं शीघ्रम् । कटिस्थले धियो बुद्धेर्विलयो नाशः । लूने पुच्छे विजयो भवेत् । च-पुनरर्थः । विलीयते कर्त्तरिप्रयोगः । लयश्चेति क्षयवाचकः । उक्तं च 'लघुस्तवे' । "लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽन्यमी"-इति ॥ १४ ॥

अथ विष्टेः स्थितिवर्त्तनमाह ।

रसातलस्था तिमिकार्मुकाङ्गना-
घटस्थिते राजनि भूमिगा भवेत् ।
द्विरेफगे द्वन्द्वनखायुधानुगे
विष्टिर्दिवस्था ननु शेषराशिगे ॥ १५ ॥

रसेति । ननु निश्चितम् । तिमिर्मीनराशिः । कार्मुको धनुः । अङ्गना कन्या । घटस्तुला । एषां द्वन्द्वे । एषु स्थिते राजनि चन्द्रे सति विष्टी रसातलस्था पातालस्था भवेत् । द्विरेफोऽलिर्वृश्चिकः । गौर्वृषः । द्वन्द्वो मिथुनम् । नखायुधः सिंहः । एषां द्वन्द्वे । एतान् राशीननुगः प्राप्तस्तस्मिन् राजनि एतद्राशिगते चन्द्रे विष्टिर्भूमिगा भवेत् । शेषराशिगे मेषकर्कमकरकुम्भगते राजनि विष्टिर्दिवस्था स्वर्गस्थिता भवेदित्यर्थः ॥ १५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ विष्टिगत्यभिमुखमाह ।

सा याति मन्वह्यगतिथ्युदन्व-
दिगीश्वरोषर्बुधसंमितादिषु ।
तिथिष्वनिष्टाऽभिमुखी यथेय-
मैन्द्र्याननाशाभ्य इति क्रमं स्यात् ॥ १६ ॥

सा येति । मनुश्चतुर्दश । अहिरष्ट । अगः सप्त । तिथिः पञ्चदश । उदन्वान् समुद्रश्चत्वारः । दिक् दश । ईश्वर एकादश । उषर्बुधोऽग्निस्त्रयः । एषां द्वन्द्वे एभिः संमितासु प्रमितासु तिथिषु सा विष्टिरैन्द्र्याननाशाभ्यः पूर्वप्रमुखकाष्ठाभ्य इति यथाक्रमं याति गच्छति । यथा चतुर्दश्यां पूर्वाभिमुखी । अष्टम्यामग्निदिग्मुखी । सप्तम्यां दक्षिणाभिमुखी । पूर्णिमायां नैर्ऋत्याभिमुखी । चतुर्थ्यां पश्चिमाभिमुखी । दशम्यां वायव्याभिमुखी । एकादश्यामुत्तराभिमुखी । तृतीयायामीशनाभिमुखी इति । इयं विष्टिरभिमुखी अनिष्टा स्यात् ॥ १६ ॥

अथ विशेषत आह ।

वार्वीतिहोत्रस्वपयातुधान-
कृत्यम्बरप्रेतपकेन्द्रदिक्षु ।
भद्राननं भीतिवहं निरुक्तं
कृत्योद्यतानामृषिभिः क्रमेण ॥ १७ ॥

वार्वीति । ऋषिभिः क्रमेण कृत्येषु कार्येषूद्यमो येषां ते तेषां पुंसां भीतिवहं भयकारि भद्राननं विष्टिमुखं निरुक्तं प्रोक्तम् । कासु वारादिदिक्षु । वार्जलम् । वीतिहोत्रोऽग्निः । स्वं धनम् । एषां द्वन्द्वे । एतानि पान्तीति एतेषां द्वन्द्वे प्रत्येकं संयोजनात् । जलपो वरुणः । अग्निपोऽग्निदेवः । स्वपो धनपतिः । यातुधानो राक्षसः । कृत्तिश्चर्मैवाम्बरं यस्य स कृत्यम्बरो रुद्रः । प्रेतपो यमः । को वायुः । इन्द्रः सुरपतिः । एषां द्वन्द्वे । एषां दिक्षु । स्पष्टार्थस्तु चतुर्थ्यां पश्चिमायां भद्राननम् । एवमष्टम्यामाग्नेय्याम् । एकादश्यामुत्तरस्याम् । पूर्णिमायां नैर्ऋत्याम् । तृतीयायामैशान्याम् । सप्तम्यां दक्षिणस्याम् । दशम्यां वायव्याम् । चतुर्दश्यां पूर्वस्याम् । ग्रन्थान्तरे तु यावत्संख्यादिक् तावत्संख्यामिते प्रहरे भद्रामुखम् । यथा चतुर्थ्यां पाश्चिमायां चतुर्थे प्रहरे एवं सर्वमपीति दृश्यते ॥ १७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ यामार्धमाह।

क्षमया च दोर्भ्यामिषुभिः शिवैरिनै-
र्मितं रवौ यामदलं वरं विदुः।
विधौ भुवाऽङ्कैरहिभिर्दिनैरिनै-
र्द्वाभ्यां सभद्रं स्वरशास्त्रदर्शिनः॥ १८॥

क्षमयेति। स्वरशास्त्रदर्शिनः स्वरशास्त्रज्ञाः। रवौ वारे क्षमयैकेन दोर्भ्यां द्वाभ्यां इषुभिः शिवैरेकादशभिरिनैर्द्वादशभिर्मितं यामदलं प्रहरार्धं वरं विदुरवधारयन्ति। एवं विधौ चन्द्रे भुवैकेनाङ्कैर्नवभिरहिभिरष्टाभिर्दिनैः पञ्चदशभिरिनैर्द्वादशभिर्द्वाभ्यां मितं सभद्रं कल्याणसहितं यामदलं विदुः॥ १८॥

अङ्कैरगैरग्निभिरंशुभिर्युगै-
र्दिग्भिर्नृपैः स्याच्च समं शुभं कुजे।
षष्ठं द्वितीयं दशमं बुधे गुरौ
तदक्षदोरङ्कदशाहिसंख्यया॥ १९॥

अङ्कैरिति। कुजे भौमदिने अङ्कैर्नवभिः। अङ्कैः सप्तभिः। अग्निभिस्त्रिभिः। अंशुभिर्द्वादशभिः। युगैश्चतुर्भिः। दिग्भिर्दशभिः। नृपैः षोडशभिः। समं सदृशं यामार्धं शुभं स्यात्। बुधे षष्ठं द्वितीयं दशमं यामार्धं शुभं स्यात्। गुरौ अक्षाः पञ्च। दोर्भुजौ द्वौ। अङ्का नव। दश। अहयोऽष्टौ। एषां द्वन्द्वे। एषां संख्याया समं मितं तद्यामार्धं शुभं स्यात्॥ १९॥

शराङ्गदिग्विश्वदिनेन्द्रनागै-
र्भृगावभिन्नानि शुभान्यशंसन्।
शशाङ्कविश्वेन्द्रनृपेन्द्रियैश्च
यामार्धकानीह शनौ स्वरज्ञाः॥ २०॥

शरेति। इह स्वरज्ञा भृगौ शुक्रदिने शरादिभिरेषां द्वन्द्वे। एभिः पञ्चषड्दशत्रयोदशपञ्चदशचतुर्दशाष्टभिरभिन्नान्यविच्छिन्नानि प्रमितानि यानि यामार्धकानि तानि शुभानि अशंसन्। शंस् कथनेऽकथयन्। च-पुनरेव स्वरज्ञाः शनौ शशाङ्कादिभिरेषां द्वन्द्वे एभिरेकत्रयोदशचतुर्दशषोडशपञ्चभिः प्रमितानि यामार्धानि शुभानीत्यर्थः॥ २०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ शार्दूलविक्रीडितेन पूजाविशेषादौ विष्टिं शुभामाह ।

विष्टिः स्याद्धरितालिकार्चनविधावुत्सर्गजातक्रिया-
वैमेयेषु शिवार्चयोः फलवती होमे सदैवार्चने ।
सोपाकर्महुताशनीजलधरार्चापाकयज्ञक्रिया-
स्वारब्धेऽध्वरकर्मणीष्टयजने भूपप्रदाने तथा ॥ २१ ॥

विष्टिरिति । विष्टिर्हरितालिकार्चनविधौ । भाद्रपदशुक्लतृतीया हरितालिकाभिधा । तस्या व्रतपूजाविधाने सदैव फलवती फलदायिनी स्यात् । एवमुत्सर्गजातदिषु । उत्सर्गो नीलोद्वाहः । जातक्रिया शिशूनां घृतप्राश्यसंस्कारक्रिया । वैमेयो विधिमयः । एषां द्वन्द्वे एषु । च-पुनः शिवार्चयोः शम्भुगौर्योरर्चने पुनर्होमे । पुनरुपाकर्म प्रथममारभ्यमाणं श्रावणीकर्म । हुताशनी होलिका । जलधरा जलाशयकूपादयः । तेषामर्चा प्रतिष्ठा । पाकः पचनम् । यज्ञः । एषां द्वन्द्वे । एषां क्रियासु पुनरारब्धे प्रारम्भितेऽध्वरकर्मणि यज्ञकृत्ये तथा इष्टयजने तथा भूपप्रदाने राज्ञा वस्तूनि फलवती स्यात् ॥ २१ ॥

अथानुष्टुभा पूजाहेतुना विष्टिं शुभामाह ।

भद्राविहितकार्याणां नृपभूदेवताज्ञया ।
नृणां सफलयत्यर्थं सा वा भर्गसपर्यया ॥ २२ ॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे
भद्राध्यायस्तृतीयः ।

भद्रेति । सा विष्टिः भद्रा । भद्रायां विहितं निर्मितं कार्यं यैस्ते तेषां नृणां पुरुषमर्थं पदार्थं सफलयति सफलं करोति । कया । नृपो राजा । भूदेवता विप्रः । एतयोराज्ञयाऽऽदेशेन भर्गसपर्यया शम्भुपूजया वेत्यर्थः ॥ २२ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुन्दरश्रीमहिमाप्रभुसूरीश्वरचरणसरोरुहचञ्चरीकायमानशिष्यभावरत्नविरचितायां श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां भद्राध्यायस्तृतीयः ।

गच्छे श्रीमहिमाप्रभाख्यसुगुरोः श्रीपौर्णिमीयाभिधे
शिष्यः सूरिवरस्य माण्डणसुतो यो भावरत्नाह्वयः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बाल्यां कुक्षिसमुद्भवः सुकृतवान् श्रीपत्तने पत्तने
छन्दोव्याकरणाभिधस्मरणतोऽलङ्कारयुक्तामिमाम् ॥ १ ॥

अथ चतुर्थोऽध्यायः।

तत्र प्रथममुपजातिभ्यामाह।

सुयोगवत्याश्रितपर्वकाला तिथिर्भवेन्मङ्गलकार्यहन्त्री।
पर्वाण्यथो मङ्गलसिद्धयेऽहं तच्छुद्धये वच्मि विपर्वदोषात् ॥ १ ॥

सुयोगेति। सुयोगवती शुभयोगयुक्ताऽपि तिथिर्मङ्गलसिद्धिहन्त्री। उद्वाहादिकार्यनिष्पत्तिविनाशिनी भवेत्। किंविशिष्टा तिथिराश्रितपर्वकाला कुह्वादिपर्ववेलायुक्ता। अतः कारणादहं पर्वाणि वच्मि ब्रवीमि। किमर्थं विपर्वदोषात्। विगतपर्वदोषात्। मङ्गलसिद्धये विवाहादिकार्यनिष्पत्त्यै। किंभूतायै। तस्यास्तिथेः शुद्धिर्यस्यां सा तच्छुद्धिस्तस्यै ॥ १ ॥

अथ पर्वाण्याह।

कुहूसिनीवाल्यपि रोहिणीविभा-
वदर्शिते दर्शितमण्डले क्रमात्।
स्तोऽमाऽनुमत्यह्नि च पौर्णिमास्यथो
राका रजन्यामुदिते विधाविह ॥ २ ॥

कुहूरिति। क्रमादनुक्रमेण अदर्शिते दृष्टमण्डले च रोहिणीविभौ। चन्द्रे सति कुहूः सिनीवाली द्वे अपि अमावास्ये स्तो भवतः। यदुक्तं 'हेमचन्द्रपादैः'। "सा नष्टेन्दुः कुहूर्दृष्टेन्दुः सिनीवाली"-इति। अथो च-पुनरिह विधौ चन्द्रेऽह्नि दिवसे उदिते रजन्यामुदिते च सति अनुमती राका द्वे अपि पूर्णिमे स्तः। यदुक्तम्। "कलाहीने त्वनुमती राका पूर्णे निशाकरे"-इति ॥ २ ॥

अथ वंशस्थेन ग्रहणमाह।

ग्रहस्थयोरत्ररिसंज्ञयोर्मिथः
स्वरिष्फयो राहुतुषाररोचिषोः।
किलैकराश्योः समसप्तमस्थयो-
र्भवेत् सदैवं ग्रहपर्वसम्भवः ॥ ३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्रहेति। किलेति सम्भावनायाम्। अत्तृरिसंज्ञयोः। अत्ता च अरिश्च अत्तृ
तौ संज्ञे ययोस्तौ तयोर्मृत्युरिपुसंज्ञयोः। पुनः स्वरिष्फयोर्धनव्ययोर्मिथः परस्परग
ग्रहस्थयो राशिस्थितयो राहुतुषाररोचिषो राहुचन्द्रयोः सतोः सदैवं ग्रहपर्वसम्भ
भवेत्। पुनः किंविशिष्टयो राहुचन्द्रयोरेकराश्योरेको राशिर्ययोस्तौ तयोः सतोस्तदा
अयं स्यात्। पुनः किंभूतयो राहुचन्द्रयोः। समसप्तमस्थयोरुभयतः सप्तमरा
स्थितयोः सतोस्तदाऽप्ययं स्यात् ॥ ३ ॥

अथोपजात्या ग्रहणकालमाह।

अमावसानं दिवसे रजन्या-
मन्तो यदि स्यात् सितपञ्चदश्याः।
तदोपरागं गणितादरम्यं
स्पष्टं शुभे कर्मणि चापि साध्यम् ॥ ४ ॥

अमेति। यदि चेत् दिवसेऽमावसानममावास्यान्तः स्यात्। एवं रजन्याः सित
श्चदश्याः शुक्लपौर्णिमाया अन्तः स्यात्। तदा गणितात् गणितमार्गादुपरागं ग्रहणं स्या
म्। किंलक्षणमुपरागम्। शुभे कर्मण्यरम्यं निन्द्यम्। अत एव च-पुनः शुभे कर्मणि
दैवाज्जाते साध्यं शान्तिकर्म कर्त्तव्यम्। अथ वाऽत्र निमित्तार्थे सप्तमी। शुभनिमि
तदवसरे साध्यं दानं देयमित्यर्थः ॥ ४ ॥

अथोपेन्द्रवज्रया हुतभं कियत्पर्यन्तं हेयं तदाह।

यदंशुदोषेश्वरपर्वसंस्थं
भमेव यावन्न हि तावदर्हम्।
दिवौकसां यामचतुष्टयं स्या-
च्छयाग्रहाद्याखिलमङ्गलेषु ॥ ५ ॥

यदमिति। यावद्दिवौकसां देवानां यामचतुष्टयं मासषट्के अंशुः सूर्यो दोषा
रात्रेरीश्वरश्चन्द्रस्तयोः पर्वसंस्थं ग्रहणवेलागतं यद्भं नक्षत्रं स्यात्। तावत्कालपर्यन्त
मेव तन्नक्षत्रमर्हं योग्यं न हि स्यात्। केषु। शयो हस्तस्तस्य ग्रहः पाणिग्रहणं तदाद्या
नि अखिलानि मङ्गलानि तेष्वित्यर्थः ॥ ५ ॥

अथोपजात्या न्यूनाधिकग्रहणे हेयदिनविवेकतामाह।

कृत्स्ने त्रिपादे शकलेऽङ्गितुल्ये
क्रमाद्रवीन्द्वोर्ग्रहणे सुकार्यम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कार्यं नगैः पञ्चभिरर्णवैश्च
रामैरपास्यैवमितान्यहानि ॥ ६ ॥

कृत्स्ने इति। रवीन्द्वोः कृत्स्ने सम्पूर्णे ग्रहणे विबुधैर्नगैः सप्तभिर्मितान्यहानि दिनान्यपास्य विहाय सुकार्यं शुभकृत्यं कर्त्तव्यम्। एवं क्रमात्। विपादे विगतः पादश्चतुर्थांशस्तस्मिन् पादत्रये ग्रहणे पञ्च दिनानि। शकलेऽर्धे ग्रहणे चतुर्दिनानि। अङ्घ्रितुल्ये एकपादमिते ग्रहणे त्रिदिनानीति स्पष्टम् ॥ ६ ॥

अथ क्रूराक्रान्तभमाह।

भुक्तं युतं भोग्यमसाधुना भं
दिवौकसा विद्धमथाहवस्थम्।
खपान्थयोर्भेदितमण्डलं वा
ज्ञेयं तदुत्पातहतं ग्रहज्ञैः ॥ ७ ॥

तदोचितं मङ्गलके तदृक्षं
यदेन्दुराक्रम्य पुनर्भुनक्ति।
आमासषट्कं ग्रहयोगगं तत्
सदूषणं केचिदुशन्त्यथार्क्षम् ॥ ८ ॥

भुक्तमिति। तदो इति युग्मम्। ग्रहज्ञैर्मङ्गलके विवाहादौ तदा उचितं भं ज्ञेयम्। किंविशिष्टं भम्। असाधुना क्रूरेण दिवौकसा ग्रहेण भुक्तं गतकाले। अथ वा युतं वर्त्तमानकाले। अथ वा भोग्यं समीपागामिकाले। अथवा विद्धं पञ्चसप्तशलाकायन्त्रे। अथ वाऽऽहवस्थं संग्रामस्थितम्। अथ वा खपान्थयोर्ग्रहभेदितमण्डले। अथ वा तदुत्पातहतं तेषां प्रसिद्धानां दिव्यभौमान्तरिक्षाणामुत्पातस्तदुत्पातस्तेन हतम्।

यदुक्तम्।

"क्रूरैर्युक्तं क्रूरगन्तव्यमृक्षं क्रूराक्रान्तं क्रूरविद्धं वा नेष्टम्।
यच्चोत्पातैर्दिव्यभौमान्तरिक्षैः पुष्टं तद्वत् क्रूरलक्षाहतं च" ॥

तदा कदा। यदा इन्दुराक्रम्य तन्नक्षत्रं पुनर्भुनक्ति। अथ केचिदाचार्या आमासषट्कं ग्रहयोगगं ग्रहणसंयोगप्राप्तं तत् ऋक्षमेव आर्क्षं सदूषणं दोषसहितमुशन्तिवाञ्छन्ति ॥ ७-८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तारकाणां तारकसंख्यामाह ।

हुताशनाग्न्यङ्गशराग्निभूमयो
युगाग्निबाणाक्षयमा यमेषवः ।
धरेन्दुवेदार्णवरामशम्भवो
वार्यग्निरामाब्धिशताक्षिदृग्रदाः ॥ ९ ॥

मयोदितास्तारकतारका इमे
क्रमेण नासत्यभतः स्वकर्मगाः ।
भाश्चर्यनिध्यानकहेतवे तथा
वक्ष्ये भरूपध्रुवसायकानहम् ॥ १० ॥

हुतेति । मयोदितेति । युग्मम् । मया नासत्यभतोऽश्विनीनक्षत्रात् क्रमेण हुताशनाग्न्यादिसंख्याका इमे तारकतारका उदिताः कथिताः । तारकाणां नक्षत्राणां तारकास्तारास्तारकतारकाः । किंविशिष्टास्ते । स्वकर्मगा निजकार्यानुगताः । स्पष्टमाह। अ३, भ३, कृ६, रो५, मृ३, आ१, पु४, पु३, आ५, म५, पू२, उ२, ह५, चि१, स्वा१, वि४, अ४, ज्ये३, मू११, पू४, उ३, श्र३, ध४, श१००, पू२, उ२, रे३२ इति । अथ भरूपध्रुवसायकानाह । अहं तथा तेन प्रकारेण भरूपादीन् वक्ष्ये कथयिष्ये । भानां नक्षत्राणां रूपाण्याकाराः । ध्रुवा राश्याद्याश्च सायका बाणाश्चेति द्वन्द्वे प्रत्येकं संयोजनत्वात् तान् । कस्मै भाश्चेति । भांसां दीप्तानां चर्यं स्वरूपम् । भाश्चर्यस्य निध्यानकं तस्य हेतुस्तस्मै ॥ ९-१० ॥

अथ प्रथमं काव्यचतुष्केन भरूपमाह ।

हयाननाभं च वराङ्गरूपं
क्षुरोपमं ज्योतिरनःप्रकामम् ।
कुरङ्गकाभं मणिना सदृक्षं-
निकेतनाकारमथेषुरूपम् ॥ ११ ॥

हयेति । इहास्मिन् शास्त्र इति तारापटलस्वरूपं नक्षत्रमण्डलं रूपमुक्तम् । इतीति किं तदाह । ज्योतिर्नक्षत्रमश्विन्यादि । अश्विनीभं हयस्याश्वस्याननस्य मुखस्याभा इवाभा यस्य तत् तुरङ्गमुखाकारम् । भ,वराङ्गरूपं योन्याकारम् । कृ,क्षुरोपमं मुण्डनो-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पकरणाकारम्। रो,अनःप्रकामं शकटोपमम्। मृ,कुरङ्गस्य मृगस्य कं मस्तकं तद्वदाभा यस्य तत् मृगमूर्धाकारम्। आ,मणिना रत्नेन सदृक्षं समानम्। पु,निकेतनाकारं गृहाकारम्। पु,इषुरूपं बाणाकारम्॥ ११॥

रथाङ्गशालाशयनोपमानि
शय्यासमं दोःप्रतिमं भमुक्तम्।
मुक्तात्मकं विद्रुमतोरणाभे
मणिश्रवोवेष्टनतुल्यरूपे॥ १२॥

सकोपकण्ठीरवविक्रमप्रभं
तल्पाकृतीभस्य विलासवत् स्थितम्।
शृङ्गाटकव्यक्ति च तार्क्ष्यकेतुभं
त्रिविक्रमाभं च मृदङ्गसन्निभम्॥ १३॥

आ,रथाङ्गं चक्रं तद्वदुपमम्। म, शालोपमम्। पू,फ,शयनोपमं मञ्चकोपमम्। अत्रैषां द्वन्द्वे प्रत्येकं संयोजनात्। उ,फ,शय्यासमम्। ह,दोःप्रतिमं हस्तसदृशम्। चि,मुक्तात्मकं मौक्तिकसदृशम्। स्वा,विद्रुमाभं प्रवालाकारम्। वि,तोरणाभम्। अनयोर्द्वन्द्वे द्विवचनम्। अ,मणितुल्यरूपम्। ज्ये,श्रवसः कर्णस्य वेष्टनं कुण्डलं तत्तुल्यम्। अनयोर्द्वन्द्वे द्विवचनं प्रत्येकं योजनीयम्। मू,कोपेन सह वर्त्तमानः सकोप एवंविधो यः कण्ठीरवः सिंहस्तस्य विक्रमप्रभमुत्पतनोद्यमतुल्यम्। पू,तल्पाकृति मञ्चकाभम्। उ,इभस्य गजस्य विलासवत् स्थितम्। अ,शृङ्गाटकव्यक्ति जलकन्दाकारम्। तार्क्ष्यकेतुर्विष्णुस्तद्भं श्रवणस्त्रिविक्रमाभं विष्णुचरणाकारम्। ध,मृदङ्गसन्निभम्॥१२-१३॥

ज्योतिः शताङ्गाङ्गसमानरूपं
ततोऽन्यदृक्षं यमलद्वयाभम्।
शय्यासवर्णं मुरजप्रकाम-
मितीह तारापटलस्वरूपम्॥ १४॥

ज्योतिः शतभिषक्। शताङ्गं रथस्तस्याङ्गं चक्रं तेन समानरूपं चक्रसदृशम्। "शताङ्गः स्यन्दने रथे"-इति 'हैमः'। ततोऽन्यदृक्षम्। पू,यमलद्वयाभं यमलोद्गतत-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हृदयसदृशम्। उ,शय्यासवर्णं तल्पसमानम्। रे,मुरजप्रकामं मृदङ्गसमानमिति। चकाराः पुनरर्थाः ॥ १४ ॥

अथ तारकतारकाणां स्थानमाह।

ज्ञेयाः सदैवोत्तरपार्श्वसंस्था
विश्वार्यमाम्भोऽजपदिन्दुभानाम्।
द्विदैवतस्यापि च योगतारा
बुधैरहिर्बुध्न्यभगादिभानाम् ॥ १५ ॥

ज्ञेया इति। बुधैरहिर्बुध्न्यभागादिभानामुत्तरभाद्रपदपूर्वफल्गुन्यश्विनीनां च पुनर्विश्वे उत्तराषाढा। अर्यमा उत्तरफाल्गुनी अम्भो जलं पूर्वाषाढा। अजपत् पूर्वभाद्रपदा। इन्दुभं मृगशीर्षम्। एषां द्वन्द्वे। एषां पुनर्द्विदैवतस्य विशाखाया। योगतारास्ताराणां योगः स योगो योगताराः सदैव उत्तरपार्श्वसंस्था उत्तरदिक्समीपस्था इत्यर्थः ॥ १६ ॥

प्राचीनवर्हिश्वसनाशनाशन-
ध्वजेज्यमित्राग्रजराजयोषिताम्।
विलोकनीया ननु मध्यमास्तथा
वसूडुनः पश्चिमभागसंस्थिताः ॥ १६ ॥

प्राचीति। ननु निश्चितम्। बुधैः प्राचीनवर्हिरिन्द्रो ज्येष्ठा। श्वसनो वायुः सर्पऽशनं यस्य स श्वसनाशनः सर्पः स एवाशनं यस्य स श्वसनाशनाशनो गरुडो ध्वजश्चिह्नं यस्य स श्वसनाशनध्वजो विष्णुः श्रवणः। ईज्यः पुष्यः। मित्रोऽनुराधा। अग्रजा विप्रास्तेषां राजा चन्द्रस्तस्य योषितः स्त्रियो नक्षत्राणि। आसां द्वन्द्वे। अत्र प्राचीनवर्ह्यादीनामग्रजराजयोषितो नक्षत्राण्येवं समासो घटते तथापि स्वाम्यग्रे नक्षत्रनामस्थापना सुबोधत्वादेव वक्ष्यमाणाधिकारेऽपि ज्ञातव्यम्। तथा वसूडुनो धनिष्ठाया मध्यभागास्ताराः पश्चिमभागसंस्थिता विलोकनीयाः। "अग्राभ्यां जातिजन्मजाः"-इति 'हैमः' ॥ १६ ॥

पित्रन्तकोषर्बुधपूषभाना-
माशागताहंसभुवोऽथ तारा।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नक्तञ्चरादित्यहितारकाणा-
मैन्द्र्याश्रिता धातुरथोडुनः स्यात् ॥ १७ ॥
द्वितीया योगतारा स्यात् प्रतीच्युत्तरतारयोः।
पश्चिमार्कोडुनो याऽसाऽवशेषाणां यथाप्रति ॥ १८ ॥

पित्रति। पितरो मघा। अन्तको भरणी। उषर्बुधोऽग्निः कृत्तिकाः। पूषभं रेवती। एषां द्वन्द्वे। एषां ताराः। हंसात् सूर्याद्भवतीति हंसः सूर्यस्तस्याशा दक्षिणा ततो ज्ञेयाः। नक्तञ्चरो राक्षसो मूलम्। अदितिः पुनर्वसु। अहितारका आश्लेषा आसां द्वन्द्वे। आसां ताराणां तारा ऐन्द्र्याश्रिताः पूर्वदिग्गता ज्ञेयाः। अथ धातुर्ब्रह्मण उडुनो रोहिण्या या द्वितीया तारा पुनरर्कोडुतो हस्तस्य या पश्चिमा चरमा ताराऽस्ति सा प्रतीच्युत्तरतारयोः पश्चिमदिगुत्तरदिग्गततारयोर्योगतारा स्यात्। प्रतीच्युत्तरयोरत्र सम्बन्धे षष्ठी। अवशेषाणां नक्षत्राणां तारा यथाप्रति यथायोग्यं स्थानं ज्ञातव्याः। या एकतारा द्वयोर्नक्षत्रयोस्तारकाणां मध्ये गणनां प्राप्नोति सा योगतारा कथ्यते। अत्र विस्तरेण ग्रन्थान्तराच्चिन्त्यमित्यर्थः ॥ १७-१८ ॥

अथ काव्यत्रयेण भ्रुवकांशानाह।

कुम्भीनसा भूमियमागजाग्नय-
स्ताना द्वितर्का रसषड्युगग्रहाः।
षडम्बरोर्व्योऽङ्गदिशोऽङ्गहेलयो
भुजङ्गमेन्द्राः शरमार्गणेन्दवः ॥ १९ ॥

कुम्भीति। आदिभादश्विनीतो ध्रुवकांशका ध्रुवलवाः क्रमेण स्युः। कतिसंख्यकास्तानाह। अ,कुम्भीनसाः सर्पा अष्टौ। "कुम्भीनसाशीविषदीर्घपृष्ठाः"-इति 'हैमः'। भ,भूमियमा एकविंशतिः। कृ,गजाग्नयोऽष्टत्रिंशत्। रो,तानाः सङ्गीतशास्त्रप्रसिद्धा एकोनपञ्चाशत्। मृ,द्वितर्का द्वाषष्टिः। आ,रसषट् षट्षष्टिः। पु,युगग्रहाश्चतुर्नवतिः। पु,षट् च अम्बरं च उर्वी च षडम्बरोर्व्यः षडधिकशतम्। म,अङ्गहेलय एकोनत्रिंशदधिकशतम्। पू-फ,भुजङ्गमेन्द्रा अष्टाचत्वारिंशदधिकशतम्। उ-फ,शरमार्गणेन्दवः पञ्चपञ्चाशदधिकशतमित्यर्थः ॥ १९ ॥

खाग्न्यष्टयो रामभुजङ्गमेन्दवो-
ऽह्यङ्गेन्दवो लोचनभूमिबाहवः।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 1818

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जिनाश्विनो व्योमहुताशनाश्विनो
द्व्यब्ध्यश्विनो मार्गणमार्गणाश्विनः ॥ २० ॥

ह,खाग्न्यष्टयः सप्तत्यधिकशतम् । चि,रामभुजङ्गमेन्दवस्त्र्यशीत्यधिकशतम् । स्वा,अह्यङ्केन्दवोऽष्टनवत्यधिकशतम् । वि, लोचनभूमिबाहवो द्वादशाधिकद्विशतम् । अजिनाश्विनश्चतुर्विंशत्यधिकद्विशतम् । ज्ये,व्योमहुताशनाश्विनस्त्रिंशदधिकशतद्वयम् । मृ,द्व्यब्ध्यश्विनो द्वाचत्वारिंशदधिकशतद्वयम् । पू,मार्गणमार्गणाश्विनः पञ्चपञ्चाशदधिकशतद्वयम् ॥ २० ॥

धराङ्गदस्राश्च युगाङ्गलोचनाः
शराद्रिदोषोऽम्बरसिन्धुराश्विनः ।
नभोरदास्तत्त्वगुणा नगामराः
खमादिभाद्ध्रुवकांशकाः क्रमात् ॥ २१ ॥

उ,धराङ्गदस्रा एकषष्ट्यधिकशतद्वयम् । अभि,युगाङ्गलोचनाश्चतुःषष्ट्यधिकशतद्वयम् । श्र,शराद्रिदोषः पञ्चसप्तत्यधिकशतद्वयम् । ध,अम्बरसिन्धुराश्विनोऽशीत्यधिकशतद्वयम् । श,नभोरदा विंशत्यधिकशतत्रयम् । पू,तत्त्वगुणाः पञ्चत्रिंशत्यधिकत्रिशतम् । उ,नगामराः सप्तत्रिंशदधिकशतत्रयम् । रे,खं शून्यम् । इति ध्रुवांशकाः ॥ २१ ॥

अथ भसायकलवानाह काव्यत्रयेण ।

सौम्या दिशोऽर्का विशिखाश्च दक्षिणाः
शिलीमुखा व्योमधराः कपालिनः ।
उदग्रसाः पत्ररथायनं ततो
हरेर्दिशं वारिधिचीवराधराः ॥ २२ ॥

सौम्येति । सदा उडुनोऽश्विन्यादेर्नक्षत्रस्य अमी स्फुटाः बाणलवाः स्वापमयोतारयोः निजक्रान्तियोगतारयोरन्तरेऽन्तराले स्युरित्यन्वयः । अथ ते कथ्यन्ते । सौम्या उत्तरदिग्गाः । अ,दिशो दश बाणलवाः । एवं भ,अर्का द्वादश । कृ,विशिखा बाणाः पञ्च । रो,दक्षिणा दक्षिणदिग्गाः शिलीमुखाः पञ्च । मृ,व्योमधरा दश । आ,कपालिनः एकादश । पु,उदक् उत्तरदिग्गा रसाः षट् । पु,पत्ररथानां पक्षिणामयनं मार्गो व्योम शून्यम् । आ,हरेर्यमस्य दिशं दक्षिणं यथा स्यात् तथा वारिधिचीवराधरा वारीधि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धीयन्तेऽस्मिन्निति वारिधिः समुद्रः स एव चीवरं वस्त्रं यस्या असौ वारिधिचीवरा भूस्तां धरन्तीति वारिधिचीवराधराः पर्वता भूधराः सप्त ॥ २२ ॥

सौम्याः खमर्काश्च धनञ्जयेन्दवो-
ऽपागीश्वरा द्वावुदगद्रिवह्नयः।
याम्या धरा द्वौ दहना भुजङ्गमाः
शिलीमुखाः पञ्चलवाः क्रमादतः ॥ २३ ॥
सौम्या द्वितर्काः खगुणा रसाग्नयः
खमागमाक्षीणि नगाश्विनो नभः।
स्युरन्तरे खापमयोगतारयो-
रमी स्फुटा बाणलवाः सदोडुनः ॥ २४ ॥

म,सौम्या उत्तरदिग्गाः खं शून्यम्। पू,अर्का द्वादश। उ,धनञ्जयेन्दवोऽग्निचन्द्रास्त्रयोदश। ह, अपाग् दक्षिणदिग्गा ईश्वरा एकादश। चि,द्वौ। स्वा,उदग् उत्तरदिग्गा अद्रिवह्नयः सप्तत्रिंशत्। वि,याम्या दक्षिणगा धरा एकः। अ,द्वौ। ज्ये,दहनास्त्रयः। मू,भुजङ्गमा अष्टौ। पू,शिलीमुखाः पञ्च। उ,पञ्चलवाः। क्रमादतः।

अ,सौम्या उत्तरगा द्वितर्का द्वाषष्टिः। श्र,खगुणास्त्रिंशत्। ध,रसाग्नयः षट्त्रिंशत्। श,खं शून्यम्। पू,आगमाक्षिणी चतुर्विंशतिः। उ,नगाश्विनः सप्तविंशतिः। रे,नभः शून्यम्-इति बाणलवाः ॥ २३-२४ ॥

अथ भिन्नमण्डले नक्षत्रोत्पातमाह।

स्फुटो यदा राशिमुखो नभश्चरः
सेषुस्तदा भध्रुवकेण सेषुणा।
तज्ज्योतिषः स्याद्धि भिनत्ति मण्डलं
समः स भोत्पातमुसन्ति कोविदाः ॥ २५ ॥

स्फुट इति। यदा राशिमुखो राशिप्रमुखः स्फुटः स्पष्टः सेषुः सह इषुणा शरेण वर्त्तमानो यः स एवंविधो नभश्चरो ग्रहः सेषुणा शरसहितेन भध्रुवकेण समः सदृशः स्यात् तदा स ग्रहस्तज्ज्योतिषस्तदेव ज्योतिस्तज्ज्योतिस्तस्य नक्षत्रस्य मण्डलं भिनत्ति। कोविदाः पण्डितास्तद्भोत्पातं नक्षत्रोत्पातमुशन्ति कथयन्तीत्यर्थः ॥ २५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ ग्रहनक्षत्रसंगमाधिकारमाह ।

समागमोऽंशान्तरसंस्थयोर्भवे-
न्मिथोऽंशुयोगे च परस्परं तयोः ।
तद्गोविमर्दे मृधमर्कसंयुता
उल्लेखनं भेदयुतिर्विभेदतः ॥ २६ ॥

समेति । अंशान्तरसंस्थयोर्ध्रुवकान्तरस्थितयोस्तयोर्ग्रहनक्षत्रयोर्मिथः परस्परमंशुयोगे किरणयोगे सति समागमः सङ्गमो भवेत् । च-पुनः परस्परं तद्गोविमर्दे तयोर्ग्रहनक्षत्रयोर्गावः किरणास्तेषां विमर्दो व्यालोडनं तस्मिन् सति । मृधं युद्धं भवेत् । पुनरर्कसंयुतौ नक्षत्रसूर्ययोर्युतौ संयोगे उल्लेखनं भवेत् । तयोर्विभेदतो भेदयुतिर्भवेत् ॥ २६ ॥

अथ तद्गतं भं दूषयति ।

खगोडुनोर्वा खगयोर्द्वयोर्यद्विभेदयोगाश्रितमृक्षमर्हम् ।
नामासषट्कं शुभमङ्गले स्यादुल्लेखनाभ्यागमगं समाह्वि ॥२७॥

खगेति । खगोडुनोर्ग्रहनक्षत्रयोर्वाऽथ खगयोर्ग्रहयोर्विभेदयोगाश्रितं यदृक्षं तदृक्षं शुभमङ्गले आमासषट्कं षण्मासपर्यन्तमर्हं योग्यं न स्यात् । पुनस्तदृक्षमुल्लेखनाभ्यागमगमुल्लेखनगतं युद्धगतं च समाह्वि समायाः वर्षस्याह्वि श्चतुर्थांशस्तत्पर्यन्तं मासत्रयं शुभकार्यमर्हं न स्यात् । "अभ्यागमः समरेऽन्तिके पाते रोधेऽभ्युपागमे"-इति 'हैमः' । "समाह्वाम्"-इति कालाध्वनोर्नैरन्तर्ये द्वितीया ॥ २७ ॥

परपस्परस्थं च तयोरनादृतं
मासद्वयं यावदुडुद्वयं यथा ।
मासोरशेषासु समागमस्थितं
क्रियासु मासं यदसाध्वधिष्ठितम् ॥ २८ ॥

परस्परेति । तयोर्ग्रहनक्षत्रयोः परस्परस्थं यदुडु बुधैस्तदुडु मासद्वयं यावदादृतं न अङ्गीकृतं न । कासु । अशेषासु क्रियासु । एवं तथा समागमस्थितं नक्षत्रं मासोर्मासयोरयम् । तथाऽसाध्वधिष्ठितं क्रूरग्रहाश्रितं नक्षत्रं मासमिति शेषं योज्यम् ॥ २८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ क्रान्तिसाम्यमाह ।

स्यातां समावर्कविभावरीशयो-
र्भसोमयोर्वाऽर्कभयोरपक्रमौ ।
स्फुटौ तदाऽपक्रमसाम्यसंज्ञकं
पर्वोदितं यद्यथ पुण्यसिद्धिदम् ॥ २९ ॥

स्यातामिति । यदि चेत् अर्कविभावरीशयोः सूर्यचन्द्रयोरथ वा भसोमयोर्वाऽर्कभयोर्वा स्फुटौ समावपक्रमौ स्यातां तदा बुधैरपक्रमसाम्यसंज्ञिकं क्रान्तिसाम्यनामकं पर्व उदितं कथितम् । किंविशिष्टम् । पुण्येन दानधर्मेण सिद्धिदं पुण्यसिद्धिदम् ॥ २९ ॥

अथेन्द्रवंशया क्रान्तिचक्रमाह ।

ऐन्द्रे त्रिभागे च गते भवेत् तयोः
शेषे ध्रुवेऽपक्रमसाम्यसम्भवः ।
यद्येकरेखास्थितभेशचण्डगू
स्यातां तदाऽपक्रमचक्रबालके ॥ ३० ॥

ऐन्द्र इति । यदि एकरेखेति । एकरेखायां स्थितौ च तौ भेशचण्डगू च तौ चन्द्रसूर्यौ स्यातां तदाऽपक्रमचक्रबालके क्रान्तिचक्रे तयोश्चन्द्रार्कयोरपक्रमसाम्यसम्भवः क्रान्तिसाम्यसम्भवः स्यात् । कस्मिन् सति । ऐन्द्रयोगे त्रिभागे गते विंशतिघटीत इत्यर्थः । च-पुनर्ध्रुवे योगे शेषे त्रिभागे गते चत्वारिंशद्घटीत उपरि इत्यर्थः ॥ ३० ॥

अथेन्द्रवज्रया तच्चक्रमाह ।

याम्योत्तराः प्रागपराश्च तिस्रो
रेखा लिखेदिन्द्रदिशोऽपमाख्यम् ।
मध्यान्त्ययोर्नीडमुखं भचक्रं
चक्रं त्विदं ज्यौतिषिकैरिहोक्तम् ॥ ३१ ॥

याम्येति इति । सुधीर्याम्योत्तराः प्रागपराश्च तिस्रो रेखा लिखेत् । पुनरिन्द्रदिशः पूर्वदिग्मध्यात् भचक्रं राशिमण्डलं लिखेत् । किंभूतम् । पयसि जले नीडं स्थानं यस्य स पयोनीडो मीनराशिः स मुखमादिर्यस्य तदिति । ज्यौतिषिकैरिह इदं चक्रमपमाख्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्रान्तिसाम्यनामकमुक्तम् । "भं नक्षत्रे मेषादौ"-इति 'महीपः' । "नीडं स्थाने खगालये"-इति 'हैमः' ॥ ३१ ॥

अथोपजात्याऽस्य दुष्टफलमाह ।

निस्त्रिंशकुन्ताहतमस्ति रक्षितुं
नरं च धाता नलदग्धविग्रहम् ।
तथा निमग्नं न सरस्वति क्षमः
कृतेनसोमापमसाम्यमङ्गलम् ॥ ३२ ॥

निस्त्रिंशेति । धाता ब्रह्मा निस्त्रिंशकुन्ताहतं तीक्ष्णभल्लताडितं तथाऽनलदग्धविग्रहं वह्निज्वलितदेहं तथा सरस्वति समुद्रे निमग्नं एवविधं नरं रक्षितुं रक्षणाय क्षमः समर्थोऽस्ति । न पुनः इनसोमयोः सूर्यचन्द्रयोरपमसाम्यं क्रान्तिसाम्यमिति । इनसोमापक्रमसाम्यम् । कृतं विहितमिनसोमापक्रमसाम्ये मङ्गलं येन स तं नरमित्यर्थः ॥३२॥

अथास्यैव पक्षिरूपतामाह ।

पतेदसौ चापमसाम्यजन्मा
श्रेयोजनान् पातशकुन्तिरुर्वीं ।
विशालचक्रप्रतिमो यथैवं
नेतुं नवाभ्राल्यचिरांशुपातः ॥ ३३ ॥

पतेदिति । वेति पूर्वार्धात् पक्षान्तरेऽसौ अपमसाम्यजन्मा क्रान्तिसाम्यसंजातः पातशकुन्तिः पातलक्षणपक्षी उर्वीं भूमी पतेत् । किं कर्त्तुं श्रेयोजनान् मङ्गलाश्रितनरान् नेतुं गृहीतुमेव निश्चयेन । किंविशिष्टोऽसौ । विशालं विस्तीर्णं चक्रमायुधविशेषस्तत्सदृशः । दृष्टान्तेन द्रढयति । यथा नवा वा नवानामभ्राणां मेघानामालिः श्रेणिस्तस्यामचिरांशुस्तडित् तस्याः पात इव सोऽप्येवंविधः । "चलाशंतोऽचिरप्रभाः"-इति 'हैमः' ॥

अथ क्रान्तिगणितमाह ।

तत्संभवेऽपक्रमसाम्यमेतयो-
रितेऽथ साध्यं गणितेन तद्विदा ।
तदन्तरे मानदलैक्यतोऽधिके
तद्दूषणं कर्मसु भूषणायते ॥ ३४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्संभेति। तद्विदा दैवज्ञेन गणितेन गणितमार्गेणापक्रमसाम्यं साम्यं साधनीयम्। कस्मिन्। एतयोः सूर्यचन्द्रयोस्तत्सम्भवे क्रान्तिसम्भवे इते प्राप्ते सति। अथ मानदलैक्यतः प्रमाणार्धैकीभूततोऽधिके तदन्तरे क्रान्त्यन्तरे यद्दूषणं तत् कर्मसु कार्येषु भूषणायते भूषणमिवाचरति भूषणवदग्रवर्त्ति ॥ ३४ ॥

अथ गण्डान्तयोगमाह।

ज्ञेयं झषाव्योश्च घटीचतुष्टयं
षडङ्घ्रिबाणासनयोर्यदन्तरे।
जम्बालनीडेभजिघांसुसंज्ञयो-
र्गण्डान्तमार्यैरपि मङ्गलाहितम् ॥ ३५ ॥

ज्ञेयमिति। झषाव्योर्मीनमेषयोरन्तरे विचाले यत् घटीचतुष्टयम्। एवं षडङ्घ्रिबाणासनयोः। षट् अङ्घ्रयश्चरणा यस्य स षडङ्घ्रिर्भ्रमरो वृश्चिकश्च। बाणस्य शरस्य असनं बाणासनं धनुस्तयोर्वृश्चिकधनुषोः। च-पुनः जम्बाले पङ्के नीडं स्थानं यस्य स कीटः। इभजिघांसुर्गजरिपुः। एतत्संज्ञयोः कर्कसिंहयोरार्यैराचार्यैस्तद्घटीचतुष्टयं गण्डान्तं नाम ज्ञेयम्। किंविशिष्टं गण्डान्तम्। मङ्गलाहितम्। शुभकार्येऽनिष्टम्। अपि निश्चितम्। "वैर्यहितो जिघांसुः"-इति 'हैमः' ॥ ३५ ॥

दिवौकसोः संयुतिरिन्दुहंसयोः
क्रान्त्योर्यदि स्यात् खलु वा समानता।
गण्डान्तके मङ्गलमिन्द्रयामयो-
र्युगं न यावद्विबुधैस्तदादृतम् ॥ ३६ ॥

दिवौकसोरिति। खलु निश्चितम्। यदि दिवौकसोर्ग्रहयोः संयुतिः। वाऽथ वा इन्दुहंसयोश्चन्द्रसूर्ययोः समानता स्यात् तदा विबुधैर्गण्डान्तकैरिन्द्रयामयोः सुरपतेः प्रहरयोर्युगं मासद्वयमितं यावन्मङ्गलं नादृतं नाङ्गीकृतमित्यर्थः ॥ ३६ ॥

अथ सन्धिगतदिनान्याह।

समायनर्त्तुमासानां सन्धयोर्वासराः क्रमात्।
गजाब्धिद्विधरातुल्याः पुण्या मङ्गलगर्हिताः ॥ ३७ ॥

समेति। समा वर्षम्। अयनम्। ऋतुः। मासः। एषां द्वन्द्वे। एषां सन्धयोर्गजाश्विद्विधरातुल्याः क्रमाद्वासराः स्युः। कोऽर्थः। वर्षसन्धयोः फाल्गुनकृष्णद्वादशी-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मारभ्य चैत्रशुक्लचतुर्थ्यन्तमष्टौ वासराः। एवमयनसन्धयोश्चत्वारः। ऋतुसन्धयोर्द्वौ। माससन्धयोरेकः। किंविशिष्टाः। पुण्याः दानधर्मयोग्याः। पुनः किंविशिष्टाः। मङ्गलगर्हिताः स्पष्टम् ॥ ३७ ॥

अथार्धोदयाभिधपर्वाह।

सहस्यतपसोर्मासोरमाऽह्न्यंशुमतो यदा।
सपातमार्थभा पर्व ज्ञेयमर्धोदयाह्वयम् ॥ ३८ ॥

सह इति। यदा अंशुमतः सूर्यस्याहि दिने सहस्यतपसोः पौषमाघयोर्मासोरमावासी स्यात्। किंविशिष्टा अमा। सपाता। पातो व्यतीपातः। मा लक्ष्मीस्तस्या अर्थः स्वामी विष्णुस्तस्य भं श्रवणः ताभ्यां सहवर्त्तमाना सपातमार्थभा तदा बुधैरर्धोदयाह्वयं पर्व ज्ञेयमित्यर्थः ॥ ३८ ॥

अथ पद्मकं पर्वाह।

पद्मकं पौर्णमासी स्यात् सपातेनेज्यवासरा।
मधुमाधवयोः पर्व यदा सेन्द्राग्निभा तदा ॥ ३९ ॥

पद्मकति। यदा मधुमाधवयोश्चैत्रवैशाखयोः पौर्णिमासी स्यात्। किंलक्षणा पौर्णमासी। सेन्द्राग्निभा विशाखानक्षत्रयुक्ता। पुनः किंभूता। सपाता। पातो व्यतीपातः। इनः सूर्यः। ईज्यो गुरुः। एषां वासरैः सह वर्त्तमाना यदा तदा पद्मकं नाम पर्व स्यात् ॥ ३९ ॥

अथ कपिलाषष्ठीमाह।

नभस्यापरपक्षस्था षष्ठी सारा शयस्थिते।
व्यतीपातयुता चैते सकर्क्षा कपिलाह्वया ॥ ४० ॥

नभस्येति। नभस्यस्य भाद्रपदस्यापरपक्षस्था कृष्णपक्षस्था षष्ठी तिथिः कपिलाह्वया स्यात्। किंभूता षष्ठी। सह आरेण भौमेन वर्त्तते सारा। पुनः किंभूता। व्यतीपातयुता। च-पुनः किंभूता। को ब्रह्मा तस्य ऋक्षेण रोहिणीनक्षत्रेण सह वर्त्तते या सा सकर्क्षा। कस्मिन् सति। इने सूर्ये शयस्थिते हस्तनक्षत्राश्रिते ॥ ४० ॥

अष्टकाष्टमीमाह।

अष्टम्यो ह्यष्टका जेया मङ्गलेऽनिष्टदा बुधैः।
सहस्तपःसहस्यानां नभस्यस्यासितप्रभाः ॥ ४१ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अष्टेति । बुधैः । सहा मार्गशीर्षः । तपा माघः । सहस्यः पौषः । एषां द्वन्द्वे । एषाम् । नभस्यस्य भाद्रपदस्य चासितप्रभाः कृष्णपक्षान्विता अष्टम्योऽष्टकाभिधा मङ्गले विवाहादौ नेष्टदा ज्ञेयाः ॥ ४१ ॥

अथ द्विसप्ततिश्राद्धान्याह ।

अमायुगादिमन्वादिपक्षसंक्रान्त्यनन्तिकाः ।
क्षयाहर्त्तुनवान्नानि चेयं श्राद्धद्विसप्ततिः ॥ ४२ ॥

अमेति । इयं श्राद्धानां द्विसप्ततिर्भवति सा कथ्यते । अमाऽमावास्या । द्वादश श्राद्धानि । एवं युगादयस्तिथयश्चत्वारि । मन्वादयस्तिथयश्चतुर्दश । पक्षः श्राद्धपक्षः । क्षये तिथौ तदा प्रतिपदा सह षोडश श्राद्धानि । संक्रान्तयो द्वादश । अनन्तिकास्तिथयश्चत्वारः । क्षयाहो मातरपितरयोर्मृत्युदिनं द्वे । ऋतवः षट् । नवान्ने द्वे ॥ ४२ ॥

अथ युगादितिथीनाह ।

नवम्यूर्जे तृतीयाऽऽद्या माधवेऽमी युगादयः ।
पञ्चदश्यसिता माघे नभस्ये स्युस्त्रयोदशी ॥ ४३ ॥

वनेति । ऊर्जे कार्त्तिके आद्या शुक्ला नवमी । माधवे वैशाखेऽक्षयतृतीया । माघेऽसिता कृष्णा पञ्चदशी अमावासी । नभस्ये भाद्रपदे त्रयोदशी कृष्णा । युगादयोऽमी चत्वारस्तिथयः स्युः ॥ ४३ ॥

अथ मन्वादीनाह ।

शुक्लेषे नवमी चोर्जे द्वादशी तृतीया मधौ ।
नभस्ये तृतीया प्रोक्ताऽमावास्या नभसि स्मृता ॥ ४४ ॥

शुक्ले-इति । इषे आश्विनमासे शुक्ला नवमी । ऊर्जे कार्त्तिके द्वादशी । मधौ चैत्रे तृतीया । नभस्ये भाद्रपदे तृतीया प्रोक्ता । नभसि श्रावणेऽमावास्या स्मृता इत्यर्थः॥४४॥

पौष एकादशी कृष्णा दशम्यर्जुनभा शुचौ ।
माघे च सप्तमी प्रोक्ता नभस्ये बहुलाऽष्टमी ॥ ४५ ॥

पौष इति । पौषे एकादशी कृष्णा । शुचौ आषाढेऽर्जुनभा शुक्ला दशमी । "धवलक्षधवलार्जुनाः"-इति 'हैमः' । माघे सप्तमी कृष्णा । नभस्ये भाद्रपदे बहुलाऽष्टमीत्यर्थः ॥ ४५ ॥

आषाढी कार्त्तिकी शुक्ला पञ्चदश्यथ फाल्गुने ।
चैत्री चतुर्दशेति स्युर्ज्येष्ठमन्वन्तरादयः ॥ ४६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आषेति । आषाढी पूर्णिमा । कार्त्तिकी पूर्णिमा । फाल्गुने शुक्ला पञ्चदशी पूर्णिमा । चैत्री पूर्णिमा । ज्येष्ठी पूर्णिमा । मन्वन्तरादयोऽमी चतुर्दश तिथयः स्युः ॥ ४६ ॥

अथ पक्षश्राद्धान्याह ।

राकायाः पञ्चमे पक्षे शुचेः श्राद्धानि षोडश ।
स्यादेष्वध्वरतुल्यानि पितॄणां दत्तमक्षयम् ॥ ४७ ॥

राकेति । शुचेराषाढस्य राकायाः पूर्णिमायाः सकाशात् पञ्चमे पक्षे । कोऽर्थः । भाद्रपदस्य पूर्णिमासीत आरभ्य षोडश श्राद्धानि अध्वरतुल्यानि यज्ञतुल्यानि स्युः । एषु श्राद्धेषु पितॄणां पूर्वजानां दत्तमक्षयं स्यात् ॥ ४७ ॥

यानन्तास्तिथीनाह ।

माघोर्जमाधवेषाणां पूर्णिमाः स्युस्त्वनन्तिकाः ।
वसन्ते शरदि श्राद्धे शुभेऽहनि नवान्नके ॥ ४८ ॥

माघे इति । माघकार्त्तिकवैशाखाश्विनमासानां पूर्णिमा अनन्तिकाः स्युः । तु पुनर्वसन्ते शरदि ऋतौ शुभेऽहनि दिवसे नवान्नके नूतनधान्यनिर्मिते श्राद्धे स्तः ॥ ४८ ॥

अथेन्द्रवज्रया संक्रान्तिन्यूनाधिकमासानाह ।

मध्वादिमासेषु भवन्ति भानोः
संक्रान्तयो मेषमुखाः क्रमात् स्यात् ।
मासो विसंक्रान्तिरथाधिमासो
मासो द्विसंक्रान्तिरसौ क्षयाख्यः ॥ ४९ ॥

मध्वेति । चैत्रादिद्वादशमासेषु भानोर्मेषमुखाः संक्रान्तयः स्युः । क्रमात् यो मासो विसंक्रान्तिः संक्रान्तिरहितः । अथ वा द्विसंक्रान्तिः संक्रान्तिद्वयसहितः स्यात् । योऽसौ मासोऽधिमासः क्षयाख्यश्च स्यात् । कोऽर्थः । असंक्रान्तिको मासोऽधिकः । द्विसंक्रान्तिकः क्षय इत्यर्थः ॥ ४९ ॥

अथोपजात्या कतिमासेऽधिको मास आयाति तदाह ।

यदैन्दवोऽमा ननु सौरमासाद्-
भवेद्द्विसंक्रान्तिरसौ लघीयान् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स योऽधिमासो रदनैर्दलाढ्यै-
र्ज्ञेयोऽविधोर्मास इहांशुमासैः ॥ ५० ॥

यदैन्दव इति । ननु निश्चितम् । यो मासो विसंक्रान्तिरैन्दवो माश्चान्द्रो मासः सौरमासाल्लघीयानतिशयेन लघुर्भवेत् । इह सोऽसौ विधोर्मासोऽंशुमासैः सौरमासैरधिमासो ज्ञेयः । बुधैरिति शेषः । किंलक्षणैरंशुमासैः । रदनैर्दन्तैर्दलाढ्यैरर्धयुक्तैः सार्धद्वात्रिंशन्मितैरित्यर्थः ॥ ५० ॥

अथ कतिवर्षे क्षयमास आयाति तदाह ।

सौराद्यदा चान्द्रमसो गरीयान्
मासो द्विसंक्रान्तिरसौ क्षयाख्यः ।
स यस्तदा स्यात् क्षितिवेदरूपै-
रब्दैर्मितैर्वा क्वचिदङ्कचन्द्रैः ॥ ५१ ॥

सौरेति । यदा यश्चान्द्रमासः सौरमासाद्गरीयानतिशयेन गुरुर्द्विसंक्रान्तिर्भवेत् तदा सोऽसौ मासः क्षयाख्यः स्यात् । कैः कृत्वा । क्षितिवेदरूपैरेकचत्वारिंशदधिकशतेन मितैरब्दैर्वर्षैर्वा क्वचित् कालेऽङ्कचन्द्रैरेकोनविंशत्या मितैर्वा ॥ ५१ ॥

अथेन्द्रवंशयाऽधिकक्षयमासनियममाह ।

चैत्रादिमासादधिमासकालवा-
न्नूर्जादिमासत्रय ऊनमासकः ।
मासोऽन्यथा नोक्तिरियं भवेदतो
नेत्याह कश्चिन्नियमं न बालिशः ॥ ५२ ॥

चैत्रेति । चैत्रादिमासादधिमासकालवानधिकमासोऽत एत* एवाधिका भवन्तीत्यर्थः । ऊर्जादिमासत्रय ऊनमासकः क्षयाख्यः स्यात् । एत एवाक्षयतां यान्तीत्यर्थः । कश्चिदिति नियमं नाह न ब्रूते । इतीति किम् । मासो मासस्येयमुक्तिरन्यथा न भवेन्न । द्वौ नकारौ प्रकृत्यर्थं सूचयतः । अन्यथा भवेदित्यर्थः । अतः कारणात् स बालिशो मूढः । अथ वेयमुक्तिरन्यथा न भवेत । कश्चिदिति पूर्वोक्तं नियमं नाह । अतः स बालिशो न । अपि तु भवेदेवेत्यपि शब्दार्थः ॥ ५२ ॥

---

* चैत्रमारभ्य कार्त्तिकपर्यन्तमष्टौ मासाः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथोपजात्या क्षयमासेऽधिकमासद्वयमाह ।

त्रिखेन्दुभिर्विक्रमभूपतेर्मिते
शाकेऽन्वितोह क्षयमासको भवेत् ।
अन्यः स्वकालाब्दगणेन हायने-
ऽधिमासयुग्मं क्षयमासवत्यतः ॥ ५३ ॥

त्रिखेन्दुति । यथा विक्रमभूपतेस्त्रिखेन्दुभिस्त्र्यधिकशतेन मिते शाके गते सति अत्रैकचत्वारिंशदधिकशतवर्षपरिपूर्णजातत्वात् क्षयमासको जातोऽस्ति । अयं विश्वनकालिदासापेक्षया दर्शितदृष्टान्तः प्रोक्तः । तथाऽत उक्तक्षयमासात् तु पुनरग्रे इति प्रकारेण स्वकालाब्दगणेन निजकालगणनया । कोऽर्थः । चत्वारिंशदधिकशतेन मिते हायने वर्षेऽन्यः क्षयमासको भवेत् भविष्यतीत्यर्थः । इहास्मिन् क्षयमासवति वर्षेऽधिमासद्वयं स्यात् । तस्मिन् वर्षेऽधिकमासद्वयं निश्चयेन स्यादित्यर्थः । "गणः प्रथमसंख्ययोः समूहे सैन्यभेदे"-इति 'महीपः' ॥ ५३ ॥

अथेन्द्रवज्रयाऽनयोः साध्यस्थानं दर्शयति ।

श्रीसूर्यसिद्धान्तमतोद्भवार्कात्
साध्यौ तदा तावधिकक्षयाख्यौ ।
मासौ ग्रहज्ञैर्गणितं तथाऽन्यत्
साध्यं सदा यद्यपि तद्ग्रहाद्यम् ॥ ५४ ॥

श्रीसूर्येति । यद्यपि तद्ग्रहाद्यं गणितमन्यत् साध्यं तथाऽपि ग्रहज्ञैस्तदा तौ अधिकक्षयाख्यौ मासौ साध्यौ । कस्मात् । श्रीसूर्यसिद्धान्तमतोद्भवार्कात् । श्रीवराहमिहिरकृतसिद्धान्तगणितसूर्यात् ॥ ५४ ॥

अथ ब्राह्मसूर्यसिद्धान्तयोर्मतभेदमाह ।

स्थूलं सदा ब्राह्ममतं निरुक्त-
मादित्यसिद्धान्तमतं च सूक्ष्मम् ।
भाद्यादिकं सूक्ष्मतरादसूक्ष्मं
सूक्ष्मं मतं स्थूलत एव सिद्धम् ॥ ५५ ॥

स्थूलमिति । बुधैः सदा ब्राह्ममतं स्थूलं निरुक्तम् । च-पुनरादित्येति । सूर्यसि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्धान्तमतं सूक्ष्मं निरुक्तम्। पुनर्भाद्यादिकं भगणादिकं सूक्ष्मतरात् असूक्ष्ममतिशयेन सूक्ष्मं न भवतीत्यर्थः। अतः कारणात् स्थूलत एव सूक्ष्मं मतं सिद्धम्॥ ५५॥

अथोपजात्या सौरब्राह्मयोर्ग्राह्यस्थानमाह।

अतोऽनिशं संक्रमणेऽंशुमालिन-
स्तिथौ सदा सूक्ष्मविधानसाधने।
सौरं मतं शस्तमथान्यनिर्णये
स्थूलं च भेऽन्यग्रहसंक्रमेष्वपि॥ ५६॥

अत इति। अनिशं निरन्तरमंशुमालिनः सूर्यस्य संक्रमणे तिथौ तथा सूक्ष्मविधानसाधने स्पष्टगणितसाधने सदा सौरं मतं शस्तं शुभम्। अथान्यनिर्णये स्थूलकार्ये च पुनर्भे नक्षत्रसाधने पुनरन्यग्रहसंक्रमेषु सूर्यव्यतिरिक्तग्रहसंक्रमेष्वपि स्थूलं ब्राह्मं मतं शस्तमित्यर्थः॥ ५६॥

अथ क्षयाधिमासे हेयमाह।

मासि क्षये चाधिकमासि नो हिता
व्रतोपयामक्षयसप्ततन्तुजा।
उत्सर्गभूनेत्रभिषेचनादिका
क्रिया भवेद्धर्मवतीह सिद्धिदा॥ ५७॥

मासीति। क्षये मासि अधिकमासि च विषये क्रिया नो हिता शस्ता। कथम्भूता क्रिया। व्रतेति। व्रतं नियमः। उपयामो विवाहः। क्षयो गृहम्। सप्ततन्तुर्यज्ञः। एषां द्वन्द्वे। एभ्यो जायते येत्येतज्जा। पुनः किंभूता। उत्सर्गो नीलोद्वाहादिः। भूनेता राजा। एतयोरभिषेचनादिकाऽभिषेकपूर्वा। पुनरिह क्षयाधिकमासे धर्मवती क्रिया सिद्धिदा भवेत्। "वसतिः शरणं क्षयः" इति। "संस्तरः सप्ततन्तुश्च वितानं बर्हिरध्वर"-इति च 'हैमः'॥ ५७॥

अथेन्द्रवंशया रविसंक्रमणपुण्यकालमाह।

आसां पराश्चानपरा हि नाडिका
संक्रान्तिकालान्मिहिरस्य षोडश।
पुण्याः सदाऽभ्यर्णवती घटी स्मृता
तस्यातिपुण्या खलु या भवन्ति सा॥ ५८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आसामिति । तस्य मिहिरस्य सूर्यस्य संक्रान्तिकालात् परा अग्रेतनाः । च-पुनरः परा: पूर्वाः षोडश नाडिकाः पूर्वापरभेदात् द्वात्रिंशन्मिता घट्यः पुण्याः । दानादिधर्मकर्त्तव्ययोग्याः खलु निश्चितं भवन्ति । पुनरासां पूर्वापरघटीनां मध्ये याऽभ्यर्णवर्तीपवर्त्तिनी साऽति पुण्या स्मृता ॥ ५८ ॥

अथोपजात्या संक्रमकालकोदरं साधयति ।

दलं गतेरंशुमतोऽथ मण्डलं
निजेशभागेन युतं कलादिकम् ।
षष्ट्याऽऽहतं भुक्तिहृतं घटीमुखं
वृषप्रियं संक्रमकालकोदरम् ॥ ५९ ॥

दलमिति । अंशुमतः सूर्यस्य मण्डलं संक्रमणमण्डलम् । अथ तद्गतेर्दलमर्धम् । अथ तत् निजेशभागेन स्वकीयैकादशभागेन युतम् । तदा कलादिकं भवति । तत् षष्ट्याऽऽहतं षष्टिघटिकाभिर्गुणितम् । पुनस्तत् भुक्तिहृतं स्पष्टगत्या विभाजितं तदा यल्लब्धं तत् घटीमुखं घटीपलादिकं संक्रमकालकोदरं संक्रमकालकमध्यं नाम पर्व वृषप्रियं धर्मवल्लभं भवति । "धर्मः पुण्यं वृषः श्रेयः" इति । "गुणिताहते" इति च 'हैमः' । षष्ठकाण्डे 'महेश्वरो'ऽपि—"आहते गुणितेऽपि स्यात् ताडिते मारणेऽपि च" इति ॥ ५९ ॥

अथ चन्द्रादिग्रहसंक्रमोदरमाह ।

खरद्युतेः संक्रमपुण्यनाडिका-
स्वराशिभागद्युहता विभाजिताः ।
दिवौकसः स्पष्टजवेन तत् फलं
नाड्यादि पुण्यं ग्रहसंक्रमोदरम् ॥ ६० ॥

खरेति । खरद्युतेः सूर्यस्य संक्रमपुण्यनाडिकाः संक्रमपुण्यकालघटिका द्वात्रिंशन्मिताः । स्वराशिभोगद्युहताश्चन्द्रादिग्रहस्य निजराशिभोगदिवसगुणिताः । दिवौकसश्चन्द्रादिग्रहस्य स्पष्टजवेन स्पष्टगत्या विभाजिताः । यल्लब्धं तत् फलं नाड्यादि ग्रहसंक्रमोदरं पर्व पुण्यं पुण्यक्रियायै भवति । ग्रन्थान्तरे मध्यं यथा—

"नाड्यो रामगुणा रवेरथ विधोः षड्दोःपलैर्युग्द्वयं
भौमस्याब्धिपलैर्युता नव विदो युक्ताः पलैः खाश्विभिः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षण्नाड्योऽष्टगजा गुरोरथ भृगोर्नन्दाः पलैरष्टभिः
पुण्याः स्युः खनृपाः शनैरुभयतो राश्यृक्षयोः संक्रमे" ॥ इत्यर्थः ॥ ६० ॥

अथ द्रुतविलम्बितेन संक्रमे कालविवेकतामाह।

निशिथगो यदि भास्करसंक्रमो
दिनयुगं जगदुर्वृषवत्सलम्।
परदिनं विबुधा रजनीदलाद्-
भवति संक्रमणं च तदाऽपरम् ॥ ६१ ॥

निशिथेति। यदि भास्करसंक्रमो निशिथगो मध्यरात्रवर्त्ती भवेत् तदा बुधा दिनयुगं वृषवत्सलं धर्मप्रियं जगदुः कथयामासुः। च-पुनर्भानोः संक्रमणं रजनीदलान्मध्यरात्रात् परमग्रेतनं यदि भवति तदा विबुधाः परदिनं वृषवत्सलं जगदुः॥

अथ हरिपदादिपर्वाण्याह।

द्युमणिसंक्रमतोऽचलभे भवे-
द्धरिपदं षडशीतिमुखं स्मृतम्।
द्वितनुभेऽयनके मृगकर्किणो-
र्विषुवदेव तुलाधरमेषयोः ॥ ६१ ॥

द्युमेति। अचलभे स्थिरराशौ द्युमणिसंक्रमतः सूर्यसंक्रमणात् हरिपदं नाम पर्व भवेत्। द्वितनुभे द्विस्वभावराशौ रविसंक्रमतः षडशीतिमुखं नाम पर्व स्मृतम्। मृगकर्किणोः सूर्यसंक्रमात् अयनके स्तः। तुलाधरमेषयोः सूर्यसंक्रमात् विषुवदेव निश्चितं स्यात्। "तुल्यनक्तंदिवे काले विषुवद्विषुवं च तत्"-इति 'हैमः' ॥ ६२ ॥

अथ षडशीतिमुखं स्पष्टयति।

रसयमैर्धनुषो लवके मिते
भुजयमैर्दिनमभ्ररसौकसः।
धृतिमिते जितुमस्य च योषितः
शतमुखैः षडशीतिमुखाह्वयम् ॥ ६३ ॥

रसेति। धनुषो द्विस्वभावधनूराशिसंक्रान्ते रसयमैः षड्विंशत्या मिते लवकेऽंशे दिनं षडशीतिमुखाह्वयं पर्व स्यात्। एवमभ्ररसौकसोऽभ्ररसो घनरसो जलं तस्मि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शोकः स्थानं यस्य स तस्य मीनराशेर्भुजयमैर्द्वाविंशत्या मिते लवे दिनं षडशीतिमुखम्। च-पुनः जितुमस्य मिथुनस्य धृतिमितेऽष्टादशमिते लवे दिनं षडशीतिमुखम्। पुनर्योषितः कन्यायाः शतमखैरिन्द्रैश्चतुर्दशभिर्मिते लवे दिनं षडशीतिमुखम् ॥ ६३ ॥

अथैतत्पर्वदिनमाहात्म्यमाह ।

क्रतुसमान्यथ यान्यपराण्यहः
कलदृशः स्युरहान्यपि षोडश ।
क्रतुसमं षडशीतिमुखाश्रितं
तदपि यत् कथितं च मनीषिभिः ॥ ६४ ॥

क्रत्विति । मनीषिभिः पण्डितैः कलदृशः कन्याया अपराणि यानि षोडशाहानि कथितानि यत् षडशीतिमुखाश्रितमहर्दिनं च कथितं तान्यहानि क्रतुसमानि। तदहश्च क्रतुसमम् । यज्ञतुल्यानि स्युरित्यर्थः ॥ ६४ ॥

अथ विषुवदादि स्पष्टयति ।

अवितुलास्यमथैत्ययनांशका-
न्वितरविः स यदा विषुवद्दिनम् ।
मकरकीटमुखं च यदा तदा-
ऽयनदिनं तदहो यदहः स्मृतम् ॥ ६५ ॥

अवीति । अहो इति वितर्के । यदा स सायनार्को मेषतुलादिमेति तदा तद्विषुवत् स्यात् । च-पुनर्यदाऽयनांशयुक्तसूर्यो यदहर्मकरकीटमुखमेति तदा तदयनदिनं स्मृतमित्यर्थः ॥ ६५ ॥

अथ हरिपदं स्पष्टयति ।

पितृभशौच्यवसुद्व्यमरोडुजा
कुयमवह्नियुगाङ्घ्रिमुखोदयाः ।
इह तदर्कसमाः स्युरहो अह-
र्यदजपादवदुक्तमहस्तदा ॥ ६६ ॥

पितृभमिति । अहो इति वितर्के । यदा पितृभं मघा । शौच्यं वह्निभं कृतिका । वसवो धनिष्ठा । द्व्यमरौ द्विदेवौ विशाखा । एषां द्वन्द्वे । एभ्यो जायन्ते इत्येतज्जाः । कुयमेति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एकद्वित्रिचतुष्पादमुखोदया अर्कसमाः स्युः। कोऽर्थः। मघानक्षत्रस्य प्रथमचरणमुखे उदयः स्थिरराश्युदयः। कृत्तिकानां द्वितीयपादे स्थिरराश्युदयः। धनिष्ठायास्तृतीयपादे स्थिरराश्युदयः। विशाखायाश्चतुर्थपादे स्थिरराश्युदयः। सिंहवृषकुम्भवृश्चिकाः स्थिरराश्युदया अर्कसमा द्वादशसंख्यामिताः। इह यदहस्तदहरजपादवत् विष्णुपदेन तुल्यं हरिपदसंज्ञमुक्तमित्यर्थः। अर्थात् स्थिरसंक्रान्त्यादेर्द्वादशं यदहस्तदहर्हरिपद-संज्ञं भवति। अजपादवदत्र वत्प्रत्यय आश्रितपदार्थमेव ब्रूते। यथोक्तं 'हेम'सूरिभिश्च "पौषस्तैषो सहस्यवत्" ॥ ६६ ॥

अथायनादिविशेषगतं सुकृतकालमाह।

सुकृतकालमपागयनादिगं
हरिपदादिगतं च तुलाजयोः।
तदनु मध्य इते विदुरुत्तरे
मुनिवराः षडशीतिमुखेऽयने ॥ ६७ ॥

सुकृतेति। मुनिवराः। अपागयनादिगं दक्षिणायनादिगतं कर्कसंक्रान्तावादिगत-माद्याः षोडशघटिकाः समयं सुकृतकालं पुण्यकालं विदुरवधारयन्ति। च-पुनरेव हरिपदादिगतं वृषसिंहवृश्चिककुम्भसंक्रान्तिष्वाद्याः षोडश घटिकाः सुकृतकालं विदुः। पुनस्तदनु पश्चात् तुलाजयोस्तुलामेषयोर्मध्ये सुकृतिकालं विदुः। कोऽर्थः। तुलामेषसंक्रान्तिकालात् प्रागष्टौ घटिकाः परतश्चाष्टौ एवं षोडशघटिका मध्यसमय-मिति। पुनरुत्तरेऽयने मकरसंक्रान्तौ इते प्राप्ते सति सुकृतकालं विदुः। कोऽर्थः। मकरसंक्रान्तिकालादग्रिमाः षोडश घटिकाः पुण्यकालं प्रथमास्तु न तथेति। पुनः षडशीतिमुखे द्विस्वभावराशौ इते प्राप्ते सति। कोऽर्थः। मिथुनकन्याधनुर्मीनसंक्रान्तिषु अग्रिमाः षोडश घटिका पुण्यकालं विदुः ॥ ६७ ॥

अथोत्तरदक्षिणायनयोर्विशेषसुकृतकालमाह।

अयनयोरिषुराममिताः क्रमाद्-
वृषतमाजगुरुत्तरयाम्ययोः।
निजभया च युता वियुता घटी-
रनगतागतसंक्रमकालयोः ॥ ६८ ॥

अयनेति। मुनिवराः। न अगता अनगता वर्त्तमाना इत्यर्थः। अगता एष्याः। अनगतागतानां संक्रमकालयोरुत्तरयाम्ययोरयनयोः संक्रमात् क्रमेण इषुराममिताः पञ्च-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिंशन्मिता घटीवृंषतमा अतिशयेन धर्मवत्यो जगुः। कथम्भूता घटीः। निजमया निज-राशिसंक्रान्तिच्छायया युता उत्तरायणे च पुनर्वियुता दक्षिणायने ॥ ६८ ॥

अथेन्द्रवंशया द्वादशसंक्रान्त्यधिकारमाह।

घोरोष्णगौ ध्वाङ्क्ष्यमृतांशुवासरे
संक्रान्तिरारे च महोदरी विदि।
मन्दाकिनी मन्दतमाऽमरार्चिते
मिश्रोशनस्यर्कसुते च राक्षसी ॥ ६९ ॥

घोरेति। उष्णगौ रविवारे संक्रान्तिर्घोरा नाम भवेत्। एवममृतांशुवारे चन्द्र-वारे ध्वाङ्क्षी। च-पुनरारे मङ्गलवारे महोदरी। पुनर्विदि बुधवारे मन्दाकिनी। अमरा-र्चिते गुरुवारे मन्दतमा। उशनसि शुक्रवारे मिश्रा। अर्कसुते शनिवारे राक्षसी॥६९॥

अथ नक्षत्राश्रितसंक्रान्तिसंज्ञामाह।

घोरोग्रभे ध्वाङ्क्ष्यनिशं लघूडुजा
मन्दाऽचरे चञ्चलभे महोदरी।
मन्दाकिनी मैत्रभजा च मिश्रभे
मिश्रा भवेद्दारुणभे च राक्षसी ॥ ७० ॥

घोरोगेति। उग्रभे करनक्षत्रे घोरा भवेत्। एवं लघूडुजा क्षिप्रनक्षत्रे जाता वाङ्क्षी। अचरे स्थिरभे मन्दा। चञ्चलभे चरनक्षत्रे महोदरी। मैत्रभजा मृदुनक्षत्रे जाता मन्दाकिनी। मिश्रभे साधारणनक्षत्रे मिश्रा। दारुणभे तीक्ष्णनक्षत्रे राक्षसी। अनिशं सदेति ॥ ७१ ॥

अथोपजात्या मन्दादिसंज्ञायाः फलमाह।

मन्दा धरादेवगणानवत्यतो
मन्दाकिनी भूमिभुजो महोदरी।
मलिम्लुचानन्त्यभुवोऽपि राक्षसी
मिश्रा पशूनेव पतत्रिणः कुजान् ॥ ७१ ॥

मन्देति। मन्दा संक्रान्तिर्धरादेवगणान् विप्रसमूहानवति रक्षति। अतो मन्दा-किनी भूमिभुजो भूपानवति। महोदरी मलिम्लुचान् चौरानवति। राक्षसी अन्त्यभुव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रण्डालानवति। मिश्रा पशून् गवादीन्। च-पुनः पतत्रिणो विहङ्गान् कुजान् वृक्षाँ-श्चावति ॥ ७१ ॥

विशोऽनिशं ध्वाङ्क्षयतिभद्रभाजः
करोति घोराङ्घ्रिभुवोऽथ संज्ञा।
भवारतो यस्य रवेरिता या
सा संक्रमस्योक्तफलप्रदा स्यात् ॥ ७२ ॥

विशो-इति। अनिशं सदा। ध्वाङ्क्षी विशो वैश्यानतिभद्रभाजोऽतिसुखान्वितान् करोति। घोरा अङ्घ्रिभुवः शूद्रानतिभद्रभाजः करोति। अथ यस्य रवेः संक्रमस्य भवारतो नक्षत्रात् या संज्ञा इता प्राप्ता। कोऽर्थः। या संज्ञा वारे सैव नक्षत्रेऽपि। यथा रविवारे घोरा उग्रनक्षत्रे घोरा एकीभूता स्यात् तदा शूद्रानवति। एवं सर्वा-पीति। सा उक्तफलप्रदा स्यात्। "विट् प्रवेशे नृवैश्ययोः"-इति 'हैमः'। भद्रशब्दः सुखवाची। शान्तं तालव्यदन्त्याद्यम्। भद्रं भद्रमिति शब्दप्रभेदे प्रोक्तोऽस्ति ॥ ७२ ॥

अथ प्रथमादिप्रहरे संक्रान्तिफलमाह।

यामे निहन्त्यर्णवमेखलाभुजं
संक्रान्तिराद्येऽम्बुधिचीवरामरान्।
अहर्दले चापि विशोऽपराह्णके
शूद्रव्रजानस्तमितेऽंशुमालिनि ॥ ७३ ॥

यामे इति। आद्ये यामे प्रहरे संक्रान्तिः। अर्णव एव मेखला यस्याः सा भूमिस्तां भुनक्तीति अर्णवमेखलाभुग् राजलोकस्तं हन्ति। च-पुनरहर्दले दिनार्धेऽम्बुधिचीवरा-मरान् भूदेवान् विप्रान् हन्ति। पुनरपराह्णके दिनतृतीयभागे विशो वैश्यान् हन्ति। अस्तमितेऽस्तं गतेऽंशुमालिनि सूर्ये सति शूद्रव्रजान् हन्तीत्यर्थः ॥ ७३ ॥

निहन्ति रात्रेः शिविजालिकादी-
नर्धे महारात्रविभातकान्तरे।
संक्रान्तिरंशोर्भरताङ्गमर्दिनः
काले नरान् वल्लवकान् ननूषसः ॥ ७४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निहन्तीति । रात्रेरर्धेऽंशोः सूर्यस्य संक्रान्तिः शिविजालिकादीन् भिल्लुन्धकादिकान् निहन्ति । पुनर्महारात्रविभातकान्तरेऽर्धरात्रप्रभातयोरन्तरे विचाले भरताङ्गमर्दिनः शैलूषनापितान् हन्ति । उषसः प्रभातस्य काले वल्लवकान् गोपालान् नरान् हन्ति । ननु निश्चितम् ॥ ७४ ॥

अथ तैतिलादिकरणे सुप्तादिरविसंक्रान्तिमाह ।

स्यात् तैतिले नागचतुष्पदाख्ययोः
सुप्तस्य रात्र्यन्तकरस्य संक्रमः ।
विष्टौ निविष्टस्य वबे गरे तथा
सवालवाख्ये वणिजे बुधैः स्मृतः ॥ ७५ ॥

स्यात् तै-इति । तैतिले नागचतुष्पदाख्ययोरेतत्करणत्रये सुप्तस्य रात्र्यन्तकरस्य सूर्यस्य संक्रमः संक्रान्तिः स्यात् । एवं विष्टौ भद्रायां तथा वबे गरे सवालवाख्ये वणिजेऽस्मिन् करणपञ्चके निविष्टस्य आसीनस्य रवेः संक्रमो बुधैः स्मृतः ॥ ७५ ॥

ऊर्ध्वस्थितस्यांशुमतोऽथ कौलवे
किंस्तुघ्नके स्याच्छकुनौ क्रमादयम् ।
धान्यार्घवृष्टिष्वपि संक्रमो बुधै-
रनिष्टमध्यातिशुभः प्रकीर्त्तितः ॥ ७६ ॥

ऊर्ध्वेति । अथ कौलवे किंस्तुघ्नके शकुनौ एतत्करणत्रये ऊर्ध्वस्थितस्यांशुमतो रवेरयं संक्रमः स्यात् । बुधैरयं संक्रमो धान्यार्घवृष्टिषु सस्यमूल्यवर्षणेषु क्रमादनिष्टमध्यातिशुभः प्रकीर्त्तितः । कोऽर्थः । सुप्तरविसंक्रमोऽर्घवर्षणधान्येष्वनिष्टो महार्घधान्यवृष्टिर्भावाभावकारकः । एवं निविष्टः समः । तथोर्ध्वः श्रेष्ठ इति । "अर्घः पूजाविधौ मूल्ये"-इति 'हैमः' ॥ ७६ ॥

अथ वंशस्थेन संक्रान्तेर्मुहूर्त्तनियममाह ।

जघन्यभेऽहस्करसंक्रमो बुधैः
सदेवलैः पञ्चदशक्षणः स्मृतः ।
बृहत्सु पञ्चागमतुल्यदैवतः
समानभे त्रिंशदभिन्नतत्क्षणः ॥ ७७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जघन्येति । सदेवलैर्देवलदामर्षिसहितैर्बुधैर्जघन्यसंज्ञनक्षत्रेऽहस्करसंक्रमः पञ्चदशक्षणः पञ्चदशमुहूर्त्तमितः स्मृतः । पुनर्बृहत्संज्ञनक्षत्रेषु पञ्चागमतुल्यदैवतः पञ्चचत्वारिंशन्मुहूर्त्तमितदैवतः स्मृतः । पुनः समानभे समसंज्ञनक्षत्रे त्रिंशदभिन्नतत्क्षणस्त्रिंशताऽभिन्नस्तुल्यस्तत्क्षणः स एव क्षणस्त्रिंशन्मुहूर्त्तमितः "क्षणो मुहूर्त्त उत्सवः पर्वव्यापारवैकल्यं च"-इति 'लिङ्गानुशासने' इत्यर्थः ॥ ७७ ॥

अथास्मिन् धान्यमूल्यविवेकमाह ।

जघन्यभे धान्यमनुष्णगूदयो
महर्घमामासमपोनसंक्रमः ।
समं समर्क्षे च समर्घमन्यभे
विशेषतो वा कुरुतेऽथ तद्युतिः ॥ ७८ ॥

जघन्येति । जघन्यभे जघन्यसंज्ञनक्षत्रेऽनुष्णगूदयो द्वितीयोपलक्षितचन्द्रोद्गमोऽपि पुनरिनसंक्रमः सूर्यसंक्रम आमासं मासपर्यन्तं धान्यं महार्घं महानर्घो मूल्यं यस्य तत् बहुमूल्यं कुरुते । च पुनः समर्क्षे समसंज्ञनक्षत्रे चन्दोदय इनसंक्रमश्च सममूल्यं धान्यं कुरुते । एवं पुनरन्यभे बृहत्संज्ञनक्षत्रे समर्घमल्पमूल्यं कुरुते । यद्येतयोश्चन्द्ररव्योर्युतिः संयोगो दर्शतिथिरित्यर्थः । विशेषतः पूर्वोक्तं कुरुते । जघन्यभे विशेषतो महार्घमित्यादि कुरुते । "महार्घोऽलाबुकाण्डजे महामूल्ये"-इति 'हैमः ॥ ७८ ॥

अथ दर्शरविसंक्रान्त्योरेकवारे फलमाह ।

यदैकवारे युतिरिन्दुहंसयो-
र्मिथो नरा यान्ति च हेलिसंक्रमः ।
क्षयं नृपाश्चेति सतीनपर्व चेत्
तदा शराग्रैः करवालधारया ॥ ७९ ॥

यदैकेति । यदा एकवारे इन्दुहंसयोश्चन्द्रसूर्ययोर्युतिर्दर्शतिथिरित्यर्थः । 'हेलिसंक्रमः सूर्यसंक्रान्तिश्च' स्यात् । कोऽर्थः । यस्मिन् वारे रवेः संक्रमणं तस्मिन्नेव वारेऽमावासी स्यात् तदा मिथः परस्परं नराः क्षयं नाशं यान्ति । च-पुनश्चेद्यदि इति पूर्वोक्ते सति तस्मिन्नेवैकवारे इनपर्व सूर्यग्रहणं स्यात् तदा नृपाः शराद्यैः करवालधारया मिथः क्षयं यान्ति । यतः—

"जिणइं वारइं रविसंक्रमइ तिणि अमावसि होइ ।
खप्परले जोगिन फिरइ जीवइ पर लोकोइ"-इति फांकटम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इन्दुहंसयोर्युतिशब्देन दर्शतिथिः कथ्यते। यदाहु'र्हेम'सूरयः-"दर्शः सूर्येन्दुसंगमः"-इति। यतो दर्शतिथावेव चन्द्ररविसंयोग इत्यर्थः ॥ ७९ ॥

अथ विवाहादौ ग्रहसंक्रमादिदिनं निषेधयति।

दिनं सपत्र्यायनयानसंक्रमं
न पर्व दग्धं हि च मङ्गलोचितम्।
तदेव यत् सोभयपार्श्ववासरं
नभश्चराभ्यागमकालवद्भवेत् ॥ ८० ॥

दिनमिति। हीति निश्चितम्। अयनमेव आयनं मार्गः। पत्रिणां विहङ्गमानामायनं पत्र्यायनं व्योम तस्मिन् यानानि विमानानि येषां ते ग्रहास्तेषां संक्रमाः संक्रमणानि तैः सह वर्त्तते तत् सपत्र्यायनयानसंक्रमं यत् दिनम्। च-पुनः पर्व दग्धं दिनं यत्। पुनः सोभयपार्श्वघस्रं ग्रहसंक्रमत उभयतः पार्श्वे दिनं तेन युक्तं दिनं यत्। पुनर्नभश्चराभ्यागमकालवत् खेटयुद्धदिनं यत्। तदेव दिनं मङ्गलोचितं न भवेदित्यर्थः ॥८०॥

अथोपजात्योपसंहारमाह।

पर्वाणि चान्यानि बहून्यथादराद्-
विचक्षणैरागधर्मशास्त्रतः।
ज्ञेयान्यशेषोत्सवहर्षदान्यथो
सदैव वर्ज्यानि च मङ्गले पुनः ॥ ८१ ॥

पर्वेति। अथैवं विचक्षणैर्बुधैरादरादागमधर्मशास्त्रतोऽन्यानि बहूनि पर्वाणि ज्ञेयानि। किंभूतानि। अशेषोत्सवहर्षदानि समस्तकार्यक्रीडादानि। पुनर्बुधैर्मङ्गले सदैव वर्ज्यानि ॥ ८१ ॥

अथ वंशस्थेनाह।

दिने दिने पर्वकुयोगसंचयो
भवेच्च शुद्धिर्घटतेऽपि मङ्गलम्।
पदे पदे वारभघस्त्रयोगजा
तदिष्टयोगोदयतः शिवाय यत् ॥ ८२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिने इति । दिने दिने पर्वकुयोगसंचयो भवेत् । च-पुनः पदे वारभघस्रयोगजा वारनक्षत्रदिनयोगजाता शुद्धिर्निर्दोषताऽपि घटते । यत् हेतोः । तन्मङ्गलमिष्टयोगोदयत ईप्सितयोगोदयतः शिवाय कल्याणाय सुखाय भवेदित्यर्थः ॥ ८२ ॥

अथोपजात्या सुयोगकुयोगयोर्बलमाह ।

अनेकदोषैरपि सौम्ययोगो
न हन्यतेऽनेकगुणैः कुयोगः ।
ग्राह्याः सदा ये च गुणा बुधैर्यत्
क्रियास्वसौम्याः खलु वर्जनीयाः ॥ ८३ ॥

अनेकेति । अनेकदोषैः सौम्ययोगो न हन्यते अपि तु पुनरनेकगुणैः कुयोगो न हन्यते सदा बुधैर्यत् क्रियासु ये गुणास्ते ग्राह्या अङ्गीकर्त्तव्याः । च-पुनर्येऽसौम्यास्ते खलु निश्चितं वर्जनीया इत्यर्थः ॥ ८३ ॥

अथात्र कस्य चिन्मतं दूषयति ।

तद्यैः कुयोगैरिति सौम्ययोगो
न हन्यतेऽसत् कथितं यदेकः ।
कादम्बरीबिन्दुगणः करीष-
लेशं यथा दुष्यति नेति कश्चित् ॥ ८४ ॥

तद्यैरिति । कश्चिदेक इत्याह तदसत् कथितं व्यर्थोदितम् । इतीति किम् । तदाह । यैः कुयोगैः सौम्ययोगो न हन्यते यथा कादम्बरीबिन्दुगणो मदिराबिन्दुसमूहः करीषलेशं छगणलवं ? न दुष्यति सदुषणं न करोतीत्यर्थः ॥ ८४ ॥

अथ बहुदोषेऽल्पगुणं परिहरन्नाह ।

एको गुणी दोषगणं* समेत्य
स्वाहाप्रियं स्वामतिहेतिवन्तम् ।
निगूहतीवामलगव्यबिन्दु-
र्मूर्त्तिं तदिष्टा बहवो गुणाः स्युः ॥ ८५ ॥

---

* दोषमवाहमेत्य इति वा. पा. ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एक इति । एको गुणो दोषगणं दोषमवाहं वा दोषसमूहं समेत्य प्राप्य स्वां मूर्त्तिं निजगुणरूपां न गूहति । गुह संवरणे । 'गुहेरुपधायामुद्गुणहेतौ स्वरे' इति दीर्घः । नाशं प्राप्नोतीत्यर्थः । क इव । अमलगव्यबिन्दुरिव यथा निर्मलघृतादिबिन्दुः स्वाहाप्रियं वह्निमतिशयज्वालायुक्तं प्राप्य स्वां मूर्त्तिं गूहति पूर्ववत् वह्निसान्द्रवतीत्यर्थः । तस्मात् कारणाद्बहवो गुणा इष्टाः स्युः । दोषमवाहेत्यत्र मवाहशब्दः समूहवाची । यथाऽस्मिन्नेव ग्रन्थे वक्ष्यते । वनमवाहः समुद्रो जलराशित्वात् । "स्वाहाऽग्निप्रिया"-इति 'हैमः' ॥ ८५ ॥

अथ बहुगुणेऽप्येकदोषांशस्यापि त्याज्यतामाह ।

दोषैकदेशो गुणसंनिपात-
मतो दहत्यत्र न संशयोऽस्ति ।
धनञ्जयांशो वनराज्यगौघ-
मिवागुणांशोऽपि विवर्जनीयः ॥ ८६ ॥

दोषै-इति । दोषैकदेशो गुणसन्निपातं गुणौघं दहति भस्मीकरोति । धनञ्जयांश इव । यथा वह्निलवो वनराज्यगौघं वनश्रेणिवृक्षसमूहं दहति । अत्र संशयो नास्ति। अतः कारणादगुणांशोऽपि वर्जनीयो बुधैरिति शेष इत्यर्थः ॥ ८६ ॥

अथ गुणदोषयोः समानतामपि निषेधयति ।

गुणागुणव्रातसमानताश्रया-
द्यथाऽशिवार्थं किल मङ्गलाज्जनः ।
आघारकक्षौद्रसमानताश्रया-
दतोऽदनादत्यधिका गुणा वरम् ॥ ८७ ॥

गुणेति । किलेति सम्भावनायाम् । जनोऽशिवार्थं दुःखहेतुमेति प्राप्नोति । कस्मात् गुणाश्चागुणाश्च तेषां व्रातः समूहस्तस्य समानता तुल्यता तस्या आश्रयः स्थानं सेवनं वा यस्मिन् तत् तस्मादेवंविधान्मङ्गलात् । निदर्शनमाह । यथा जन उपद्रवं प्राप्नोति । कस्मात् । आघारं घृतं कं जलं क्षौद्रं मधु एषां समानताश्रयात् अदनात् समभागभक्षणात् । अतः कारणादत्यधिकागुणाः वरं शुभम् । गुणा वरमित्यत्र बहुवचनमेकवचनं युक्तम् । यतो वचनभेदो भवेत् । पुनर्विभक्तिभेदो न । यथा वेदाः प्रमाणमित्यर्थः ॥ ८७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथैतदेव दृष्टान्तेन दृढयति।

आयुः पुरा भीमसुताधवादयो-
ऽगुणव्रजोपासितमङ्गलामराः।
एकोऽशुभान्येव कुयोगभावतो
नृपात्तदोषोऽपि वरः क्रियास्वतः॥ ८८॥

आयुरिति। पुरा पूर्वम्। भीमसुता दमयन्ती तस्या धवो भर्त्ता नलराजः स एव आदौ येषां ते भीमसुताधवादयो नृपा अशुभान्यमङ्गलान्येवायुः प्रापुः। लुङि या प्रापणेऽन उसि रूपम्। कथम्भूता भीमसुताधवादयः। अगुणव्रजे दोषसमूहे उपासिता आश्रिताः मङ्गलामरा उद्वाहदेवा यैस्ते। अतो हेतोः कुयोगभावत एको दोषोऽपि खर्जूरिकाचक्रादुत्पन्नदोषः क्रियासु वरः श्रेष्ठ इत्यर्थः॥ ८८॥

अथोपसंहारद्वारेण श्रीविक्रमार्कं वर्णयति।

पर्वाण्यमानीह सदाऽपवर्जनैः
श्रीविक्रमार्केण विनाडिकं प्रति।
तद्दोषबोधाय तथाऽपि सत्कृता
विदुः सदा सत्कृतिना ह्यमूनि च॥ ८९॥

इति श्रीज्योतिर्विदाभरणे कविकालिदासो-
दिते पर्वाध्यायश्चतुर्थः॥ ४॥

पर्वाण्येति। सदा श्रीविक्रमार्केण विनाडिकं प्रति घट्याः षष्टितमभागं प्रति पर्वाणि अमानि ज्ञातम्। कैरपवर्जनैर्दानैः। कथम्भूतेन विक्रमार्केण। सत्कृतिना पण्डितेन। च पुनस्तथाऽपि सदा सत्कृताः पण्डिता इहास्मिन् पर्वाधिकारेऽमूनि पर्वाणि विदुरवधारयन्ति। कस्मै। तद्दोषबोधाय। तेषां पर्वणां दोषास्तेषां बोधाय ज्ञानाय। हीति निश्चितम्॥ ८९॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुन्दरश्रीपूज्यमहिमा-प्रभुसूरीश्वरचरणसरोरुहचञ्चरीकायमाणशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां पर्वाध्यायश्चतुर्थः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीमहिमाप्रभ्वाह्वानां सूरीशानां सरस्वती ।
पुनातु प्राणिनां शश्वदक्षयामृतवाहिनी ॥ १ ॥

अथ पञ्चमाध्यायः । तत्र प्रथममासप्तकं दुरध्वगाछन्दसा ग्रहगोचरफलसन्धानमाह।

वदामि फलमङ्गिनामहं तदम्बरगगोचरोदितम् ।
असाधुशुभकर्मणामथो न येन फलविभ्रमो भवेत् ॥ १ ॥

वदामीति । अथो अनन्तरम् । अहं तत् अम्बरगानां ग्रहाणां गोचरात् राशिविशेषात् उदितं प्रादुर्भूतम् । अथ वा ग्रहगोचरे कथितं फलं वदामि कथयामि । येन कारणेनाङ्गिनां प्राणिनां फलविभ्रमः फलसंशयो न भवेत् । किंभूतानां प्राणिनाम् । असाधूनि चाशुभानि च कर्माणि येषां ते तेषामित्यर्थः ॥ १ ॥

अथ शन्यादीनां भ्रमणविधिमाह ।

यमेज्यकुजहेलिभार्गवज्ञतारकधवाः खतः क्रमात् ।
नता भगणभाज ईरिता भ्रमन्ति विधिना स्ववर्त्मगाः ॥२॥

यमेज्येति । खत आकाशात् क्रमेण नता नम्रा अधोऽधःस्थानस्थिता भगणा द्वादशरायस्तान् भजन्तीति भगणभाजः स्ववर्त्मगा निजमार्गगामिनो विधिना कालेन ईरिताः सन्तः । यमः शनि । ईज्यो गुरुः । कुजो भौमः । हेलिः सूर्यः । भार्गवः शुक्रः । ज्ञो बुधः । तारकधवश्चन्द्रः । एषां द्वन्द्वे । एते भ्रमन्ति । "विधिर्वाक्ये च प्रकारे कालकल्पयोः"-इति 'हैमः' । "शनौ ब्रह्मण्यश्च यमः स्थिर"-इति 'हेमशेषकोशे' । इत्यर्थः ॥ २ ॥

अथ ग्रहाणां लघुमहद्भ्रमणभेदमाह ।

तनुभ्रमणमम्बरायनः स भुञ्जति च यस्य सत्वरम् ।
महद्भ्रमणमुर्विपीठतो भवेदनणुकालेन भम् ॥ ३ ॥

तनु इति । यस्य ग्रहस्य उर्विपीठतो भूमीपीठतस्तनुभ्रमणं लघुभ्रमणं भवेत् सोऽम्बरायनो ग्रहोऽनणुकालेन महता कालेन भं राशिं भुञ्जति । च-पुनर्यस्य ग्रहस्य महद्भ्रमणं भवेत् स ग्रहः सत्वरं स्तोककालेन भं राशिं भुञ्जति भुनक्ति । भुज्यते इति भुञ्जः । भुञ्ज इवाचरतीति भुञ्जति इति प्रयोगसिद्धिः । अन्यथा भुञ्जतीति प्रयोगो विबुधगम्यः ॥ ३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ ग्रहाणां राशिभोगकालप्रमाणमाह ।

विधोर्भवति साङ्घ्र्यहोद्वयं सदैकभजमध्यभोगकम् ।
विदोऽक्षागमतुल्यवासराः सवित्र्युशनसोस्तथैकमाः ॥ ४ ॥

विधोरिति । विधोश्चन्द्रस्य साङ्घ्र्यहोद्वयं सपाददिनयुग्मं भजमध्यभोगकमिति भाद्राशेः सकाशाज्जायते इति भजं मध्यमभोगकं भवेत् । सपाददिनयुगलं सामान्यतो विधुर्भुङ्क्त इत्यर्थः । भजेत्यत्र अर्थवशाद्विभक्तिपरिणामः । एवं विदो बुधस्याक्षागमतुल्यवासरा भजमध्यभोगकाः स्युः । तथा सवित्र्युशनसो रविशुक्रयोरेकमा एकमासो भजमध्यभोगको भवेत् । अहोद्वयमित्यत्राशाब्दिकमनुप्त्वादहर्द्वयमहोद्वयमित्यपि स्यादेवमग्रेऽपि कविना रत्वं रुत्वं च प्रोक्तमस्ति ॥ ४ ॥

युगं क्षितिभुवोऽथ मासयोरुषर्बुधकुभिर्मिता गुरोः ।
अगोर्धृतिमिताश्च मासकाः खवह्निभिरशुभ्ररोचिषः ॥ ५ ॥

युगमिति । क्षितिभुवो मङ्गलस्य मासयोर्द्वयं भजः । अथ गुरोर्गीष्पतेरुषर्बुधा अग्नयश्च कुभूश्च ताभिस्त्रयोदशभिर्मिता मासका भजः । पुनरगो राहोर्धृतिमिता मासका भजः । पुनरशुभ्ररोचिषः कृष्णकान्तेः शनेः खवह्निभिस्त्रिंशता मिता मासका भजः । स्युरिति युग्मम् ॥ ५ ॥

अथैषां गतिहेतुमाह ।

निजद्युनिशवृत्तगो ग्रहोऽनिशं प्रवहवायुनेरितः ।
प्रयात्यपि गतिं पृथग्विधामचञ्चलचलोच्चहेतुना ॥ ६ ॥

निजेति । निजद्युनिशवृत्तगो निजाहोरात्रमण्डलगतो ग्रहोऽनिशं निरन्तरं प्रवहनामवायुना ईरितः प्रेरितः सन् पृथग्विधां भिन्नविधिमपि गतिं प्रयाति । किंभूतेन प्रवहवायुना अचञ्चलचलोच्चहेतुना मन्दोच्चचलोच्चकारणेनेत्यर्थः ॥ ६ ॥

अथ ग्रहाणां सप्तधा गतिमाह ।

समा व्रजिनगाऽतिवेलिता चरा चरतरा दिवौकसः ।
गतिर्भवति मन्दसंज्ञिका सदेति च कृशैव सप्तधा ॥ ७ ॥

समेति । समा तुल्या गतिः १ । व्रजिनगा वक्रा गतिः २ । अतिवेलिता अतिवक्रा गतिः ३ । चरा गतिः ४ । चरतरा गतिः ५ । मन्दसंज्ञिका मन्दा गतिः ६ । कृशा गतिः ७ । दिवौकसो ग्रहस्येत्यमुना प्रकारेण सप्तधा गतिर्भवतीत्यर्थः ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथोपजात्या गतीनां लक्षणमाह ।

गत्या समं पत्ररथायनायनः
स्वमध्यगत्या स्फुटया चरत्यथ ।
द्युरात्रवृत्ते विबुधैः समा गति-
र्ज्ञेया यदा तस्य हि यो दिवौकसः ॥ ८ ॥

गत्येति । अथ यदा पत्ररथानां पक्षिणामयनं मार्गो व्योम तस्मिन्नयनं मार्गो यस्य स ग्रहो द्युरात्रवृत्तेऽहोरात्रमण्डले स्वमध्यमगमनेन समं सदृशं स्फुटया स्पष्टया गत्या चरति गच्छति । हि युक्तम् । तदा बुधैस्तस्य दिवौकसो ग्रहस्य समा गतिर्ज्ञेया ॥८॥

अत्यल्पगत्याऽम्बरपान्थ एति
गतिर्यदाऽधिष्ठितभे विलोमाम् ।
वक्रा गतिः स्यात् तमपास्य राशिं
राशौ गते वक्रतराऽतिगत्या ॥ ९ ॥

अत्येति । यदाऽधिष्ठितभे आक्रान्तराशौ अम्बरपान्थो ग्रहोऽत्यल्पगत्याऽतिसूक्ष्मगत्या विलोमां पश्चाद्गामिनीं गतिमेति प्राप्नोति तदा ग्रहस्य वक्रा गतिः स्यात् । अथाऽतिगत्या तं राशिमपास्याश्रितराशिं त्यक्त्वा राशौ गते पाश्चात्यराशिं प्राप्ते ग्रहे सति वक्रतराऽतिशयेन वक्रा गतिः स्यादित्यर्थः ॥ ९ ॥

ग्रहोऽतिवेगेन यदा स्वमार्ग-
माक्रान्तभे गच्छति यश्चरोक्ता ।
तदा गतिस्तस्य विहाय राशिं
तमैष्यभे चातिचरा गतिज्ञैः ॥ १० ॥

ग्रह इति । यदा यो ग्रहोऽतिवेगेनाक्रान्तभे संश्रितराशौ स्वमार्गं गच्छति तदा गतिज्ञैस्तज्ज्ञैस्तस्य ग्रहस्य गतिश्चरा उक्ता । च-पुनर्ग्रहस्तं राशिमाश्रितराशिं विहायैष्यभे आगामिकराशौ गच्छति तदा गतिज्ञैस्तस्यातिचरा गतिरुक्ता ॥ १० ॥

वक्री पुनस्तत्र स चेन्नभोग-
स्तदाऽतिचारी चरतीह मार्गी ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वमध्यगत्यूनजवेन मन्दो
ज्ञेयः कृशो यः स गतिक्षयत्वात् ॥ ११ ॥

वक्रीति। चेद्यदि स नभोगो ग्रहस्तत्र राशौ वक्री इह मार्गी संश्चरति गच्छति तदाऽतिचारी कथ्यते। अथ ग्रहः स्वमध्यगत्यूनजवेन निजमध्यमगतिहीनवेगेन मन्दो ज्ञेय इति लक्षणया मन्दा गतिरुक्ता। अथ यो ग्रहो गतिक्षयत्वात् कृशः स कृशो ज्ञेय इति लक्षणया कृशा गतिरुक्ता ॥ ११ ॥

अथ ग्रहाणां वक्रातिचारे फलं निषेधयति।

वक्रातिचारेऽम्बरगाश्चरन्तो
ददत्यलं लल्लपराशराद्याः।
आक्रान्तराशेरमनन्त हीति
फलं न लब्धं द्रकवेधसत्याः ॥ १२ ॥

वक्रेति। अलमित्यवधारणे। हीति विशेषार्थे। अम्बरगा ग्रहा वक्रातिचारे चरन्तो गच्छन्त आक्रान्तराशेः फलं न ददति न समर्पयन्ति। इति लल्लपराशराद्या ऋषयोऽमनन्त जगुः। किंभूता लल्लपराशराद्याः। द्रं गमनं तस्य कः प्रकाशस्तस्य वेधो द्रकवेधः। अर्थात् ग्रहाणां गतिप्रकाशवेधः। लब्धः प्राप्तश्च स द्रकवेधश्च लब्धद्रकवेधस्तस्मिन् सत्याः सत्यभाषिणः। "द्रमयनं गमनं क्षुद्रम्"-इत्यादि द्व्यक्षरकोषे 'सौभरिः'। "कः सूर्यमित्रवाय्यग्निब्रह्मात्मयमकेकिषु। प्रकाशवक्त्रयोश्चापि" 'इति राजशेखरः'। अमनन्तेत्यत्रात्मने पदम्। द्रकेति पदं बुधैश्चिन्त्यम्। वक्रातिचारे 'संहितायाम्'।

यथा—

"विलोमगत्या यदि वाऽतिगत्या प्रयाति यो राशिमतीतमैष्यम्।
हित्वा तदीयं गगनेचरोऽसौ दद्यात् फलं पूर्वगृहे यदुक्तम् ॥
वक्रातिचारेण गृहान्तरेऽपि स्थितो ग्रहः पूर्वफलप्रदः स्यात्।
देशान्तरं कार्यवशाद्व्रतोऽहि स्वदेशधर्मं न जहाति मर्त्यः ॥
यदा ग्रहोऽयं समुपैति राशिं तदा तदीयं सफलं ददाति।
पीतादिवर्णेन समागमो हि वर्णः सितस्तन्मयतामुपैति ॥
यावन्ति यो वक्रगतेर्दिनानि भवेत् स वक्रे यदि वाऽतिचारी।
दशांशतुल्यानि दिनानि तेषां दद्यात् फलं पूर्वगृहे यदुक्तम् ॥
मासं शनीज्यौ कुजभार्गवौ तु पक्षं दशाहानि च सोमसूनुः।
ददाति वक्री फलमाद्यराशेः केषां चिदेवं न मतं बहूनाम्"-इति ॥ इत्यर्थः॥१२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ भौमादिग्रहपञ्चकस्य वक्रगतिदिननियममाह ।

एवं शरागाश्च जिना गुणार्का
वियच्छराः खाब्धिधरा ग्रहजैः ।
क्रमेण धाराजमुखग्रहाणां
घस्राः सदा वक्रगतेर्निरुक्ताः ॥ १३ ॥

एवमिति । सदा ग्रहज्ञैरेवं क्रमेण धाराजमुखग्रहाणां भौमादिग्रहाणां वक्रगतेः शरादिमिता घस्रा वासरा निरुक्ताः प्रोक्ताः । कोऽर्थः । भौमस्य वक्रगतेः शरागाः पञ्चसप्ततिर्वासराः । बुधस्य वक्रगतेर्जिनाश्चतुर्विंशतिर्वासराः । गुरोर्वक्रगतेर्गुणार्का त्रयोविंशत्यधिकशतं वासराः । शुक्रस्य वक्रगतेर्वियच्छरा गगनबाणाः पञ्चाशत् वासराः । शनेर्वक्रगतेः खाब्धिधराश्चत्वारिंशदधिकशतं वासरा इत्यर्थः ॥ १३ ॥

अथैषां मार्गदिननियममाह ।

शराम्बरागा द्विनवाहितारकाः
सुरेषवोऽह्यग्नियमाश्च वासराः ।
तेषां स्वभुक्त्याननमार्गकाश्रिताः
स्मृता बुधैरूर्ध्वमतोऽथ वक्रगाः ॥ १४ ॥

शरेति । बुधैस्तेषां भौमादीनां पञ्चानां स्वभुक्तिर्निजसंक्रमितभोगराशिस्तस्या आननं मुखं संक्रमणप्रारम्भो यस्यासौ मार्गकश्च तमाश्रिताः प्राप्ताः स्वभुक्त्याननमार्गकाश्रिताः शरादिमिता वासराः स्मृताः । कोऽर्थः । भौमस्य निजराशिसंक्रमणमुखादारभ्य मार्गे भवा मार्गका वासराः शराम्बरागाः पञ्चाधिकसप्तशतानि भवन्ति । एवं बुधस्य द्विनव द्वानवतिर्वासरा मार्गकाः । गुरोरहितारका अष्टाशत्यधिकशतद्वयं वासरा मार्गकाः । शुक्रस्य सुरेषवस्त्रयस्त्रिंशदधिकपञ्चशतानि वासरा मार्गकाः । शनेरह्यग्निथमा अष्टात्रिंशदधिकशतद्वयं वासरा मार्गका इति । अथ चेद्यदि अत एतस्मान्मानादूर्ध्वमग्रे वक्रगाः स्युरित्यर्थः ॥ १४ ॥

अथैषामस्तोदयमाह ।

स्वकालभागान्तरकाधिकश्चे-
न्मन्दो व्रजेदंशुमतो ग्रहोऽस्तम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऊनो निजैः काललवैरमन्द-
स्तदाऽन्यथा चाभ्युदयं प्रयाति ॥ १५ ॥

स्वकेति। मन्दो ग्रहो गुरुः शनिश्च "मन्दौ गुरुशनी" इति ज्यौतिषस्य संज्ञात्वात्। अंशुमतः सूर्यात् स्वकालभागान्तरकाधिको निजकालांशान्तराधिकस्तदा गुरुः शनिश्चास्तं व्रजेत्। यदा अमन्दश्चन्द्रो बुधः शुक्रो भौमश्च एतेऽमन्दाः। निजैः काललवैः स्वकालांशैरूनो हीनस्तदाऽमन्दो विधुर्बुधः शुक्रो भौमश्चास्तं व्रजेत्। च-पुनरन्यथा पूर्वोक्तविपर्ययोऽर्थो यदा सूर्यात् स्वकालांशान्तरहीनश्चेत् तदा गुरुः शनिश्चाभ्युदयं प्रयाति। सूर्यान्निजकालांशैरधिकश्चेत् तदा चन्द्रो बुधः शुक्रो भौमश्चाभ्युदयं प्रयातीत्यर्थः ॥ १५ ॥

अथ ग्रहाणां कालांशकानाह।

दिवाकराः सप्तधरा गुणोऽर्यो
हरा ग्रहा बाणधरा ग्रहाणाम्।
कालांशका मार्गवतामिलोना
अमी क्रमाद्वक्रवतामथाब्जात् ॥ १६ ॥

दिवेति। अब्जात् चन्द्रात् मार्गवतां मार्गिणां ग्रहाणां क्रमेण दिवाकरादयः कालांशाः स्युः। कोऽर्थः। मार्गिणश्चन्द्रस्य दिवाकरा द्वादश कालांशकाः। मार्गिमङ्गलस्य सप्तधराः सप्तदश। मार्गिबुधस्य गुणोऽर्यस्त्रयोदश। मार्गिगुरोर्हरा एकादश। मार्गिशुक्रस्य ग्रहा नव। मार्गिशनेर्बाणधराः पञ्चदश कालांशका इति। अथ वक्रवतां ग्रहाणां क्रमेण इलोना इला भूमिस्तया ऊना एकोना अमी निजनिजकालांशकाः स्युः। कोऽर्थः। वक्रिणो भौमस्य षोडशकाललवाः। एवं वक्रिबुधस्य द्वादश। वक्रिगुरोर्दश। वक्रिशुक्रस्याष्टौ। वक्रिशनेश्चतुर्दशेति ॥ १६ ॥

अथ वंशस्थेन भौमादीनामस्तदिननियममाह।

महीभुवोऽप्यम्बरहेलयो नृपा
वियद्गुणा व्योमचराः षडग्नयः।
दिवौकसां पाशभृतोऽस्तवासरा
दिगाश्रिता ज्ञानिभिरत्र कीर्त्तिताः ॥ १७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महीति । ज्ञानिभिरत्र महीभुवो भौमाद्दिवौकसां ग्रहाणामस्तवासराः । अम्बरहेल्यादयः पाशभृतो वरुणस्य दिगाश्रिताः पश्चिमदिशाश्रिताः कीर्त्तिताः । स्पष्टं तु भौमस्य अम्बरहेलयो विंशत्यधिकशतं पश्चिमदिगाश्रिता अस्तवासराः । एवं बुधस्य नृपाः षोडश । गुरोर्विंयद्गुणास्त्रिंशत् । शुक्रस्य व्योमचरा नव । शनेः षडग्नयः षट्त्रिंशत् ॥ १७ ॥

अथोपजात्या भौमादीनामुदितदिननियममाह ।

क्रमेण तेऽष्टेषुरसैरगाग्निभि-
र्दृगद्रिरामैर्विधुसायकाक्षिभिः ।
प्राच्यां दिनैरङ्कसुरैरथोदिताः
पश्चाद्व्रजन्त्यस्तमयं पुनर्ग्रहाः ॥ १८ ॥

क्रमेणेति । क्रमेण ते भौमादयः पञ्च ग्रहा अष्टेषुरसादिभिर्दिनैः प्राच्यां पूर्वस्यामुदिताः सन्तोऽथ पश्चात् पुनर्ग्रहा अस्तं व्रजन्ति । कोऽर्थः । भौमः पूर्वस्यामष्टेषुरसैरष्टापञ्चाशदधिकषट्शतैर्दिनैरुदितः पश्चादस्तं याति । एवं बुधोऽगाग्निभिः सप्तत्रिंशता दिनैः पश्चादस्तम् । गुरुर्दृगद्रिरामैर्द्वासप्तत्यधिकशतत्रयेण दिनैः पश्चादस्तम् । शुक्रो विधुसायकाक्षिभिरेकपञ्चाशदधिकशतद्वयेन दिनैः पश्चादस्तम् । शनिः पूर्वस्यामुदितात् पश्चादङ्कसुरैरेकोनचत्वारिंशदधिकशतत्रयेण दिनैरस्तं याति ॥ १८ ॥

अथेन्द्रवज्रया वक्रोदितशुक्रबुधयोरस्तोदयदिननियममाह ।

वक्रोदितावष्टजिनाश्च देवा
घस्रास्ततस्तिष्ठत एवमैन्द्र्याम् ।
अस्तं यमाश्वा रदना व्रजेतां
तावुद्गमं काव्यविदौ प्रतीच्याम् ॥ १९ ॥

वक्रा इति । काव्यविदौ शुक्रबुधौ वक्रोदितौ वक्रवन्तौ उदयं प्राप्तौ अष्टजिना अष्टचत्वारिंशदधिकशतद्वयं देवास्त्रयस्त्रिंशत् घस्राश्च गताः सन्तः ततस्तस्यां दिशि पूर्वस्यां तिष्ठतो वसतः । पश्चादैन्द्र्यां पूर्वस्यामेवास्तं व्रजेताम् । च-पुनः शुक्रबुधौ अस्तानन्तरं यमाश्वा द्वासप्ततिर्वासरा रदना द्वात्रिंशद्वासरा गताः सन्तः । प्रतीच्यां पश्चिमायामुदयं व्रजेताम् । कोऽर्थः । शुक्रः पूर्वस्यां वक्रोदितादारभ्य अष्टाचत्वारिंशदधिकशतद्वयमितेषु गतेषु पुनः पूर्वस्यामेवास्तं याति । अस्तदिनादारभ्य द्वासप्त-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिदिनेषु गतेषु शुक्रः पुनः पश्चिमायामुदयं याति । एवं बुधोऽपि स्वमानेनेति । अयं विशेषः । भौमादयः सर्वे ग्रहाः पूर्वस्यामुदयं यान्ति पश्चिमायामस्तं यान्ति । पुनः शुक्रबुधौ पूर्वस्यामुदयमस्तं च यात इति ॥ १९ ॥

अथोपजात्यैतन्मतं दृढयति ।

अवक्रवक्रास्तमयोदयानां
मानं यतः स्थूलतयैतदुक्तम् ।
प्रत्यक्षमश्रान्तमृतेऽवबोधे-
ऽनेनानुवेलं न हि गोचरस्य ॥ २० ॥

अवक्रेति । हीति निश्चितम् । अवक्रवक्रास्तमयोदयानां ग्रहाणामेतन्मानं स्थूलतया उक्तम् । यतः कारणादवबोधे ज्ञाने गोचरस्यानेन मानेन कृते विनाऽश्रान्तं निरन्तरमनुवेलं समयं प्रति प्रत्यक्षं नास्ति ॥ २० ॥

अथेन्द्रवज्रयोत्पातलक्षणग्रहमाह ।

वक्री दिवौका निजवक्रघस्रै-
र्यस्तस्य पूर्वोदितमध्यराशेः ।
भोगादनल्पो ननु राशिभोगो
ज्ञेयोऽयमुत्पाहतो ग्रहज्ञैः ॥ २१ ॥

वक्रीति । यो वक्री वक्रवान् दिवौका ग्रहो निजवक्रघस्रैः पूर्वोदितमध्यराशेर्भोगादनल्पो महान् तदा ननु निश्चितम् । ग्रहज्ञैस्तस्य ग्रहस्यायं राशिभोग उत्पातहतो ज्ञेयः । दिवि गगने ओको गेहो यस्य स दिवौकाः । दिवोकाः पृषोदरादित्वात् शब्दभेदेऽपि ॥ २१ ॥

अथोपजात्या ग्रहाणां वयोऽवस्थामाह ।

निजास्ततोऽहानि पुरातनोऽर्वा-
गूर्ध्वं शिशुः स्यादुदयाद्दिवौकाः ।
स्वास्तध्रुवेदांशमितानि सद्भि-
रुक्तस्तदुक्त्याश्रितगोमनोभिः ॥ २२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निजेति । निजास्ततः स्वास्तमयादर्वाक् पूर्वं दिवौका ग्रहः पुरातनो वृद्धः स्यात् । पुनरुदयादूर्ध्वमुपरि शिशुः स्यात् । किंयत्कालम् । स्वास्तद्युवेदांशमितानि निजास्तमयदिनानां चतुर्थभागप्रमितान्यहानि दिनानि एतावत्कालमिति । "कालाध्वनोः"-इति द्वितीया । इति सद्भिरुक्तः । किंभूतैस्तदुक्त्याश्रितगोमनोभिस्तेषां ग्रहाणामुक्तिस्तयाऽऽश्रितं गौर्वाग् मनश्चित्तं येषां ते तैरित्यर्थः ॥ २२ ॥

अथ विशेषमाह ।

सदौषधीशोऽस्तमयाद्दिनैक-
मेकं स्मृतो बालपुराणकायः ।
अगोरहो दर्शनमिन्दुहेल्यो-
र्ग्रहेऽथ केतोर्दिनविंशतिः स्यात् ॥ २३ ॥

सदौषेति । सदा ओषधीशश्चन्द्रोऽस्तमयाद्दिनैकमेकं दिनं बालपुराणकायः स्मृतः । अस्तादेकं दिनं बालः । अस्तात् प्रागेकं दिनं वृद्धः । अथ पुनरगो राहोरिन्दुहेल्योश्चन्द्रसूर्ययोर्ग्रहे ग्रहणेऽहरेकदिनं पूर्वापरत्वेनार्धमर्धं वृद्धो बालः । केतोर्दर्शने दिनविंशतिर्बालपुराणकायः ॥ २३ ॥

अथ प्रकारान्तरमाह ।

के चिज्जरत्त्वं किल दारकत्वं
मितानि वा काललवैर्निजैः स्यात् ।
अहान्यथो वासनयेति घस्रै-
र्विश्वैर्जगुः कालगतेर्ग्रहस्य ॥ २४ ॥

के चिदि । किलेति सम्भावनायाम् । कालगतेरस्तं गतस्य ग्रहस्य निजैः काललवैर्मितान्यहानि यावत् जरत्त्वं वृद्धत्वं दारकत्वं बालत्वं च स्यात् । अथो वा घस्रैः पञ्चदशभिर्विश्वैस्त्रयोदशभिर्मितान्यहानि जरत्त्वं बालत्वं स्यादिति वासनया भावनया के चित् बुधा जगुः ।

अथ ग्रहाणां राशिभोगमाह ।

एकर्क्षभोगोऽष्टशती कलाः स्यात्
सपादधिष्ण्यद्वयमेकराशेः ।
भोगो ग्रहाणां भयुगांशपादः
सद्वैकभोगे च नवांशकाः स्युः ॥ २५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एकेति । ग्रहणामेकर्क्षभोग एकनक्षत्रभोगोऽष्टशती । अष्टानां शतानां समाहारोऽष्टशती कलाः । त्रयोदश अंशा विंशतिः कलाः स्युः । सपादधिष्ण्यद्वयमेकचरणसहितनक्षत्रद्वयमेकराशिभोगः स्यात् । च-पुनः सदैकभोगे एकराशिभोगे भयुगांशपादः सपादनक्षत्रद्वयं नवांशकाः स्युरित्यर्थः ॥ २५ ॥

अथ विशेषत आह ।

भुक्तौषधीशप्रमदाङ्घ्रिराशे-
रिता नवाप्ता ननु राशयः स्युः ।
अथादिभाच्छेषमिता नवांशा
ज्ञेया ग्रहाणामिति राशिभोगः ॥ २६ ॥

भुक्तौ इति । ननु निश्चितम् । अथ आदिभादश्विनीतो भुक्ता ओषधीशप्रमदानां नक्षत्राणामङ्घ्रयश्चरणा येन स चासौ राशिश्च तस्माद्राशेरिताः प्राप्ता नवभिराप्ता लब्धा ग्रहाणां राशयः स्युः । अथ पुनः । शेषमिताः शेषनक्षत्रचरणमिता ग्रहाणां नवांशा ज्ञेया इति राशिभोगः ॥ २६ ॥

अथ मनुजानां राशिमाह ।

शरीरिणश्चण्डघृणीतरांशु-
र्यत्र स्थितो जन्मनि भे स राशिः ।
अज्ञातजन्मद्युभकालजन्तोः
प्रसिद्धनामाक्षरतो जनेर्वा ॥ २७ ॥

शरीति । शरीरिणो मानवस्य स राशिर्भवेत् । स कः । जन्मनि यत्र यस्मिन् भे राशौ चण्डघृणिः सूर्यस्तस्मात् इतरांशुः शीतांशुश्चन्द्रः स्थितो भवेत् । वा इति पक्षान्तरे । अज्ञातजन्मद्युभकालजन्तोरविदितजन्मदिननक्षत्रसमयं यस्य स चासौ जन्तुर्मर्त्यस्तस्य जनेर्जन्मसमयादारभ्य प्रसिद्धनामाक्षरतः ख्यातनाम्न आदिव्यञ्जनतो राशिः स्यात् ॥ २७ ॥

अथ खलसौम्यग्रहानाह ।

क्षीणौषधीशारयमांशुमालिनः
पापाः सदाऽन्ये खचराश्च साधवः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नभश्चराणामिह येऽपि राशयः
स्मृताः खलानां विबुधैरसाधवः ॥ २८ ॥

क्षीणौ-इति । सदा क्षीणौषधीशः क्षयश्चन्द्रः । आरो भौमः । यमः शनिः । अंशुमाली सूर्यश्चैते पापाः क्रूराः । अन्ये । बली चन्द्रः । बुधः शुक्रः गुरुश्च । खेचराः साधवः सौम्याः । इह खलानां ग्रहाणां येऽपि राशयो विबुधैस्ते राशयोऽसाधवोऽसौम्याः स्मृताः ॥ २८ ॥

अथ वर्णनद्वारेण सूर्यस्य सिंहगृहं स्थापयति । तत्र सिंहराशिं तत्स्वामिनं च वर्णयति ।

पञ्चाननाख्यो हि यथेभचक्रे
पञ्चाननाख्योऽस्ति तथा भचक्रे ।
एनं हरिः पालयितुं क्षमोऽस्य
कृतं तदित्येतदगारमाद्यैः ॥ २९ ॥

पञ्चेति । हीति विशेषार्थे । यथा इभचक्रे गजयूथे पञ्चाननाख्यः सिंहोऽस्ति तथा भचक्रे राशिसमूहे पञ्चाननाख्यः सिंहराशिरस्ति । अतो हरिः सूर्य एनं सिंहराशिं पालयितुं क्षमोऽस्ति । अत्र शब्दबलात् हरिरेव हरिं पालयितुं क्षमो नान्यः । इति हेतोराद्यैर्विबुधैरस्य सूर्यस्यैतदागारं सिंहः कृतम् ॥ २९ ॥

अथ रविचन्द्रयोः षण्णां राशीनां स्वामित्वमाह ।

सिंहादिचक्रार्धपती रविः स्याद्-
विलोमकीटादिभखण्डपोऽब्जः ।
पतङ्गधामासविधं तमीशः
स्थातुं कुलीरे त्वकरोदगारम् ॥ ३० ॥

सिंहेति । रविः सिंहादिचक्रार्धपतिः स्यात् । कोऽर्थः । सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकर एषां पतिः सूर्यः । अथाब्जश्चन्द्रो विलोमकीटादिभखण्डपो विलोमगणनया कर्कादिराशिस्वामी स्यात् । कोऽर्थः । कर्कः, मिथुनं, वृषः, मेषः, मीनः, कुम्भः इति । अथ वर्णनद्वारेण चन्द्रस्य कर्कगृहं स्थापयति । तुरित्यवधारणे । तमीशश्चन्द्रः कुलीरे कर्कराशौ अगारं गेहमकरोत् कृतवान् । किं कर्त्तुं पतङ्गस्य रवेर्धाम्नो गृहस्य आसविधं सामस्त्येन समीपं स्थातुम् । अत्र त्रयः पाठाः । एकः प्रोक्तः । द्वितीयः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ह्यकरोरगारम्। अत्र द्वे तमीश इति वाच्यम्। तृतीयस्तु चकरोरजं चेति। अत्राहं तमीश उरजं गृहम्। चकर करोमि स्मेति शेषं तथैव ॥ ३० ॥

अथ ग्रहाणां राशिगृहाण्याह।

उच्चोच्चमार्गे चरतां ग्रहाणां
बुधाननानामवनेरिनेन्द्वोः।
प्रतिष्ठितान्यालयतः पुराणै-
र्द्विजैरथौकांसि यथाक्रमेण ॥ ३१ ॥

उच्चेति। पुराणैर्वृद्धैर्द्विजैर्यथाक्रमेणेनेन्द्वोः सूर्यचन्द्रयोरालयतो गृहाभ्यामोकांसि गृहाणि प्रतिष्ठितानि कथितानि। केषां बुधाननानां बुधप्रमुखाणां ग्रहणाम्। अवनेः क्षितेः सकाशात्। उच्चोच्चमार्गे चरतां गच्छताम्। कोऽर्थः। बुधादीनाम्। बुधशुक्रभौमगुरुशनीनां सूर्यात् सिंहादिषड्गृहाणि प्रोक्तानि। अथ विलोमेन चन्द्रात् कर्कादिषड्गृहाणि। यथा सूर्यस्य सिंहः बुधस्य कन्यामिथुने। शुक्रस्य तुलावृषौ। मङ्गलस्य मेषवृश्चिकौ। गुरोर्मीनधनुषी। शनेर्मकर कुम्भौ ॥ ३१ ॥

दुरध्वगाछन्दसा स्पष्टतो द्वादशराशीनां स्वामिन आह।

षडङ्घ्रिविभपो रसाभगो भृगुर्घटभशाङ्कराह्वयोः।
वशाजितुमयोर्विदीश्वरोऽनुगो भवति कर्किणो भपः ॥ ३२ ॥
भगो नखरहेतिनायकः शरासनवनालयाख्यपः।
गुरुस्तिमिरवैरिजो बुधैः स्मृतः कलशनक्रभेश्वरः ॥ ३३ ॥

षडिति। रसायां भूमौ भगो योनिर्यस्य स रसाभगो भौमः। षडङ्घ्रिर्वृश्चिकः। अविभं मेषराशिः। तयोर्द्वन्द्वे। एतयोः स्वामी। एवं घटभं तुला। शाङ्करो वृषः। एतयोः स्वामी भृगुः। "गौर्वलीवर्दश्च शाङ्कर"-इति 'हैमः'। शङ्करः शाङ्कर इति शब्दप्रभेदेऽपि। वशाजितुमयोः कन्यामिथुनयोर्विदीश्वरो बुधः स्वामी। कर्किणः कर्कस्य भपो नक्षत्रपतिश्चन्द्रोऽनुगः स्वामी। "अनुगः स्वामिसेवकयोः"-इत्यनेकार्थः। भगेति। नखरा नखा हेतिरस्त्रं यस्य स नखरहेतिः सिंहस्तस्य नायको भगः सूर्यः। शराशनं धनुः। वने जले आलयो यस्य स मीन इमौ पातीति धनुर्मीनयोः पतिर्गुरुः। कलशः कुम्भः नक्रभं मकरराशिरेतयोरीश्वरः। तिमिरवैरिजः सूर्यात्मजः शनिर्बुधैः स्मृतः। "हेतिः प्रहरणं शस्त्रम्"-इति 'हैमः' ॥ ३२-३३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ सूर्यादीनामुच्चनीचराशीनाह ।

क्रमादजभगोमृगाबलाकुलीरतिमितौलिराशयः ।
हरेः स्युरथ तुङ्गसंज्ञितास्तदद्रिमितराशयो नताः ॥ ३४ ॥

क्रमेति । अथ हरेः सूर्यात् क्रमेणाजादिराशयस्तुङ्गसंज्ञिता उच्चाः स्युः । पुनस्तस्मादद्रिमितराशयो नता नीचाः स्युः । कोऽर्थः । सूर्यस्याजभं मेषराशिस्तस्मात् सप्तमी तुला उच्चनीचौ । एवं सोमस्य गौर्वृषो वृश्चिकश्चोच्चनीचौ । मङ्गलस्य मृगो मकरः कर्कश्च । बुधस्यावला कन्या मीनश्च । गुरोः कुलीरः कर्को मकरश्च । शुक्रस्य तिमिर्मीनः कन्या च । शनेस्तौलिराशिस्तुला मेषश्च उच्चनीचौ ॥ ३४ ॥

अथ राहुकेत्वोरुच्चनीचाभावमाह ।

न कल्पितमगोश्च मन्दिरं महर्षिभिरनुच्चमुच्चकम् ।
तथा शिखिन आकृतेस्तयोर्गतेरनियमादभावतः ॥ ३५ ॥

न कल्पितेति । महर्षिभिरगो राहोस्तथा शिखिनः केतोश्चोच्चकमनुच्चकं मन्दिरं च न कल्पितं न कथितम् । कस्मादनियमादनिश्चयेन । तयो राहुकेत्वोराकृतेः शरीरस्य गतेर्गमनस्याभावत इति ॥ ३५ ॥

अथ मतान्तरमाह ।

तथाऽप्युदितमास्पदं वशा त्वगोर्मिथुनमुच्चमस्तभम् ।
अनुच्चमपरैरतोऽस्तभं कुलादिकमिदं शिखावतः ॥ ३६ ॥

तथेति । तुपुनस्तथाऽप्यपरैर्बुधैरगो राहोर्वशा कन्या आस्पदं गृहमुदितं प्रोक्तम् । पुनरस्य मिथुनगृहमुच्चम् । अस्तभं धनूराशिरनुच्चम् । शिखावतः केतोरतः कन्यातो मिथुनतो धनुस्तोऽस्तभं सप्तमं कुलादिकं गृहादिकं प्रोक्तम् । कोऽर्थः । निजं मीनभवनम् । आदिशब्दात् धनुरुच्चं मिथुनं नीचं प्रोक्तमिति ॥ ३६ ॥

अथ राहुकेत्वोर्भेदमाह ।

कमासुरमगुं पुराणगा विदुः स्वरविदोऽहिविग्रहम् ।
तमोमयमिह स्वकर्मणा सदेति च कभेदवानयम् ॥ ३७ ॥

कमेति । स्वरविदः पुराणगा आसुरं श्मश्रूपलक्षितं कं मस्तकमगुं राहुं विदुः । च-पुनरहिविग्रहं सर्पशरीरं तमोमयं तमःस्वरूपं केतुं विदुः । इतीह लोकेऽयं ग्रहः स्व-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्मणाऽमृतपानापराधेन सदा कभेदवान् कस्य शरीरस्य भेद उक्तः। पृथक् मस्तकं पृथगन्यत्। "मूर्ध्नि चित्ते जले काये"-इत्यादिकशब्दार्थः ॥ ३७ ॥

अथास्य प्रमाणतामाह।

सदाऽऽगमपुराणसंहितास्वयं
किल खगो विधुन्तुदः।
शिखी गणितभुक्तिदर्शनात्
प्रसिद्ध इति तथ्यमस्त्यपि ॥ ३८ ॥

सदेति। किलेति संभावनायाम्। अयं विधुन्तुदो राहुः शिखी केतुः खग आगमा वेदाः पुराणं संहिता एतासु। गणितं राश्यादि। भुक्तिर्गतिः कलादिः। अनयोर्दर्शनात् सदा प्रसिद्ध इति तथ्यं सत्यमस्त्यपि। उक्तं च—

"प्रायः सदा दानफलानि पुंसां भवन्ति तत्तद्युचरं निमित्तम्।
सप्तैव तान् के चिदुदाहरन्ति नव ग्रहानप्यपरे मुनीन्द्राः ॥
हिरण्यगर्भो भुवनं सिसृक्षुः सप्तैव वारानसृजद्युगादौ।
उत्पातरूपाच्छिखिनोऽगुमिन्दोः पातं च सप्तैवमतो ग्रहाः स्युः ॥
न गोचरे नापि विलग्नराशौ भूयो निरुक्तं ग्रहशास्त्रतज्ज्ञैः।
स्वर्भानुकेत्वोः सदसत्फलत्वमस्तीति जल्पन्ति च के चिदेवम् ॥
नाब्दाधिपत्यं न दिनाधिपत्यं न गोचरस्थानबलाबलेषु।
होरादशायां च तथाऽष्टवर्गे तथाऽपि मूढाः प्रवदन्ति राहुम् ॥
न दृष्टमन्यत्र फलान्वितं तमस्तथाऽपि वाच्यं क्व चिदीरितं यतः।
अनुक्तमात्रं न हि तद्विरोधकं विभिन्नवाक्येऽपि समानदोषतः ॥
एकत्र दर्शनान्मूढैर्नान्यत्राप्युक्त*मिष्यते।
जलासत्त्वेन सर्वत्र न ह्यसत्त्वं विभावसोः ॥
राहुः† पीडाग्रहौ कुर्याच्चन्द्रभास्करयोरपि।
मनुष्याणामुदासीनः स मूढः कथ्यते कथम् ॥
तावद्वृषाङ्को भुवनत्रयस्य सर्गस्थितिध्वंसविधौ विधाता।
तेः शम्भुमूर्ध्नाधृतमिन्दुमद्यात् तथाऽपि मूढा न वदन्ति राहुम् ॥

---

* न्यत्रायुक्त-इति क. पु. पा.। † यः पीडानुग्रहौ-इति अ. पु. पा.।
ः तेनापिमूर्ध्ना-इति अ. पु. पा.।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आदौ हि सृष्टेः शतपत्रजन्मा ससर्ज मन्दग्रहशीघ्रपातान् ।
अकल्पयत् तेषु नवग्रहाँश्च तेषां च मध्येऽकृत सप्त वारान् ॥

कलात्रयं रुद्रविलिप्तिकाढ्यं तमोऽन्वहं व्यस्तगतं भुनक्ति ।
गजाश्विलिप्तासहितेन वाऽर्कमन्वेति भागत्रितयेन केतुः ॥

अत्रानुमानेऽपि च भुक्तिमन्वहे हेतोरनैकान्तिकता हि दृष्टा ।
अतो न तेषां ग्रहता परेषां तदन्यथा सम्भवतोऽन्यदूह्यम् ॥

मन्दोच्चपातेष्वपि भुक्तिमत्त्वे न विश्वजन्मा विदधे ग्रहत्वम् ।
तेषां पृथक् कर्मतपःप्रभावो हेतुर्ग्रहत्वे न तु भुक्तिमत्त्वम् ॥

प्रासादकूपादिजलाशयानामुद्यापने दैवतशाखिनां च ।
ग्रहार्चने शान्तिकपौष्टिकेषु नवग्रहाणां जगति प्रसिद्धिम् ॥

राहुं पुराणेष्वसुरोत्तमाङ्गं भुजङ्गरूपं स्वरशास्त्रकाराः ।
तमिश्ररूपं जगदुर्ग्रहज्ञाः स्वरूपभेदोऽस्य तु कार्यभेदात् ॥

अष्टाधिकं केतुसहस्रमाहुर्वराहललप्रमुखा ग्रहज्ञाः ।
ते चाग्निकालद्रुहिणान्तकार्कग्रहोद्भवास्तामसकीलकाद्याः ॥

वृत्तिं विधास्यन् शिखिनां गणानां चकार सत्कर्मविभागमाद्याः ।
येषां तु यस्मिन्नुपहारभागः प्रकल्पितः कर्मणि तत्र ते स्युः ॥

व्यासोऽङ्गिराः शौनकवामदेवपराशराश्चात्रिमरीचिमुख्याः ।
अस्त्येव राहुं प्रवदन्त्यतस्तैर्लग्नेन्दुवेधादिषु चात्र चिन्त्यः ॥

छिन्नं शिरः किल सुधां पिबतोऽसुरस्य प्राणान्न चात्यजदथामरवृन्दभर्त्तुम् ।
दृष्ट्वोद्यतं विधिरदादमरत्वमस्य पूजासु पुष्करसदां भविताऽष्टमस्त्वम् ॥

जितेषु देवेषु पुराऽसुरेन्द्रैर्जघ्नुः(?) सुरारीञ् शिखिनोऽथ वेधाः ।
देवैः सहाजः परितोषमेत्य प्रान्ते ग्रहाणां नियुयोज केतुम् ॥

यथा गोचरेणार्कपुत्रो विधत्ते तथा राहुकेतू फलं साध्वसाधु ।
विधत्तो मिथो वेधकौ नार्कमन्दौ बुधेन्दू च यद्वत् तथा राहुकेतू ॥

विवाहादिसत्कर्मकार्येषु लग्ने विचिन्त्यं बलं मन्दवद्राहुकेत्वोः ।
सलत्तानि पातो भवेद्यस्तु केतोर्विचिन्त्यार्कवच्चापि नक्षत्रशुद्धिः" ॥
इति 'संहिताप्रदीपे' ॥ ३८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वसन्ततिलकया काव्यत्रयेण ग्रहाणां मित्रचक्रमाह ।

सर्वंसहात्मजहरीज्यतुषारभासो
मित्राणि हंसजसितावहितौ समोऽन्यः ।
भानोर्विधो रविविदौ सुहृदावथान्ये
मध्याः समावसितभोशनसावरिर्ज्ञः ॥ ३९ ॥

अन्येऽसृजः सुहृद इन्दुभुवोऽभियातिः
सोमोऽसृगैनिधिषणाश्च समाः सखायौ ।
अन्यौ च वासवगुरोरहितौ कविज्ञौ
मध्यो यमोऽंशुकुजचन्द्रमसोऽप्यतीष्टाः ॥ ४० ॥

सौम्यासितावथ भृगोः सुहृदौ रवीन्दू
प्रत्यर्थिनौ त्रिदशवन्द्यकुजौ समौ स्तः ।
मध्यो गुरुर्भृगुजचन्द्रसुतौ यमस्य
मित्रे परेऽरय इतीह मयोच्यतेऽतः ॥ ४१ ॥

सर्वमिति । इतीह शास्त्रेऽतो हेतोर्मयोच्यते । इति किं तदाह । सर्वंसहा भूमिस्तस्या आत्मजो भौमः । हरीज्य इन्द्रपूज्यो गुरुः । तुषारभाश्चन्द्रः । एते भानोर्मित्राणि स्युः । हंसजः सूर्यात्मजः शनिः । सितः शुक्रः । एतौ अहितौ अरी । अन्यो बुधः समः । अथ विधोश्चन्द्रस्य रविविदौ सूर्यबुधौ सुहृदौ मित्रे । अन्ये समाः । चन्द्रस्य वैरी नास्ति । अथासृजो मङ्गलस्य । असितभः कृष्णप्रभः शनिः । उशना शुक्रः । एतौ समौ । बुधोऽरिः । अन्ये सुहृदो मित्राणि । अथेन्दुभुवो बुधस्य सोमोऽभियातिर्वैरी । असृग् भौमः । ऐनिः शनिः । धिषणो गुरुः । एते समाः । अन्यौ सखायौ मित्रे । अथ च वासवगुरोरिन्द्रगुरोर्बृहस्पतेः । कविज्ञौ शुक्रबुधौ अहितौ । यमः शनिर्मध्यः समः । अंशुः सूर्यः कुजो मङ्गलश्चन्द्रमा एतेऽतीष्टा अतिमित्राणि । अथ भृगोः शुक्रस्य सौम्यो बुधः । असितः शनिः । एतौ सुहृदौ । रवीन्दू प्रत्यर्थिनौ शत्रू । त्रिदशवन्द्यो गुरुः । कुजो भौमः । एतौ समौ स्तः । अथ यमस्य शनेर्गुरुर्मध्यः समः । भृगुजः शुक्रः । चन्द्रसुतो बुधः । एतौ मित्रे । परेऽपरेऽरयः शत्रव इति ॥ ३९-४१ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तात्कालिकग्रहाणां मित्रचक्रमाह ।

मूर्त्तेरथो सविधकेन्द्रयुगानुगाश्च
तात्कालिका इति सभाजनवन्त उक्ताः ।
तज्जैर्मिथोऽन्यगृहगा अभियातयोऽतः
सर्वत्र राशिवलये द्विजवर्त्ममार्गाः ॥ ४२ ॥

मूर्त्तेरिति । अथ तज्जैः । द्विजवर्त्म पक्षिमार्गो नभस्तस्मिन् मार्गा एषां ते द्विजवर्त्ममार्गा ग्रहास्तात्कालिका जन्मादिसमयभवाः । भूतेर्लग्नात् । सविधकेन्द्रयुगानुगाः पूर्वानुपश्चात्समीपकेन्द्रयुग्मगताः । कोऽर्थः । धनसहजसहृद्भवनगता व्ययायकर्मभवनगता मिथः परस्परं सभाजनवन्तो मित्राणि उक्ताः । कस्मिन् सर्वत्र राशिवलये । अतः परमन्यगृहगा अभियातयः शत्रव उक्ताः । आलिङ्ग्य कुशलादिपृच्छा सभाजनं कथ्यते । यतः "आनन्दनत्वात् प्रश्नः स्यात् सभाजनमित्यपि"-इति 'हैमः' । अभिमानिरभियातिश्चेति शब्दप्रभेदे साधुसुन्दरगणः ॥ ४२ ॥

अथ सदुक्त्या मतान्तरं निषेधयति ।

शक्त्यत्रिदेवलवराहविरोचनाद्या
मित्रादिकं त्रिगुणभावभृतां ग्रहाणाम् ।
युक्त्यन्वितं बभणुरप्यपरैरदो य-
दुक्तं निसर्गजनितं तदयुक्तिमत् स्यात् ॥ ४३ ॥

सक्त्येति । शक्त्यत्रिदेवलादयस्त्रिगुणभावभृतां ग्रहाणां मित्रादिकं मित्रसमशत्रुरूपं तदन्वितं युक्त्यन्वितं बभणुर्जगुः । अपि पुनरपरैर्यत् मित्रादिकं निसर्गजनितं स्वभावजातं न पुनस्तात्कालिकमित्युक्तं तदयुक्तिमत् न युक्तिमत् स्यात् ॥ ४३ ॥

अथ फलदायिग्रहमाह ।

ज्ञेयः स्वकीयनिलयोच्चसुहृद्गृहस्थो-
ऽवक्री शचीरमणबुद्धिसहाययुक्तः ।
धिष्ण्यान्वितो मृधजयी स बली ग्रहेन्द्रो
यो गोचरादिभवपूर्णफलप्रदः स्यात् ॥ ४४ ॥

ज्ञेय इति । यो ग्रहेन्द्रो गोचरादिभवपूर्णफलप्रदः स्यात् । स ग्रह एवंविधो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञेयः। स्वकीयेति। निजभवनस्थ उच्चभवनस्थो मित्रभवनस्थोऽवक्री मार्गस्थः। शचीरमणः पौलोमीपतिरिन्द्रस्तस्य बुद्धिसहायः प्रधानो गुरुस्तेन युक्तः। धिष्ण्यान्वितः शुक्रयुक्तः। मृधजयी संग्रामे जयप्राप्तः। बली ग्रहयुद्धे उत्तरचारी ग्रहो बली इति ॥ ३४ ॥

अथ विफलग्रहमाह।

योऽनुच्चगोऽरिकुलगोऽर्कविलुप्तदीप्तिः
पाताङ्गजस्तृक्तिमिरदीप्तियुतो विवेगः।
सुस्थानगोऽपि खचरो विफलो भचक्रे
स्यात् साहितोऽहितखलग्रहवर्गवान् सः ॥ ४५ ॥

य इति। यः सुस्थानगः शुभस्थानगतोऽपि खचरो ग्रहो भचक्रे नक्षत्रमण्डले एवंविधः स्यात्। योऽनुच्चगो नीचभवनगतः। अरिकुलगः शत्रुगृहगतः। "सभोदवसितं कुलम्"-इति 'हैमः'। अर्कविलुप्तदीप्तिरस्तं गतः। पाताङ्गजः पतङ्गस्य सूर्यस्यापत्यं शनिः। अङ्गज भौमः। तिमिराणामन्धकाराणां दीप्तिर्ज्वलनमर्थशक्त्या विनाशो यस्मात् स तिमिरदीप्तिः सूर्यः। एभिर्युक्तः। विगतो वेगो मन्दः। साहितः शत्रुग्रहस्य हितः। अहितः शत्रुः। खलग्रहः पापग्रहः। एषां द्वन्द्वे। एषां वर्गः षट्वर्गोऽस्यास्तीत्यऽहितखलग्रहवर्गवान्। स ग्रहो विफलो निष्फलः स्यात् ॥ ४५ ॥

अथ द्रुतविलम्बितेन द्वादशभवनान्याह।

ककसहोत्थकसून्वहिताबला-
लयवृषाह्वयकर्मफलागमाः।
व्यय इतीनमिताः किल भावता
निगदिता विबुधैरुदयात् क्रमात् ॥ ४६ ॥

ककेति। किलेति सत्ये। विबुधैरुदयाल्लग्नात्। क्रमेण इनमिता द्वादशभिर्मिता भवनानां भावा भावता निगदिताः प्रोक्ताः। इतीति किं तदाह। ककेति। कं कायं तनुभवनम्। कं धनं तद्भवनम्। सहोत्थः सहजभवनम्। कं सुखभवनम्। सूनुः सुतभवनम्। अहितो रिपुभवनम्। अबला जायाभवनम्। लयो मृत्युभवनम्। वृषो धर्मभवनम्। कर्मभवनम्। फलागम आयभवनम्। एषां द्वन्द्वे एते। व्ययभवनम्।

"मूर्ध्नि चित्ते जले काये मुखे ब्रह्मणि मारुते।
काले लाभे सुवर्णे च कशब्दो द्रविणेऽध्वनि"-इति-'अनेकार्थध्वनिमञ्जरी' ॥४६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ ग्रहाणां फलमाह । तत्र प्रथमं रविफलम् ।

सहजलाभविपक्षनभःस्थितो
जनिभतो निखिलार्थसुखप्रदः ।
भवति विध्यत एव न चेद्रवि-
र्वृषसुतान्त्यशगैर्वियमैर्ग्रहैः ॥ ४७ ॥

सहेति । चेद्यदि वियमैः शनिरहितैः । वृषेति । वृषो धर्मः । नवमं भवनम् । एवं सुतः पञ्चमम् । अन्त्यं द्वादशम् । शं शुखं चतुर्थम् । एषु गतैर्ग्रहैरविर्न विध्यते । एवं तदा रविर्जनिभतो जन्मराशितः सहजेति । तृतीयैकादशदशमभवनस्थितो निखिलार्थसुखप्रदो भवति ॥ ४७ ॥

अथ चन्द्रफलमाह ।

असमहेत्यरिखाङ्गबलायगो
हिमगभस्तिरनिष्टहरो ग्रहैः ।
द्रविणरिःफकगोवृषनाशगै-
र्यदि न विध्यत इन्दुजवर्जितैः ॥ ४८ ॥

असमेति । यदि चेत् इन्दुजेन बुधेन वर्जितैर्बुधरहितैः । द्रविणं धनं द्वितीयभवनम् । एवं रिःफद्वादशम् । कं सुखं चतुर्थम् । गौर्बुद्धिः पञ्चमम् । वृषो धर्मो नवमम् । नाशो मृत्युरष्टमम् । एषां द्वन्द्वे एषु गतैर्ग्रहैर्हिमगभस्तिश्चन्द्रो न विध्यते तदा चन्द्रोऽनिष्टहरः सुखदायी स्यात । किंभूतश्चन्द्रः । असमा विषमा हेतयोऽस्त्राणि यस्य सोऽसमहेतिः कामो जायाभवनम् । अरिः षष्ठम् । खं दशम् । अङ्गं प्रथमम् । बलं पराक्रमस्तृतीयम् । आय एकादशम् । एषां द्वन्द्वे एषु गतः ॥ ४८ ॥

अथ भौमफलमाह ।

सहजशत्रुफलागमगो भतः
सहजमित्रफलागमदो ग्रहैः ।
भवति विद्धघनो न हि जन्मनो
यदि कुजोऽन्त्यतपःप्रतिभास्थितैः ॥ ४९ ॥

सहजेति । यदि अन्त्यं द्वादशम् । तपो नवमम् । प्रतिभा बुद्धिः पञ्चमम् । एषु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्थितैर्ग्रहैर्विद्धो घनः शरीरं यस्य स विद्धघनः कुजो भौमो न भवति तदा कुजः । सहजाः सहोदरा मित्राणि चैषां फलागमदो लाभदायी भवति । किंभूतः कुजः । जन्मनो जन्मसम्बन्धिनो भतो राशितः सहजस्तृतीयभवनम् । शत्रुः षष्ठम् । फलागम आय एकादशम् । एषु गतः ॥ ४९ ॥

अथ बुधफलमाह ।

धनसवित्र्यरिकालखलाभगो
विधुसुतः शुभकृद्वितमीश्वरैः ।
मतिपराक्रमधर्मधनात्यय-
व्ययगतैर्न खगैर्यदि विध्यते ॥ ५० ॥

धनेति । यदि वितमीश्वरैश्चन्द्ररहितैः । मतिः पञ्चमम् । पराक्रमस्तृतीयम् । धर्मो नवमम् । धनः शरीरं प्रथमम् । अत्ययो मृत्युरष्टमम् । एषु भवनेषु गतैर्ग्रहैर्विधुसुतो बुधो न विध्यते । तदा बुधः शुभकृत् स्यात् । कथम्भूतो बुधः । धनं द्वितीयभवनम् । सवित्री माता चतुर्थम् । अरिः षष्ठम् । कालो मृत्युरष्टमम् । खं दशमम् । लाभ एकादशम् । एषु भवनेषु गतः ॥ ५० ॥

अथ गुरुफलमाह ।

द्रविणलाभवृषस्मरधीस्थितो
द्रविणलाभवृषस्मरधीप्रदः ।
यदि न विद्ध इहेन्द्रगुरुर्ग्रहै-
र्व्ययविनाशखविक्रमनीरगैः ॥ ५१ ॥

द्रविणेति । इह व्ययो द्वादशम् । विनाशोऽष्टमम् । खं दशमम् । विक्रमस्तृतीयम् । नीरं चतुर्थम् । एषु भवनेषु गतैर्ग्रहैर्न विद्धो गुरुस्तदेन्द्रगुरुर्द्रविणं धनं तथा लाभो । वृषो धर्मः । स्मरः कन्दर्पः । धीर्बुद्धिरेषां द्वन्द्वे एतान् प्रददातीति एतत्प्रदो भवति । किंभूत इन्द्रगुरुः । द्रविणं धनभवनम् । लाभ एकादशम् । वृषो धर्मो नवमम् । स्मरः कामो जायाभवनम् । धीर्बुद्धिः पञ्चमम् । एषु भवनेषु स्थितः ॥ ५१ ॥

अथ शुक्रफलमाह ।

व्ययलयातनयायतपःस्थितो
यदि न विद्धृतनुर्द्युचरैः खदः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अहितबुद्धिलयास्तपुराम्बर-
क्रतुबलायगतैरसुरार्चितः ॥ ५२ ॥

व्ययेति । यदि अहितः षष्ठम् । बुद्धिः पञ्चमम् । लयोऽष्टमम् । अस्तं सप्तमम् । पुरं शरीरं प्रथमम् । अम्बरं दशमम् । क्रतुर्यज्ञ उपलक्षणया धर्मो नवमम् । बलं तृतीयम् । आय एकादशम् । एषु गतैर्ग्रहैर्खेटैर्विद्धा तनुः शरीरं यस्य सोऽसुरार्चितः शुक्रो न तदा शुक्रः स्वदो धनदायको भवति । किंलक्षणः शुक्रः । व्ययो द्वादशम् । लयोऽष्टमम् । आतनयं सुतभवनं मर्यादीकृत्य । "आङ् मर्यादायाम्" । कोऽर्थः । प्रथमम् । द्वितीयम् । तृतीयम् । चतुर्थम् । पञ्चमम् । आय एकादशम् । तपो नवमम् । एषु स्थितः । तपःशब्दोऽकारान्तोऽप्यस्ति । अथ वा "खरि परे शरि विसर्गलोपो वा" । एवं नभःशब्दादिष्वप्यग्रे ऊह्यम् ॥ ५२ ॥

अथ शनिफलमाह ।

शनिरथायबलासहजस्थितो
यदि नभादभियातिगणापहः ।
भवति विद्धपुरो जनुषः खगै-
र्विरविभिर्धिषणान्त्यतपःस्थितैः ॥ ५३ ॥

शनिरिति । यदि विरविभिः सूर्यरहितैः । धिषणा बुद्धिः पञ्चमम् । अन्त्यं द्वादशम् । तपो नवम् । एषु स्थितैः खगैर्न विद्धं पुरं शरीरं यस्य स विद्धपुरः शनिः । तदा शनिरभयातिगणापहः शत्रुसमूहघातको भवति । किंविशिष्टः शनिः । जनुषो जन्मतो भवात् राशेः सकाशात् । आय एकादशम् । बलं तृतीयम् । असहजः शत्रुः षष्ठम् । एषु स्थितः ॥ ५३ ॥

अथ राहुफलमाह ।

अनुगलाभजिघांसुनभःस्थितो
निखिलसौख्यकरो हि विधुन्तुदः ।
व्ययसुताध्वरभावनिशान्तगै-
र्यदि न विध्यत एव नभश्चरैः ॥ ५४ ॥

अनुगेति । यदि व्ययो द्वादशम् । सुतः पञ्चमम् । अध्वरो यज्ञो नवमम् । एषां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भावानां निशान्तगैर्गृहगतैर्नभश्चरैर्ग्रहैर्विधुन्तुदो राहुर्न विध्यते तदा राहुः । हि निश्चितम् । निखिलसौख्यकरो भवति । किंलक्षणो राहुः । अनुगः सेवकस्तृतीयम् । लाभ एकादशम् । अभिजिद्यांसुर्वैरो षष्ठम् । नभो दशमम् । एषु भवनेषु स्थितः । "धामागारं निशान्तं च"-इति 'हैमः' ॥ ५४ ॥

अथ केतुफलमाह ।

शिखिनमाहुरगोरपरेऽगुवद्-
वनमवाहशरैः प्रतिमे बुधाः ।
नवलवेऽपि चरन्तमनारतं
जगति सर्वजनार्त्तिहितोदयम् ॥ ५५ ॥

शिखिनमिति । बुधाः शिखिनं केतुमगुवत् राहुतुल्यमाहुः । अपि पुनरपरे आचार्या अगो राहोः । वनमवाहाः समुद्राश्चत्वारः । शराः पञ्च । एवं चतुष्पञ्चाशत् । एभिः प्रमिते नवलवे नवांशके चरन्तं गच्छन्तं शिखिनं केतुं जगति भुवनेऽनारतं निरन्तरं सर्वजनार्त्तिहितोदयं सर्वलोकपीडाकरमाहुः । कोऽर्थः । अश्विनीभाच्चतुर्दशं नक्षत्रं चित्रा* तस्या द्वितीयपादे यदाऽगुः राहुरायाति तदा रोहिणीशकटवेधोत्पातो भवति विलोममार्गेण अष्टनक्षत्रं पुनर्वसुयावत् ॥ ५५ ॥

अथानिष्टग्रहे करणीयं निषेधयति ।

परकुले गमनं निशि साहसं
हृतिगमः क्रियते न तरीस्थितिः ।
जनपदान्तरयानमनिष्टदै-
र्नरवरेण शकुन्ययनायनैः ॥ ५६ ॥

परेति । शकुनीनां पक्षिणामयनं मार्गो यस्मिन् तद्व्योम तस्मिन्नयनमेषां ते तैर्ग्रहैरनिष्टदैः कृत्वा नरवरेण निशि रात्रौ परकुले परगृहे गमनं न क्रियते । पुनः साहसं हठात् । हृतिगमो हृत्यै हरणाय गमनं न क्रियते । एवं तरीषु प्रवहणेषु नौकास्विति । स्थितिरुपविष्टता न । पुनर्जनपदान्तरयानं देशान्तरप्रयाणमिति ॥ ५६ ॥

---

* एतदर्थं ग्रहलाघवे ग्रहच्छायाधिकारेऽष्टमश्लोकस्य गुरुवरमहामहोपाध्याय-पण्डितश्रीसुधाकरद्विवेदिकृता वासना विशेषतो द्रष्टव्या ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ यस्मिन् वारे यत् करणीयं तदाह ।

खगवरे नरदेवनिभालनं
वरतरं रुधिरे प्रविदारणम् ।
अखिलशास्त्रविबोधनमिन्दुजे
बलिनि मन्त्रिणि दोर्ग्रहणव्रतम् ॥ ५७ ॥

खगेति । खगवरे रविवारे नरदेवनिभालनं भूपदर्शनं वरतरं श्रेष्ठतरं स्यात् । रुधिरे भौमे प्रविदारणं छिन्नकर्म वरतरम् । इन्दुजे बुधेऽखिलशास्त्रविबोधनं समस्तशास्त्रज्ञानं वरतरम् । बलिनि बलयुक्ते मन्त्रिणि गुरौ वारे दोर्ग्रहणव्रतं पाणिग्रहणव्रतं वरतरं स्यात् । "रुधिरं घसृणं रक्ते रुधिरो धरणीसुते"-इति 'हैमः' ॥ ५७ ॥

दितिजमन्त्रिणि यानमलं भवे-
दसितगुर्बलवानथ दीक्षिणे* ।
कृतिभिरप्युदिता निखिलाः क्रिया
हरिणलक्ष्मणि वीर्यवतीष्टदाः ॥ ५८ ॥

दिति इति । दितिजमन्त्रिणि दैत्यप्रधाने शुक्रे यानं भवेत् । अथ दीक्षिणे दीक्षितनराय । दीक्षणे दीक्षायां वा । असितगुः शनिर्बलवान् स्यात् । अथ कृतिभिः पण्डितैर्वीर्यवति बलयुक्ते हरिणलक्ष्मणि चन्द्रे निखिलाः क्रिया इष्टदा उदिताः प्रोक्ताः । अलमित्यवधारणे ॥ ५८ ॥

अथ चन्द्रबलं विशिनष्टि ।

उचितमैन्दवमङ्गभृतां बलं
बलिनि चैव विलोकयितुं पदम् ।
पदमशेषसुकर्मगणे सदा
स्युरुडुपे बलिनोऽखिलखेचराः ॥ ५९ ॥

उचितेति । अङ्गभृतां देहिनां बलं विलोकयितुं पदं पदं पदे पदे ऐन्दवं चन्द्रसम्बन्धि बलमुचितं योग्यम् । च-पुनस्तदेवाह । बलिनि बलयुक्ते उडुपे चन्द्रे सति अखिलखेचराः सौम्यग्रहाः । अशेषसुकर्मगणे समस्तशुभकार्यसमूहे सदा बलिनः स्युः ॥ ५९ ॥

---

* दीक्षणे इति पा. ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विषमखेटनिकायफलार्णवं
तरितुमिन्दुबलोत्कटवेडया ।
अनुदिनं धवलांशुबलं नरः
क्षम उपास्यमतोऽस्ति विशेषतः ॥ ६० ॥

विषमेति । नरः । इन्दुबलमेव उत्कटा उत्कृष्टा वेडा तरिः । तया इन्दुबलोत्कट-वेडया कृत्वा विषमाः खलाः क्रूरा ये खेटास्तेषां निकाया गृहशब्दपर्यायत्वात् भावा-स्तेषां फलमेव अर्णवः समुद्रस्तं तरितुं क्षमोऽस्ति । अतः कारणात् । अनुदिनं दिने दिने विशेषतो धवलांशुबलं चन्द्रबलमुपास्यं सेवनीयम् । "निकायः पद्मसङ्घयोः"-इति 'हैमः' ॥ ६० ॥

अथोपजात्या क्षीणचन्द्रे ताराबलमाह ।

सदोदितं चन्द्रमसः प्रधानं
बलं बुधैः कर्मसु वाऽखिलेषु ।
अमोदरेऽहर्नवके न चान्द्रं
तत्रैव ताराबलमप्यतीष्टम् ॥ ६१ ॥

सदो इति । सदा बुधैरखिलेषु कर्मसु चन्द्रमसो बलं प्रधानमुचितं कथितम् । च इति पक्षान्तरे । अमोदरेऽमावास्या उदरे मध्येऽहर्नवके । कोऽर्थः । अमावास्या तिथेः प्राक्दिनचतुष्कं पश्चाद्दिनचतुष्कम् । अमातिथिना सह नव दिनानि एषु चान्द्रं बलं न कथितम् । अपि पुनस्तत्राहर्नवके ताराबलमेवातीष्टमतिशयेन शुभम् ॥ ६१ ॥

अथ शुभाशुभतारामाह ।

तारा भवेयुर्जनिभादतो भा-
न्नवेति शश्वद्दशमाच्च सौम्याः ।
त्रिपञ्चसप्त प्रविहाय सर्वाः
शरीरिणां मध्यफला तथाऽऽद्या ॥ ६२ ॥

तारेति । शश्वत् सदा । तारा जनिभाज्जन्मनक्षत्रात् । पुनर्दशमाद्भात् नक्षत्रात् अत्रानुक्तादपि एकोनविंशादपि एकोनविंशतितमनक्षत्राच्च नव संख्यका भवेयुः । त्रि-नव सप्तविंशतिरित्यर्थः । तासु त्रिपञ्चसप्त । तृतीयापञ्चमीसप्तमीतारा विहाय सर्वा-स्तारः शरीरिणां सौम्याः शुभाः । तथा आद्या प्रथमा तारा मध्यफला स्यात् ॥६२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ ग्रहबलेन बलिग्रहमाह ।

राजा हि तारेयबलेन राज्ञो
बलादशीतद्युतिरुष्मभासः ।
सर्वे नभोगा बलिनो बली स्याद्-
भवन्त्यगुः स्वाद्बलतो बलीयान् ॥ ६३ ॥

राजेति । हीति विशेषार्थे । तारेयबलेन तारासम्बन्धिबलेन राजा चन्द्रो बली स्यात् । राज्ञश्चन्द्रस्य बलात् अशीतद्युतिः सूर्यो बली स्यात् । उष्मभासः सूर्यस्य बलात् सर्वे नव नभोगा ग्रहा बलिनो भवन्ति । किन्तु इति शेषः । अगू राहुः । स्वाद्बलतो निजबलात् बलीयान् बलिष्ठः स्यात् ॥ ६३ ॥

अथोपेन्द्रवज्रया चन्द्रस्य शुभाशुभफलमाह ।

ददाति पीयूषघनो नराणा-
मसौ फलं धीधनधर्मगो भात् ।
असाधु वा साधु फलेन तुल्यं
स्वरर्चिताङ्घ्रेरपि वर्द्धमानः ॥ ६४ ॥

ददा-इति । भात् जन्मराशितो धीर्बुद्धिः पञ्चमम् । धनं द्वितीयम् । धर्मो नवमम् । एषु राशिषु गतः पीयूषघनोऽमृतमयदेहश्चन्द्रो वर्द्धमानः शुक्लपक्षभवो नराणां साधु फलं ददाति । किंभूतं फलम् । स्वरर्चिताङ्घ्रेः । स्वःशब्देन स्वर्गिण आधारे आधेयोपचारात् । तैरर्चितौ अङ्घ्री पादौ यस्य स तस्य गुरोः फलेन तुल्यम् । यथा पञ्चमद्वितीयनवराशिगुरुः शुभ इति । वा इति पक्षान्तरे । यदाऽसौ क्षीणश्चन्द्रस्तदा पञ्चमो द्वितीयो नवमश्चन्द्रो असाधु फलं ददाति ॥ ६४ ॥

अथोपजात्या सर्वग्रहेषु शक्तिरूपेण चन्द्रफलमाह ।

शक्तिस्तुषारांशुफलं परेषां
दिवौकसां वस्तुफलं प्रकल्प्यम् ।
शक्त्या हि वस्तुत्वमथैति मात्रा
यथोष्मशक्त्यैव तनूनपात् स्यात् ॥ ६५ ॥

शक्तिरिति । तुषारांशुफलं चन्द्रफलम् । शक्तिराधेयः कथ्यते । परेषामन्येषां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिवौकसां ग्रहाणां फलमाधारपदार्थः। प्रकल्प्यं प्रकल्पनीयम्। अथ हि यतो मात्रा किञ्चित्पदार्थरूपा। शक्त्या वस्तुत्वं वस्तुभावमेति प्राप्नोति। अत्र वस्तु आधारः। वस्तुत्वमाधेयः। यत्राधेयसद्भावस्तत्राधारस्यापि सद्भावो युक्तः सिद्धसम्बन्धत्वात्। न हि घटत्वं विना घटोत्पत्तिः। दृष्टान्तमाह। यथा उष्णशक्त्यैव तनूनपात् अग्निः स्यात्। यत्रोष्णत्वं तत्र वह्निरिति। मात्रापरिच्छेदः "अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे। कालवृत्ते"-इति 'हैमः' ॥ ६५ ॥

अथातोऽवश्यवर्द्धमानचन्द्रबलादानतामाह।

अतो विलग्नेऽखिलकर्मराशा-
वहस्करांश्वीरितदीप्तिवीर्यम्।
प्राप्ताखिलाभ्रायनपौरुषेऽपि
विलोकनीयं सततं सुधीभिः ॥ ६६ ॥

अत इति। अतः पूर्वोक्तिशक्तिहेतुत्वात्। सततं सदा सुधीभिर्विलग्ने राशिचक्रेऽहस्करस्य सूर्यस्यांशुभिः किरणैरीरिता प्रेरिता दीप्तिर्यस्य स वर्द्धमानचन्द्रस्तस्य बलं वीर्यं विलोकनीयम्। कस्मिन् अखिलकर्मराशौ समस्तकार्यसमूहे। कथम्भूते विलग्ने। प्राप्तेति। प्राप्तमखिलाः समस्ता अभ्रायना ग्रहास्तेषां पौरुषं बलं येन तत् तस्मिन्नपीति ॥ ६६ ॥

अथ चन्द्रबलग्रहणे विवेकतामाह।

अनन्तरं दोर्ग्रहतो नराणा-
मालोकयेत् तारकराजवीर्यम्।
अपास्य सीमन्तनिषेककर्म*-
मर्वागतस्तच्च नितम्बिनीनाम् ॥ ६७ ॥

अनन्तरेति। सुधीर्नराणां दोर्ग्रहतो विवाहादनन्तरं तारकराजस्य चन्द्रस्य वीर्यं बलमालोकयेत्। चपुनरतः। पाणिग्रहणादर्वाक् नितम्बिनीनां स्त्रीणां तच्चन्द्रबलमालोकयेत्। किं कृत्वा। सीमन्तकर्म। अग्रहणी इति भाषा। निषेककर्म गर्भाधानकर्म द्वन्द्वे प्रत्येकयोजनात्। अपास्य विहाय। सीमन्तगर्भाधानकर्मणि भर्त्तुर्न। स्त्रियास्तु चन्द्रबलं विलोकयमित्यर्थः। कर्मशब्दोऽकारान्तोऽप्यस्ति ? ॥ ६७ ॥

* निषेककृत्य-इति क. पु. पा. साधुः।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY,
Jangamwadi Math, VARANASI,
Acc. No. 3090

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कन्यावरयोः पूर्वापरचन्द्रबलग्रहणे हेतुमाह ।

पतिंवरोल्लङ्घ्य वरा यदद्यात्
स्वकर्मवत् सप्तपदाबलं च ।
सौभाग्यमष्टाङ्गमतस्ततस्त-
द्योज्यं खगाद्युत्थफलं तदर्थे ॥ ६८ ॥

पतिंवरेति । पतिंवरा कन्या सप्तपदाचलं चतुर्मङ्गलवर्त्तनानन्तरम् । "अथातोऽश्मानमारोह"-इत्युत्तरतः-"अग्नेर्दक्षिणपदेन स्वाङ्गुष्ठं गृह्णामि"-इत्यादिगृह्योक्तं धान्यनिर्मितसप्तपुञ्जरूपमुल्लङ्घ्य अतिक्रम्य वराय भर्त्रेऽष्टाङ्गसौभाग्यं दद्यात् । यतः—

पादौ कर्णौ शिरो बाहू कण्ठो नासाऽक्षिणी तथा ।
ललाटं सुभगस्त्रीणामेवमष्टाङ्गमुच्यते ॥

कीदृशं सौभाग्यम् । स्वकर्मवत् निजकर्मतुल्यम् । च-पुनः । ततः कारणादतोऽस्मिंस्तदर्थे । तस्याः कन्याया अर्थो भर्त्ता तस्मिन् भर्त्तरि वत् । खगाद्युत्थफलं योज्यमिति ॥ ६८ ॥

अथ चन्द्रबलविलोकनीयस्थानमाह ।

पाणिग्रहाङ्गादिविधौ नृनार्योः
पित्रोरदश्चन्द्रमसो विचिन्त्यम् ।
राशौ बलं नेतुरगारकाणां
तथाऽनुगानां च युधि ध्वजिन्याः ॥ ६९ ॥

पाणि-इति । पाणिग्रहाङ्गादिविधौ विवाहप्रारम्भकार्यविधाने नृनार्योर्वरवध्वोः पित्रो राशौ अदश्चन्द्रमसो बलं विचिन्त्यम् । च-पुनरगारकाणां नेतुः स्वामिनो राशौ चन्द्रबलं चिन्त्यम् । तथा युधि संग्रामे ध्वजिन्याः सेनाया अनुगानां स्वामिनां राशौ चन्द्रबलं विलोकनीयम् । "अनुगः स्वामिसेवकयोः"-इत्यनेकार्थः ॥ ६९ ॥

अथ चन्द्रबलस्यानवलोकनीयस्थानमाह ।

न दौर्हृदस्यामृतपिण्डसारं
भिक्षोरुपात्ताध्वरदैवतस्य ।
सहस्रचन्द्रव्रतकर्त्तुराद्यै-
रसाधु वा साधु न चिन्तनीयम् ॥ ७० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न दो-इति। अमृतस्य पिण्डोऽङ्गं यस्य सोऽमृतपिण्डश्चन्द्रस्तस्य सारं बलं दोहदस्य साधु वाऽसाधु न चिन्तनीयम्। एवं भिक्षोर्योगिनश्चन्द्रबलं न चिन्तनीयम्। एवमुपात्ताध्वरदैवतस्य गृहीतयज्ञदेवस्य प्रारब्धयज्ञकर्त्तुश्चन्द्रबलम्। पुनः सहस्रचन्द्रव्रतकर्त्तुः। चतुरशीतितमे वर्षे सहस्रचन्द्रव्रतमुक्तम्। तत्कारकस्य चन्द्रबलं न चिन्तनीयम्। आद्यैः पण्डितैरिति ॥ ७० ॥

अथोपेन्द्रवज्रया कालचन्द्रमाह।

नरेषु भूरेकनवद्वितर्क-
दिगग्न्यगाब्धीभहरेनतुल्यः।
क्रमेण भानामविपूर्वकाणा-
मनुष्णभासः किल कालसंज्ञाः ॥ ७१ ॥

नरेति। किलेति सत्ये। नरेषु पुरुषेषु क्रमेणाविपूर्वकाणां मेषादीनां भानां राशीनां भूपञ्चादिभिस्तुल्या मिता अनुष्णभासः चन्द्राः कालसंज्ञाः घातकाः स्युः। कोऽर्थः। मेषराशेर्नरस्य भूरेको जन्मचन्द्रो घातकः। एवं वृषस्य पञ्चमश्चन्द्रः। मिथुनस्य नवमः। कर्कस्य द्वौ द्वितीयः। सिंहस्य तर्काः षष्ठः। कन्याया दिक् दशमः। तुलाया अग्नयस्तृतीयः। वृश्चिकस्य अगाः पर्वताः सप्तमः। धनुषोऽब्धिः समुद्रश्चतुर्थः। मकरस्य इभा अष्टमः। कुम्भस्य हरः शिव एकादशः। मीनस्य इनाः सूर्या द्वादशः। एषां द्वन्द्वे एभिस्तुल्याः ॥ ७१ ॥

अथोपजात्या स्त्रीणां कालचन्द्रमाह।

रूपाद्यगाङ्काङ्गगुणागमाश्वि-
दिगीश्वरेषूष्णकरैरभिन्नाः।
मेषादिकानां विधवो वशासु
ज्ञेयाः सदा कालकलार्त्तिदा वा ॥ ७२ ॥

रूपेति। वेति स्त्रीपक्षे। वशासु स्त्रीषु मेषादिकानां राशीनां रूपादिभिरभिन्नास्तुल्याः। विधवश्चन्द्राः। सदा कालो यमस्तस्य कला ज्ञानं संहरणादिरूपं तद्वत् आर्त्तिदाः पीडाकरा ज्ञेयाः। बुधैरिति शेषः। रूपेति। मेषस्य रूपमेकः। वृषस्य अहिरष्टमः। मिथुनस्यगाः सप्तमः। कर्कस्य अङ्का नवमः। सिंहस्य अङ्गानि षष्ठः। कन्याया गुणास्तृतीयः। तुलाया आगमाश्चतुर्थः। वृश्चिकस्य अश्विनौ द्वितीयः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धनुषो दिग्दशमः । मकरस्य ईश्वरा एकादशः । कुम्भस्य इषुः पञ्चमः । मीनस्य उष्णकरो द्वादशः । एषां द्वन्द्वे एभिः ॥ ७२ ॥

अथोपेन्द्रवज्रया यत्र स्थाने कालचन्द्रोहेयस्तदाह ।

वधूप्रवेशे युधियानगेह-
क्रियाविवाहेषु हलप्रवाहे ।
नृपाभिषेकाभरणास्त्रधृत्यो-
रनिष्टदः स्यात् किल कालचन्द्रः ॥ ७३ ॥

वधू-इति । किलेति भावनायाम् । वधूप्रवेशे पुनर्युधि संग्रामे पुनर्यानगेहक्रियाविवाहेषु पुनर्हलप्रवाहे । पुनर्नृपाभिषेकः । आभरणस्य शस्त्रस्य च धृतिर्धारणम् । तयोर्नृपाभिषेकाभरणास्त्रधृत्योः । एषु कालचन्द्रोऽनिष्टदः स्यात् ॥ ७३ ॥

अथोपजात्या शेषषड्ग्रहाणां कालसंज्ञामाह ।

राज्ञोऽजपूर्वेष्वथ कालगेहा-
देकैकवृद्ध्या गदिताः क्रमेण ।
विद्बुधिष्ण्यहेल्यारसुरेज्यमन्दाः
शरीरिणां राशिषु कालसंज्ञाः ॥ ७४ ॥

राज्ञ इति । अथ अजपूर्वेषु मेषादिराशिषु राज्ञश्चन्द्रस्य कालगेहात् । क्रमेणैकैकवृद्ध्या विद्बुधः । धिष्ण्यः शुक्रः । हेलिः सूर्यः । आरो भौमः । सुरेज्यो गुरुः । मन्दः शनिश्चैते शरीरिणां कालसंज्ञा गदिताः । कोऽर्थः । यस्य यस्य नरस्य यावत्संख्याकः कालचन्द्रराशिस्तस्मादेकैकवृद्धिः कर्त्तव्या । यथा मेषराशौ जन्मचन्द्रो घातस्तस्य द्वितीयो बुधो घातः । एवं तृतीयः शुक्रः । चतुर्थो रविः । पञ्चमो भौमः । षष्ठो गुरुः । सप्तमः शनिरेते कालसंज्ञाः । एवं यथा धनुराशेः पुरुषस्य चतुर्थः कालचन्द्रस्तस्य पञ्चमो बुधः कालसंज्ञ इत्येवमेकैकवृद्ध्या सर्वेऽपि ॥ ७४ ॥

अथोपेन्द्रवज्रया ग्रहस्यागामिकराशिफलमाह ।

नभश्चरः संक्रमतः स्वतोऽर्वाक्
स्वभोगराश्यंशमितैरहोभिः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अधिष्ठितर्क्षादपि चैष्यराशे-
रलं फलं यच्छति मूर्त्तिमत्सु ॥ ७५ ॥

नभ-इति। नभश्चरो ग्रहः स्वतः संक्रमाद्वर्त्तमानराशेरर्वाक् पूर्वं स्वभोगराश्यंशमितैर्निजभोगराशेस्त्रिंशन्मितैरहोभिर्दिनैरधिष्ठितर्क्षात् आक्रान्तराशेः सकाशाच्चैष्यराशेरागामिकराशेः फलं शुभमशुभं मूर्त्तिमत्सु नरेषु अलं यच्छति ददाति। विशेषार्थं-स्वयम्। सूर्यो गन्तव्यराशेः प्राक् पञ्चदिनानि फलदः स्यादेवं भौमोऽष्टदिवसान्। बुधः सप्तदिनानि। शुक्रः सप्तदिनानि। चन्द्रो घटीत्रयम्। राहुर्गन्तव्यराशेः पूर्वं त्रिमासान्। शनिः षण्मासान्। गुरुर्मासद्वयं फलदः स्यादिति ॥ ७५ ॥

अथोपजात्या युतिग्रहणाधिकारे विवेकमाह।

यद्राशिगा स्याद्युतिरभ्रमार्गयो-
र्जनस्य तद्राशिवतोऽशिवं भवेत्।
यस्याणु बिम्बं ग्रहणं तयोरिह
ग्रहस्य तस्यैव तमोवृतस्य च ॥ ७६ ॥

यद्राशीति। अभ्रमार्गयोर्ग्रहयोर्युतिः संयोगः। यद्राशिगा यश्चासौ राशिश्च तं गच्छतीति यद्राशिगा स्यात्। स चासौ राशिश्च तद्राशिस्तद्राशिवतो जनस्याशिवमशुभं भवेत्। च-पुनस्तयोर्ग्रहयोरिह संयोगे यस्य ग्रहस्याणु बिम्बं सूक्ष्मं मण्डलं भवति। तस्य तमोवृतस्य तमसाऽऽच्छादितस्य ग्रहस्य ग्रहणं भवति ॥ ७६ ॥

अथ ग्रहणसमये वर्त्तमानचन्द्रराशिशुभाशुभमाह।

बलायवैर्यम्बरगोऽशुभेतरो
राशिर्धनाद्यात्मजधर्मगः समः।
ग्राह्यो मदान्त्यात्ययवारिगोऽधमो
राशेर्भवेन्नामवतश्च जन्मनः ॥ ७७ ॥

बलेति। ग्रहणसमये नामवतः पुरुषस्य जन्मनो राशेः सकाशात्। बलं तृतीयम्। आय एकादशः। वैरी षष्ठः। अम्बरं दशमम्। एषु गतो राशिरशुभेतरः शुभो ग्राह्यः। पुनर्धनं द्वितीयः। आद्यः प्रथमः। आत्मजः सुतः पञ्चमम्। धर्मो नवमम्। एषु गतो राशिः समो ग्राह्यः। पुनर्मदः सप्तमः। अन्त्यो द्वादशः। अत्ययोऽष्टमः। वारि चतुर्थः। एषु गतो राशिरधमो भवेदिति ॥ ७७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथैतादृग्राशीनां फलमाह ।

शुभः शुभाय ग्रहणाच्छरीरिणां
समश्च साधारणकामसिद्धये ।
इहाधमोऽनिष्टफलाय पार्वणो
राशिर्भवेदाग्रहणं युतेरिति ॥ ७८ ॥

शुभ इति । इह लोके । शरीरिणाम् । पर्वणि भवः पार्वणो ग्रहणगतराशिर्ग्रहणात् शुभः शुभाय स्यात् । च-पुनरेवं समः साधारणकामसिद्धये भवेत् । पुनरधमोऽनिष्टफलाय भवेत् । इत्यनेन प्रकारेण भौमादीनां युतेः सकाशात् आग्रहणम् । अयमर्थो ग्राह्यः । युतेरारभ्य आग्रहणं ग्रहणपर्यन्तम् । तेन युद्धादि ग्राह्यमित्यर्थः ॥ ७८ ॥

अथोपेन्द्रवज्रया ग्रहाणामनिष्टफले शान्तिस्नानद्वारमाह ।

खगेरितासाधुफलं जनेन
तदर्चया यत् तदितं वरेण्यम् ।
सदौषधिस्नानविधानहोमा-
पवर्जनेभ्योऽभ्युदयाय वा स्यात् ॥ ७९ ॥

खगे-इति । यदा जनेन कर्तृपदेन । यत् खगेनेरितं प्रेरितमसाधु फलमनिष्टफलमितं प्राप्तं तदा तदर्चया श्रद्धया तद्ग्रहपूजनेन तदशुभं वरेण्यं श्रेष्ठं स्यात् । केभ्यः । सदौषधिभिर्भव्यौषधिभिः स्नानविधानम् । होमः । अपवर्जनं दानम् । एभ्य इति । ग्रहकृपयाऽभ्युदयाय वा स्यात् ॥ ७९ ॥

अथोपजात्याऽनिष्टसूर्ये शान्तिस्नानमाह ।

काश्मीरयष्टीमधुपद्मकैला-
मनःशिलोशीरघसन्तदूतिभिः ।
सदारुभिः स्यादहितेऽखरांशौ
निमज्जनं नुः किल कर्मसिद्धये ॥ ८० ॥

काश्मीरेति । किलेति सत्ये । खरांशौ सूर्येऽहितेऽनिष्टे सति नुः पुरुषस्य कर्मसिद्धये ईप्सितप्राप्तये मज्जनं स्नानं स्यात । काभिः । काश्मीरं केसरं घुसृणम् । यष्टीमधु तीतम् । पद्मकस्तरुविशेषः कमलफलम् । "कमलकाकडी" । एला 'एलाची'

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतीता। मनःशिला मनोगुप्ता। उशीरं वीरणीमूलम्। वसन्तदूतिः पाटला। एताभिः। किंभूताभिः। सदारुभिर्देवदारुसहिताभिः। कोऽर्थः। एता औषधीर्जलभृतकुम्भे निःक्षेप्य स्नानं कर्त्तव्यमित्यर्थः। "स्नेहवृद्धं महादारु भद्रा दार्व्यं च दारु च"-इति 'निघण्टुः'। "पाटलायां तु-स्थली वसन्तदूतिः स्यात्"-इति 'निघण्टुः'॥ ८०॥

अथानिष्टचन्द्रे शान्तिस्नानमाह।

सपञ्चगव्यैः स्फटिकेभदान-
त्रिपत्रमुक्ताम्बुजशुक्तिशङ्खैः।
तुषारभास्याप्लवनं नृपाणा-
मुक्तं हि तुष्ट्यै विषमे ग्रहज्ञैः॥ ८१॥

सपञ्चेति। तुषारभासि चन्द्रे विषमेऽनिष्टे सति निश्चितं ग्रहज्ञैस्तुष्ट्यै तोषाय नृपाणां राज्ञामाप्लवनं स्नानमुक्तं कथितम्। पञ्चगव्यादिसहितैर्जलैः। पञ्चगव्यं गोदुग्धं दधि घृतं विट् मूत्रम्। स्फटिको दृषद्भेदः। इभदानं गजमदः। त्रिपत्रको बिल्वः। मुक्ता मुक्ताफलम्। अम्बुजं कमलम्। शुक्तिशङ्खौ प्रतीतौ। एभिः॥ ८१॥

अथेन्द्रवज्रयाऽनिष्टे भौमे शान्तिस्नानमाह।

स्याच्चन्दनश्रीफलहिङ्गुलीक-
श्यामाबलामांस्यरुणप्रसूनैः।
ह्रीवेरचाम्पेयजपाङ्कुराढ्यैः
स्नानं कुदायादकृताशिवघ्नम्॥ ८२॥

स्याच्च-इति। चन्दनादिभिः स्नानम्। कोभूमेर्दायादः पुत्रो भौमस्तेन कृतमशिवं हन्तीति कुदायादकृताशिवघ्नं भौमकृतोपद्रवहरं स्यात्। मलयजं 'सूकडिः'। श्रीफलो बिल्वः। हिङ्गुलीक औषधीविशेषः। श्यामा प्रियङ्गुः। बला बलबीजम्। मांसिर्मरुमांसिः। अरुणप्रसूनानि रक्तपुष्पाणि। एषां द्वन्द्वे एभिः। किंभूतैः। ह्रीवेरं वालकम्। चाम्पेयं नागकेशरम्। जपाङ्कुरा ओड्रपुष्पकिसलयाः। एभिराढ्यैर्युक्तैः।

"नागपुष्पं मतं नागं केशरं नागकेसरम्।
चाम्पेयं नागकिञ्जल्कं कनकं हेम काञ्चनम्"॥

इति 'निघण्टुः'। "ओड्रपुष्पं तु जपा"-इति 'हैमः'॥ ८२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथोपजात्या बुधे शान्तिस्नानमाह ।

सहेममूलाक्षतशौक्तिकेयै-
गोरोचनक्षौद्रफलैः सगव्यैः ।
हिताय साद्भिर्विषमे नराणां
निमज्जनं चान्द्रमसायने स्यात् ॥ ८३ ॥

सहेमेति । चान्द्रमासायने बुधे विषमेऽनिष्टे सति नराणामेभिः सह मज्जनं हिताय स्यात् । तदाह । गोरोचनं गोपित्तम् । क्षौद्रं मधु । फलं मदनपीठलफलम् । एभिः । किंभूतैरेभिः । सगव्यैः पञ्चगव्ययुक्तैः । पुनः किंभूतैः । हेम नागकेसरम् । मूलं पुष्करमूलम् । अक्षतलाजा मङ्गलतण्डुलाः । "लाजाः स्युः पुनरक्षताः"-इति 'हैमः' । शौक्तिकेयं मुक्ताफलम् । एभिः सह वर्त्तमानैः । पुनः किंभूतैः । साद्भिर्जलैः सह वर्त्तमानैः ॥ ८३ ॥

अथानिष्टे गुरौ शान्तिस्नानमाह ।

सिद्धार्थयष्टीमधुनीरमालती-
प्रसूनयूथीप्रसवैः सपल्लवैः ।
रिष्टं यदीज्याद्विषमस्थितादितं
शिवाय यैस्तेष्वरुहं निमज्जनम् ॥ ८४ ॥

सिद्धार्थेति । यदि चेत् । यैर्नरैर्विषमस्थितात् क्रूरस्थितात् ईज्याद्गुरोः सकाशात् रिष्टं कष्टमितं प्राप्तं तेषु नरेषु शिवाय निमज्जनं प्रोक्तम् । किंभूतं निमज्जनम् । अरुहं न विद्यते रुट् जन्म कष्टोत्पत्तिर्यस्मात् तत् । अथ वा अरुहं दूर्वारहितम् । "हरिताली रुहा"-इति 'हैमः' । सिद्धार्थः श्वेतशर्षपः । यष्टीमधु प्रतीतम् । नीरं वालकम् । मालतीप्रसूनानि जातिपुष्पाणि । यूथीप्रसवा मागधीपुष्पाणि । एभिः किंविशिष्टैः । सपल्लवैः पल्लवयुक्तैः ॥ ८४ ॥

अथानिष्टे शुक्रे शान्तिस्नानमाह ।

नाशम्बरैलाफलमूलकुङ्कुमैः
सपुण्डरीकैः शिलया समन्वितैः ।
कवीरितानिष्टविघातहेतवे
स्नायादनज्जैरिति कश्चिदाह वा ॥ ८५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ना श-इति। ना पुरुषः। कविना शुक्रेण ईरितं प्रेरितमनिष्टमशुभं तस्य विघातहेतुं स्नायात्। कैः। सपुण्डरीकैः श्वेतकमलसहितैः। शिलया मनःशिलया समन्वितैः। शम्बरं जलपर्यायत्वाद्वालकम्। एलाफलं प्रतीतम्। मूलं पुष्करमूलम्। कुङ्कुमं काश्मीरम्। एषां द्वन्द्वे एभिः। वा इति पक्षान्तरे। कश्चिदनब्जैरित्याह कमलानि विहाय स्नायादिति कथयति ॥ ८५ ॥

अथेन्द्रवज्रयाऽनिष्टे शनौ शान्तिस्नानमाह।

बलाञ्जनश्यामतिलैः सलाजैः
सरोध्रजीमूतशतप्रसूनैः।
यमानुजादाप्तमनिष्टमुग्रं
विलीयते मज्जनतोऽप्यशेषम् ॥ ८६ ॥

बला-इति। यमस्यानुजो लघुभ्राता शनिस्तस्मादाप्तं प्राप्तमुग्रं दारुणमशेषं समस्तं विलीयते नाशं प्राप्नोति। कस्मात् मज्जनतः स्नानात्। कैः। बला बलबीजम्। अञ्जनं कृष्णसौवीरम्। श्यामतिलः कृष्णतिलः। एषां द्वन्द्वे एभिः। किंविशिष्टैः। सलाजैः व्रीहिसहितैः। पुनः किंभूतैः। रोध्रः 'रोहोडड' इति भाषा। जीमूतो मुस्ता। शतपसूना 'सूर्या' इति भाषा। एषां द्वन्द्वे। एभिः सह वर्त्तमानैस्तैः। "शतपुष्पा मिशिर्घोषा"-इति निघण्टुः ॥ ८६ ॥

अथोपजात्याऽनिष्टे राहौ शान्तिस्नानमाह।

सलोध्रगर्भेणमदेभदानै-
रणोऽम्बुदश्रीफलपर्णवर्णैः।
हरेदभद्रं विषमागुजातं
शरीरिणामाप्लवनं सदूर्वैः ॥ ८७ ॥

सलो-इति। आप्लवनं स्नानं शरीरिणां विषमागुजातं दुष्टराहुजातमभद्रं कष्टं हरेत्। कैः। अर्णं जलं पर्यायत्वाद्वालकम्। अम्बुदो मुस्ता। श्रीफलपर्णानि बिल्वपत्राणि। वर्णं धुसृणम्। "वर्णं लोहितचन्दनम्"-इति 'हैमः'। एषां द्वन्द्वे एतैः। किंभूतैः। लोध्रः प्रतीतः। लोध्रो गर्भे मध्ये यस्य स लोध्रगर्भः। अथ वा गर्भः पनसकण्टक इत्यपि। एणमदः कस्तुरी। इभदानं गजमदः। एभिः सह वर्त्तमानैः। पुनः किंभूतैः। सदूर्वैर्दूर्वासहितैः ॥ ८७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथानिष्टे केतौ शान्तिस्नानमाह ।

शिखाभृदार्त्तिं तिलपत्रिकाब्द-
सारङ्गनाभीभमदाम्बुरोध्रैः ।
निषेधतीहाविकमूत्रमिश्रैः
स्नातुर्नुराढ्यैः करकामृताभ्याम् ॥ ८८ ॥

शिखेति । इह लोके स्नातुर्नरस्य शिखाभृत् केतुः । आर्त्तिं पीडां निषेधति निराकरोति । कैः । तिलपत्रिका रक्तचन्दनं 'रताञ्जणी' इति भाषा । "रञ्जनं तिलपर्णिका"-इति 'हैमः' । अब्दो मुस्ता । सारङ्गनाभिः कस्तूरी । इभमदो गजमदः । अम्बु बालकम् । रोध्रः प्रसिद्धः । एषां द्वन्द्वे एभिः । किंविशिष्टैः । आविकमूत्रमिश्रैः । मेषमूत्रसंयुक्तैः । पुनः किंभूतैः । करकः । "घनोपलास्तु करकः"-इति 'हैमः' । अमृता गुडूची । आभ्यामाढ्यैर्युक्तैः ॥ ८८ ॥

अथ सूर्यग्रहणे शान्तिस्नानमाह ।

तिलाम्बुजोशीरकपूतिकाष्ठैः
ससर्षभक्षौद्रशमीन्द्रदूर्वैः ।
सूर्योपरागे विषमे नराणां
भञ्ज्या युतैर्मज्जनमिष्टदं स्यात् ॥ ८९ ॥

तिलाम्बु इति । सूर्योपरागे सूर्यग्रहणे विषमेऽनिष्टे सति नराणां मज्जनमिष्टदं शुभकृत् स्यात् । कैः । तिलः । अम्बुजं कमलम् । उशीरं वीरणीमूलम् । कं बालकम् । पूतिकाष्ठं देवदारु । एषां द्वन्द्वे एभिः । किंविशिष्टैः । सर्षभमृषभनाभौषधियुक्तम् । क्षौद्रं मधु । शमी प्रसिद्धा । इन्द्र इन्द्रयवः । दूर्वा शतपर्विका । आभिः सह वर्त्तन्ते । पुनः किंभूतैः । भञ्ज्या युतैः प्रतीतम् ॥ ८९ ॥

अथानिष्टे चन्द्रग्रहणे शान्तिस्नानमाह ।

पाथःशमीकोकनदैरनिष्टे
विधूपरागे तिलदारुवर्णैः ।
सिद्धार्थदूर्वामधुकालमेयै-
रनिष्टनाशाय तु मज्जनं स्यात् ॥ ९० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पाथ इति । अनिष्टे विधूपरागे चन्द्रग्रहणे मज्जनमनिष्टनाशाय स्यात् । कैः । पाथो जलपर्यायत्वाद्वालकम् । शमी केशघ्नी । कोनदं रक्तकमलम् । तु पुनः तिलः । दारुर्देवदारुः । वर्णं काश्मीरम् । एषां द्वन्द्वे एतैः । पुनः सिद्धार्थः श्वेतसर्षपः । दूर्वा मधु कालमेयं नागकेसरम् । एषां द्वन्द्वे एभिः ॥ ९० ॥

अथोपेन्द्रवज्रयाऽनिष्टदायां ग्रहयुतौ शान्तिस्नानमाह ।

मिथः कदूर्वाम्बुजसर्षपाख्यै-
र्द्वयोर्युजतावारमुखग्रहाणाम् ।
सपञ्चमृत्पल्लवपञ्चगव्यै-
रनिष्टदायां स्नपनं वरं स्यात् ॥ ९१ ॥

मिथ इति । मिथः परस्परमारमुखग्रहाणां भौमादिपञ्चकस्य मध्ये द्वयोर्ग्रहयोर्युतौ संयोगेऽनिष्टदायां सत्यां स्नपनं स्नानं वरं शुभकृत् । कैः । कं जलपर्यायत्वाद्वालकम् । दूर्वा । अम्बुजं कमलम् । सर्षपाः । एषां द्वन्द्वे एभिः । किंभूतैः । पञ्चवर्णमृत्तिका । पञ्चवर्णपल्लवः । पञ्चगव्यम् । एषां द्वन्द्वे एभिः सह वर्त्तमानैः ॥ ९१ ॥

अथोपजात्या सामान्यतः शान्तिस्नानमाह ।

दोषाशमीपद्मकशङ्खपुष्पी-
वत्साङ्कुराम्राङ्कुरहेमपुष्पैः ।
सदा ससिद्धार्थकचन्दनाब्जै-
र्निमज्जनादेति नरः सुशान्तिम् ॥ ९२ ॥

दोषेति । सदा नरो निमज्जनात् सुशान्तिमेति प्राप्नोति । कैः । दोषा हरिद्रा । शमी केशघ्नी । पद्मकं लमलफलं तरुविशेषश्च । शङ्खपुष्पी प्रतीता । वत्साङ्कुरा गुडूची । अम्राङ्कुरा आम्रपल्लवाः । हेमपुष्पं नागकेशरम् । एषां द्वन्द्वे एभिः । किंविशिष्टैः । सिद्धार्थः श्वेतसर्षपः । कं वालकम् । चन्दनं मलयजम् । अब्जं पद्मम् । एभिः सह वर्त्तमानैः । इति नवग्रहशान्तिस्नानाधिकारः ॥ ९२ ॥

अथेन्द्रवज्रया नवग्रहाणां होमेन्धनान्याह ।

अर्कत्रिवर्हद्रुमनेमिशाला-
पामार्गबोध्यर्द्रवनस्पतिभ्यः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शम्यार्द्रदूर्वाकुथतः क्रमेण
होमोचिताः स्युः समिधो ग्रहाणाम् ॥ ९३ ॥

अर्केति । क्रमेण ग्रहाणां सूर्यादीनां होमे उचिताः समिध एधांसि स्युः । केभ्योऽर्केति । सूर्यस्यार्कात् अर्कवृक्षात् समिधः । एवं चन्द्रस्य त्रिवर्हद्रुमात् पलाशवृक्षात् । भौमस्य नेमिशालात् खदिरवृक्षात् । बुधस्यापामार्गात् 'अघाडड' इति भाषा । गुरोर्बोधेः पिप्पलद्रुमात् । शुक्रस्यार्द्रवनस्पतेरुदुम्बरवृक्षात् । एषां द्वन्द्वे एभ्यः । शनेः शमीतः । राहोरार्द्रदूर्वातः । केतोः कुथतः कुशात् । एभ्यो वृक्षेभ्यः सरलानि सुस्निग्धानि यद्योक्तामानमितानि इन्धनानि ग्राह्याणीति ॥ ९३ ॥

अथोपजात्या ग्रहाणां पूजनाधिकारमाह ।

हुत्वा खगानां समिधस्तथाऽऽज्यं
चरूंस्तिलानुक्तफलानि मन्त्रैः ।
निजागमोक्तैरपि पूजनं च
दानं सुभद्राय ततो विदध्यात् ॥ ९४ ॥

हुत्वेति । ततः स्नानान्तरः । खगानां पूजनं दानं च सुभद्राय सुखाय विदध्यात् कुर्यात् । किं कृत्वा । समिध एधांसि तथा आज्यं चरून् उक्तफलानि च हुत्वा हवनं विधाय । कैः । निजागमोक्तैः स्वशाखावेदोक्तैर्मन्त्रैरिति ॥ ९४ ॥

अथ प्रथमं सूर्यदानमाह ।

नृणां सिताऽघ्न्या गलबद्धचीवरा
लवेतरोधस्यवती सुलक्षणा ।
दुष्टे विवस्वत्यपवर्जनोचिता
सगोस्तनी तण्डुलहर्म्यदक्षिणा ॥ ९५ ॥

नृणामिति । नृणां दुष्टे विवस्वति सूर्ये सति । सिता श्वेता अघ्न्या गौः । अपवर्जनोचिता दानाय हिता स्यात् । किंविशिष्टाऽघ्न्या । गलबद्धचीवरा कण्ठबद्धवस्त्रा । पुनः किंविशिष्टा । लवेतरमल्पेतरं बहु ऊधस्यं क्षीरमस्यास्तीति बहुदुग्धवती । पुनः किंविशिष्टा । सुलक्षणा दोषरहिता । पुनः किंविशिष्टा । गोस्तनी द्राक्षा । तण्डुलाः प्रतीताः । हर्म्यं गृहम् । एषां दक्षिणासहिता । "उस्राऽघ्न्या रोहिणी"-इति 'हैमः' । "गोरसः क्षीरमूधस्यम्"-इति च ॥ ९५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ चन्ददानमाह।

शङ्खं समुक्तं कलधौतजं द्विजे
सरोहिणीस्तन्यमनन्यदक्षिणम्।
दद्यादनिष्टे किल रोहिणीविभौ
सतण्डुलाघारसितोपलं सदा॥ ९६॥

शङ्खमिति। किलेति सत्ये। अनिष्टे रोहिणीविभौ चन्द्रे सति सदा नरो द्विजे विप्रे शङ्खं दद्यात्। किंविशिष्टं शङ्खम्। समुक्तं मुक्ताफलसहितम्। पुनः किंविशिष्टं शङ्खम्। कलधौतजं रजतमयम्। पुनः किंविशिष्टम्। सरोहिणीस्तन्यं गोदुग्धसहितम्। पुनः किंविशिष्टम्। तण्डुलाः प्रसिद्धाः। आघारं घृतम्। सितोपला शर्करा। एताभिः सह वर्त्तमानम्। पुनः किंविशिष्टम्। अनन्यदक्षिणं न विद्यतेऽन्या दक्षिणा यस्मिँस्तत्। रजतदानमेव देयमित्यर्थः। "स्तन्यं पुंसवनं पयः"-इति 'हैमः'। ननु द्विजेऽत्राधिकरणं कथं तदाह। ननु यस्मै दित्सा रोचते धारयते वा तत्सम्प्रदानमिति। यदुक्तं 'विद्यानन्देन'-वाशब्देन वाशब्दस्य व्यवस्थावाचित्वात् ब्राह्मणस्य ददाति। ब्राह्मणे ददात्यपि स्यादेव रुचेरप्रयोगे राज्ञो रोचते मृगया न मन्त्रिण इत्यादौ षष्ठीप्रयोगदर्शनात्। विस्तरे च विस्तृतं राज्ञो रोचते घृतमित्यादयोऽपि। तदेतच्च निरधारि 'महाभाष्य'-कुञ्चरणैरिति वक्ष्यमाणाधिकारेऽपि ज्ञातव्यम्॥ ९६॥

अथ भौमदानमाह।

वृषोऽरुणो भूमिभुवोऽपवर्जने-
ऽहितस्य शुल्वाढ्यविषाणसंयुगः।
सभूरिचन्द्रोऽरुणचीवरं तु वा
शस्तो हि गोधूमगुडाज्यवन्नृणाम्॥ ९७॥

वृष इति। अहितस्यानिष्टस्य भूमिभुवो मङ्गलस्यापवर्जने नृणामरुणो वृषो गौः शस्तः शुभः प्रोक्तः। किंविशिष्टो वृषः। शुल्वेन ताम्रेणाढ्यं खचितं विषाणसंयुगं यस्य सः। पुनः किंविशिष्टः। सभूरिचन्द्रः सुवर्णमयचन्द्रसहितः। वाऽथ वा वाऽनु। अरुणचीवरं रक्तवस्त्रं शस्तं कथितम्। किंविशिष्टं वस्त्रम्। गोधूमादियुक्तम्॥ ९७॥

अथ बुधस्य दानमाह।

सगैरिका गौरनगौरविग्रहा
शोणप्रभापीनकुचा हरिद्रला।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देया विदश्चीरभचीरमाद्विजे
सशार्षपं वा तु सकङ्गु तुष्टये ॥ ९८ ॥

सगै इति । नरेण विदो बुधस्य तुष्टये सन्तोषाय । आदिजे विप्रे गौर्देया दातव्या । किंभूता गौः । सगैरिका सुवर्णसहिता । पुनः किंभूता । अनगौरविग्रहा श्वेतशरीरा । पुनः किंभूता । शोणप्रभापीनकुचा रक्तप्रभपुष्टस्तनी । पुनः किंभूता । हरिद्वला नीलकण्ठा । वाऽथ वा । चीरं देयम् । चीरं चूडासीसम् । तद्वद्वा कान्तिर्यस्य तत् चीरभं तच्च चीरं वस्त्रं च चीरभचीरं नीलवस्त्रम् । 'हैमेऽनेकार्थे'–"चीरं वाससि चूडायां गोस्तने सीसपत्रके" इति । किंविशिष्टं चीरम् । सशार्षपं शर्षपतैलसहितम् । पुनः किंविशिष्टम् । सकङ्गु कङ्गुसहितम् ॥ ९८ ॥

अथ गुरुदानमाह ।

सुपीतचीरं सुरवन्दितेऽवरे
ददाति योऽवन्यमराय वाऽवरम् ।
स नैति गाङ्गेयवरं च पुस्तकं
नीवारगव्यद्विदलान्नशर्कराः ॥ ९९ ॥

सुपीतेति । अवरे अनिष्टे सुरवन्दिते गुरौ सति । यः पुरुष एतानि ददाति । कस्मै । अवन्यमराय भूदेवाय द्विजाय । तान्याह । सुपीतचीरं शुभपीतवस्त्रम् । गाङ्गेयवरं शुभसुवर्णम् । च-पुनः पुस्तकम् । नीवारा वनव्रीहयः । गव्यं घृतादि । द्विदलान्नं चणकादि । शर्करा एताश्च वेति । स पुरुषोऽवरमशुभं नैति न प्राप्नोति ॥ ९९ ॥

अथ कविदानमाह ।

कर्त्तुं कविं सौम्यतरं द्विजन्मने
बलक्षभं वाहमकुप्यदक्षिणम् ।
दद्यात् सितार्त्यार्त्तमना नरोऽथ वा
मत्स्यण्डिकाज्यार्जुनचैलतण्डुलान् ॥ १०० ॥

कर्त्तुमिति । सितस्य शुक्रस्यार्त्तिः पीडाऽनयाऽर्त्तं पीडितं मनो यस्य स सितार्त्यार्त्तमना नरो द्विजन्मने विप्राय वाहं घोटकं दद्यात् । किं कर्त्तुम् । कविं शुक्रं सौम्यतरं शुभतरं विधातुम् । किंभूतं वाहम् । बलक्षभं श्वेतप्रभम् । पुनः किंभूतं वाहम् । अकुप्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दक्षिणा यस्मिन् स तम्। अथ वा मत्स्यण्डिका फाणितं रक्तखण्डः। आज्यं घृतम्। अर्जुनचैलं श्वेतवस्त्रम्। तण्डुलाः। एषां द्वन्द्वे एतान् दद्यात् ॥ १०० ॥

अथ शनिदानमाह।

सजातरूपाद्विषमानुगो भवेत्
श्यामार्जुनीदानत ऐनिरार्त्तिहृत्।
कृष्णांशुकायस्तिलतैलदानतो-
ऽप्यनिष्टहा वा जनिभाद्विदेहिनाम् ॥ १०१ ॥

सजातेति। हीति निश्चितम्। देहिनां नृणाम्। जनिभात् जन्मर्क्षात् विषमानुगो दुष्टराशिस्थितः। एवंविध ऐनिः शनिः। श्यामार्जुनीदानतः कृष्णसुरभीदानतः। आर्त्तिहृत् पीडाहरो भवेत्। किंभूतात् श्यामार्जुनीदानतः। सजातरूपात् स्वर्णसहितात्। वेति पक्षान्तरे। शनिः। कृष्णांशुकं कृष्णवस्त्रम्। अयो लोहम्। तिलतैलानि। एषां द्वन्द्वे। एषां दानतोऽनिष्टहाऽनिष्टघातको भवेत् ॥ १०१ ॥

अथ राहुदानमाह।

ककायदौःस्थ्योपशमाय देहिनां
सुसप्तधान्योपलसारशीर्षकैः।
प्रपूरितस्यादिभुवि प्रदेशनं
शूर्पस्य नीलम्बरदक्षिणं भवेत् ॥ १०२ ॥

ककेति। देहिनाम्। कं मस्तकमेव कायः शरीरं यस्य स ककायो राहुस्तस्य दौःस्थ्योपशमनाय शूर्पस्य प्रस्फोटनस्य प्रदेशनं दानं भवेत्। कस्मिन्। आदिभुवि अग्रजन्मनि विप्रे। किंभूतस्य शूर्पस्य। सुसप्तधान्यानि। उपलसारं लोहः। शीर्षकं लाङ्गलिफलम्। एषां द्वन्द्वे एभिः प्रपूरितस्य। किंभूतं प्रदेशनम्। नीलाम्बरस्य दक्षिणा यस्मिंस्तत् नीलाम्बरदक्षिणम्। "प्रदेशनविसर्जने"-इति 'हैमः'। लोहे गिरिसारं शिलासारम्"-इति 'हैमः' ॥ १०२ ॥

अथ केतुदानमाह।

दद्याद्गजं हाटकभूमिदक्षिणं
केतूदये वा विषमानुगे भतः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

केतोर्जनेर्जन्मवतो द्विजातये
तमस्य प्रीत्याऽऽह स बादरायणः ॥ १०३

दद्यात् इति । जन्मवतो नरस्य जनेर्भतो जन्मराशितो विषमानुगे सदये सति स नरो गजं नागं दद्यात् । कस्मै द्विजातये विप्राय । किंभूतं गजं भूमिदक्षिणा यस्मिन् स तं स्वर्णभूदक्षिणम् । वाऽथ वा । केतौ विषमानुगे दानं देयम् । अपि पुनः । तमसि राहौ विषमे सत्यपि एतद्दानं देयमिति । कृष्णद्वैपायन ऋषिराह । "कानीनो बादरायणः"-इति 'हैमः' ॥ १०३ ॥

अथ दुष्टे नवग्रहे धार्यमाह ।

आरेनयोर्विद्रुममिन्दुधिष्ण्ययो-
स्तारं विदः कर्बुरमिन्द्रमन्त्रिणः ।
मुक्ताफलं धार्यमयश्च तुष्टये
यमस्य लाजावलयं किलान्ययोः ॥ १०४

आरे-इति । जने आरेनयोर्भौमसूर्ययोस्तुष्टये विद्रुमं धार्यम् । एवं योश्चन्द्रशुक्रयोस्तारं रूप्यम् । विदो बुधस्य कर्बुरं स्वर्णम् । इन्द्रमन्त्रिणः फलम् । यमस्य शनेरयो लोहम् । अन्ययो राहुकेत्वोस्तुष्टये लाजावलयं रलयोरैक्यात् । "विराटजो राजपट्टो राजावर्त्तः"-इति 'हैमः' । 'राव' भाषा ॥ १०४ ॥

अथोपसंहारमाह ।

तदर्चनादाद्विजदेववन्दना-
च्छ्रेयस्कथाकर्णनतो मखेक्षणात् ।
होमाज्जपादागमपाठदानतो
न पीडयन्त्यङ्गभृतः खगामिनः ॥ १०५ ॥

तदेति । अङ्गभृतः प्राणिनः खगामिनो ग्रहा न पीडयन्ति । कस्मिन् द्ग्रहपूजातः । पुनराद्विजदेववन्दनात् द्विजदेववन्दनात् । पुनः श्रेयस्कथाकर्ण कथाश्रवणात् । पुनर्मखेक्षणात् यज्ञदर्शनात् । पुनर्होमात् । पुनर्जपात् प्रणवपूर्व पुनरागमपाठदानतः ॥ १०५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY,
Jangamwadi Math, VARANASI,
Acc. No. 1815

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri